The ĀGAMA ENCYCLOPAEDIA

Volume XI

Utsavas



Prof. S.K. Ramachandra Rao

THE ĀGAMA ENCYCLOPAEDIA

Prof. S.K. Ramachandra Rao

XI

S
PU

The Āgama literature includes the Śilpa-Sastra, which is basic to iconography. Worship dealt with in the Āgama necessarily involves images which are worship-worthy. The rituals and sequences that are elaborated in the Āgama books find relevance only in the context of an icon which is contained in a shrine. And icons are meaningful only in the context of shrines and worship.

Āgama texts are not easily accessible to the people. A large number of them are still available only in manuscripts; some of them which have been printed are only in their Sanskrit originals. There is need, therefore, to present relevant excerpts from them at least, to make the volumes on iconography more meaningful.

Further, Indian temples are to be considered only in the general framework of temple culture, which include not only religious and philosophical aspects but social, aesthetic and economic aspects also.

The volumes named Āgama Encyclopaedia deals with the temple-culture and Āgama framework, the sectarian division of the Āgama into Śaiva, Vaiṣnava and Śākta, and the topics selected from the Āgama texts follow. Thus, the entirety of the Āgama, literature in so far as it is relevant to the temple-culture is brought within the scope of The Āgama Encyclopaedia.

ISBN 81-7030-821-6 (Vol.XI)
ISBN 81-7030-823-2 (Set)

The ĀGAMA ENCYCLOPAEDIA

Volume XI

Utsavas

11

THE ĀGAMA ENCYCLOPAEDIA

Prof. S.K. Ramachandra Rao

SRI SATGURU
PUBLICATIONS

THE
ĀGAMA
ENCYCLOPAEDIA

(Revised Edition of Āgama Koṣa)

Volume XI

Utsavas



Sri Garib Dass Oriental Series No. 299

THE ĀGAMA ENCYCLOPAEDIA

(Revised Edition of Āgama Koṣa)

Volume XI

Utsavas

Prof. S.K. Ramachandra Rao

Sri Satguru Publications
A Division of
Indian Books Centre
Delhi, India

Published by
Sri Satguru Publications,
Indological and Oriental Publishers
A Division of
Indian Books Centre
40/5, Shakti Nagar,
Delhi-110007
India

Email: ibcindia@vsnl.com,
Website: http://www.indianbookscentre.com

First Edition: Bangalore, 1989-1994
Second Revised & Enlarged Edition: Delhi, 2005

ISBN 81-7030-821-6 (Vol.XI)
ISBN 81-7030-823-2 (Set)

Printed at Chawla Offset Printers, Delhi 110 052

Introduction

The Āgama literature includes the Śilpa-Sastra, which is basic to iconography. Worship dealt with in the Āgama necessarily involves images which are worship-worthy. The rituals and sequences that are elaborated in the Āgama books find relevance only in the context of an icon which is contained in a shrine. And icons are meaningful only in the context of shrines and worship.

Āgama texts are not easily accessible to the people. A large number of them are still available only in manuscripts; some of them which have been printed are only in their Sanskrit originals. There is need, therefore, to present relevant excerpts from them at least, to make the volumes on iconography more meaningful.

Further, Indian temples are to be considered only in the general framework of temple culture, which include not only religious and philosophical aspects but social, aesthetic and economic aspects also.

The volumes named Āgama Encyclopaedia will deal with the temple-culture and Āgama framework, the sectarian division of the Āgama into Śaiva, Vaiṣnava and Śākta, and the topics selected from the Āgama texts will follow. Thus, the entirety of the Āgama, literature in so far as it is relevant tọ the temple-culture is brought within the scope of The Āgama Encyclopaedia.

The volume deals with the general problems relating to the idea of Āgama and the broad details of the tradition that is known after Āgama. In the historical perspective Āgamic tradition and the Vedic tradition were initially distinguished, but later the two fused. The circumstances that favoured the separation and integration have been explained. The role that Tantra played in crystallizing the Āgama tradition has been elaborately explained and illustrated. And more importantly the volumes deal almost exclusively with the essential details of temple-culture in India Without an adequate appreciation of this context, other aspects of Āgama cannot become meaningful. In one of the appendices, a fairly exhaustive account of Tantra has been given, for this has provided the major dimension to the Āgama, especially of the Śãkta pursuation.

The volumes which were originally published in the period 1989-1994 by the Kalpatharu Research Academy, Bangalore are being reprinted now, and I am grateful to my friend Shri Sunil Gupta of the Indian Books Centre, Delhi for publishing a revised edition of the volumes.

Bangalore
June, 2004

S.K. Ramachandra Rao

UTSAVA: MEANING AND TYPES

The expression is undoubtedly of Vedic origin, and its meaning has always been merriment or festive mood. We read in *Ṛgveda*:

तमप्सन्त शवस उत्सवेषु नरो
नरमवसे तं धनाय।
सो अन्धे चित्तमसि ज्योतिर्वि-
दन्मरुत्वान्नो भवत्विन्द्र ऊती॥

(1,1008,8)

इमां ते धियं प्र भरो महो मही-
मस्य स्तोत्रे धिषणा यत्त आनजे।
तमुत्सवे च प्रसवे च सासहि-
मिन्द्रं देवासः शवसामदन्ननु॥

(1,102,1)

The word is made up of the prefix ('ut' (meaning up, above), the root 'sū' (to produce, to emanate, to draw out) and the grammatical ending 'ach'. The word 'sava' means a sacrifice, a celebration, an occurrence of importance; the prefix suggests its excellence or extraordianary character. The lexicon defines the world 'utsava' as whatever is calculated to produce happiness (niyatāhlādajanaka-vyāpāra). Among its synonyms is

'mahaḥ' which signifies the 'signifies the 'swelling' of the emotions of joy and merriment.

The Āgamas prescribe that 'utsava' is a necessary observance in a temple. Even While the temple is being consecrated or aṇ icon installed, utsava should be performed as the concluding rite. 'Without it, consecration would be futile' says *Hayaśīrṣa-saṁhitā* (36,5)

उत्सवेन विना स्थापनं निष्फलं भवेत्।

For the utsava is meant to secure the delight of the gods and the welfare of the people. Its origin is traced to the celebration among gods when Indra killed the dragon-demon Vṛtra, and brought happiness to all the gods and human beings (*Pādmā-saṁhitā* 'devoir eva purā vṛtravadhe' 10,5). It destroys all obstacles (*Īśvara-saṁhitā*, 'vighna udgataḥ savaḥ yasmāt'), and produces happiness (*Śrī-praśṇa-saṁhitā*, 31,8 'ut-sūte harśam iti'). It brings about peace and nourishment for all the people (*Samūrtārcanā*, 4,4. 'Sarva-lokānām śānti-puṣṭ i-karam').

In the context of a temple, it corresponds with the Vedic rite of an elaborate sacrifice. So we read in *Atri-samhitā*:

सवो यज्ञः समाख्यातः सर्वयज्ञाद्विशेषतः।
उत्कृष्टो यः स यत्तस्मादुत्सवश्चेति कीर्त्यते॥

and also in *Bhṛgu-samhitā*:

उदित्युत्कृष्टवचनं सवो यज्ञ उदाहृतः।
तस्मादुत्कृष्टयज्ञत्वादुत्सवः परिभाष्यते॥

Similarly in *Puruṣottama-samhitā* (32, 2) :

उदित्युत्कृष्टवचनं सवो यज्ञमिति स्मृतम्।
उत्कृष्टः सवो यस्मादुत्सवः परिचक्षते॥

Some texts take 'sava' in the sense of welfare and happiness, and explain utsava, as whatever brings about sava. *Ajitāgama* (27,1) for instance, says:

सवः कल्याणमित्युक्तं सर्वजन्तुसुखवहम्।
उद्भूतस्तु सवो यस्मात्तस्मादुत्सव उच्यते॥

The word 'sava' is taken as 'creation', 'production' (from the root 'sū' and hence utsava is that which causes creation or emanation. (*Pūrva-karaṇāgama*).

सव इत्युच्यते सृष्टिः तदुत्स्याच्छुभाषितम्।
उद्भूतसृष्टिकारकत्वादुत्सवं कथिता मया॥

There is also a variant meaning of 'sava', viz. unhappiness or misery of transmigratory existence: utsava is that which makes us get over it.

Pādma-samhitā (caryā, 10) says :

सवः सांसारिकदुःखमुत्तरन्ति तदम्बुधिम्।

and we read in *Aniruddha-samhitā* (20,1) :

सवस्त्वमङ्गलं विद्धि उत्सवस्तन्निवर्तकः।

The same meaning is found in *Vaśiṣṭa-samhitā* (12):

सवो दुःखं समाज्ञातं सवोऽरिष्ट उदाहृतः।
उद्द्र तस्तु सवो येन तस्मादुत्सव उच्यते॥

Uttarakaraṇāgama (4,1) has another interpretation of the word utsava : wisdom or noesis which secures all welfare, material as well as spiritual :

उच्छब्दः ज्ञानमित्युक्तं सर्वकल्याणकारकम्।
भोगमोक्षमिति ज्ञेयं चतुर्विधमिति त्वया॥

The numerous benefits of conducting an utsava are enumerated in the Āgama texts: It makes for all-round peace; it is a meritorious act, and secures fulfillment of all desires; it destroys the sins accumulated in previous births and brings happiness in all our enterprises. It contributes to the welfare of the king and the kingdom. Whoever sponsors an utsava will prolong his life-span, obtain celebrity and secure the continuance of his lineage. All prosperity is achieved; and conditions of famine and drought are eliminated. The rulers will succeed in all of their enterprises; victory is assured to them. Wealth will grow, when the gods are pleased. The utsava will please all the gods and will also purify them. All the tour values of life (dharma, artha, kāma and mokṣa) are alike accomplished through the conduct of an utsava.

सर्वशान्तिकरं पुण्यं सर्वाभीष्टफलप्रदम्।
सर्वपापहरं पुण्यं सर्वकर्मशुभावहम्।
राजराष्ट्रविवृद्ध्यर्थं श्रीमत् त्रैलोक्यभूषणम्॥

(*Viṣvaksena-samhita*, 27,1)

आयुष्करं यशस्करं सौभाग्यविवर्धनम्।
पुत्रपौत्रविवृद्धिं च सर्वकामफलप्रदम्॥
(राज्ञां विजयवृद्धिं च सर्वकामफलप्रदम्)

(*Purva-kārana,* 141, 7 and 8)

उत्सवे देवेदेवेशं ये सेवन्ते सर्वे पदे पदे यज्ञफलं लभेरन्निति भृग्वादयो वदन्ति॥

(*Vimānārcanā-kalpa*)

देवानामपि सर्वेषां पवित्रीकरणाय च।

(*Īśvara-samhitā*, 11, 275)

पापापनोदनैकान्तं कर्तुरायुर्विवर्धनम्।
प्रजानामपि राष्ट्रस्य सर्वाभ्युदयसाधकम्॥
दुर्भिक्षदुर्निमित्तादि घोराणां शान्तिदं परम्।
धर्मार्थकाममोक्षाणां पुरुषार्थप्रदं शुभम्॥

(*Puruṣottamā-samhitā*, 23, 6 and 7)

आराधनमिदं ..... मोक्षकामैः ..... प श्वादिकामैः
दुरनुष्ठेयमद्भुतम्।
तोषणं मम कल्याणमनुष्ठितमानुषम्॥

(*Pādma-samhitā*, carya, 10, 4 and 5)

The utsava among human beings was said to be instituted on the model of the utsava that was conducted by the jubilant gods head by indra when they achieved victory in their fight with the demon of drought, Vṛtra. The sin of having killed him had also to be expiated; and gratitude for Viṣṇu for having helped them to be victories had also to be pressed. We read in *Pādma-samhitā* (caryā-pāda, 10, 5):

दैवेरपि पुरा वृत्रवधे तत्पापनुत्तये।
इन्द्रेणापि दिविष्ठेन मामुद्दिश्य कृतं शुभम्॥

Hayaśirṣa-samhitā (Samkarṣana-Kāṇḍa) insists that the utsavas inaugurated by the gods must necessarily be conducted by human beings according to their capacity, for it makes for the presence of Viṣṇu:

विधानं देवविहितं विष्णुसान्निध्यकारकम्।
अवश्यकार्यं ..... स्वशक्तितः॥

(36, 1 and 2)

It also avers that the consecration of the temple and installation of the deity will be fruitless, if the utsava is not conducted:

उत्सवेन विना स्थापनं निष्फलं भवेत्।

(ibid., 5)

And the non-performance of the utsavas will spell danger and ruin for the kingdom, and destruction of all property:

एतद्विना राजराष्ट्रभयं भवेत् सर्वसंहारकारणम्।

(ibid, 15)

The utsava will bring luck and happiness to all the people, who dwell in that area, and who participate in the celebrations.

सर्वलोकशुभप्रदम्।
सर्वलोकानां शान्तिपुष्टिकरम्।।

(*Samūrtārcna-candrikā*, 4, 4)

***

(2)

Utsava in the Vaiṣṇava āgamas is generally grouped under three heads: nitya, naimittika and kamya (see *Pādma-samhitā, caryā, 10, 7; Īśvara-samhitā*, 10, 11; *Śrī Praśna-samhitā*, 31, 9; *Puruṣottama-samhitā* 23, 6; *Viṣṇu-tattva-samhitā*, 16, *Parameśvana-samhitā* 16, 3; and Aniruddha-samhitā, 17, 15)

(1) The 'nitya' variety of utsava is obligatory; it must be performed on the prescribed days during the year, according to the lunar day (tithi), the fortnight (pakṣa) and the month (māsa) previously fixed as auspicious:

शुभे च तिथिनक्षत्रे विषुवे चायने द्वये।
कल्पितावभृतस्नानः सेवितः सर्वदेवतैः॥
वर्षे वर्षे कृतं यत्तत् नित्यमेतत्प्रचक्षते॥

(2) The 'naimittika' variety of utsava is to be performed when it is indicated by an occasion that calls for celebration, expiration or prevention of an evil ('nimitte sati Kalpitah' *Aniruddha-samhitā,* 29, 1). The occasions might be famine, drought, thunderbolt, fall of a meteor or a star, eclipse, sight of a rainbow in the night, the crumbling down of a tower or a pavilion, the damage done to an image in worship, the destruction of the sacred tree within the premises of the temple, the appearance of stars during day-time, earth-quake, appearance of a second sun, plague and pestilence, unprecedented torrential rains, attack of the kingdom by an enemy, accidental fires, strong colours in the clouds and queer circumstances like the icon in worship laughing, crying, moving about or falling off its seat:

अवग्रहे च दुर्भिक्षे चोल्कापाते तथा निशि।
दर्शने सुरचापस्य वालमीनस्य दर्शने॥
देवताप्रतीकानां कम्पने भेदने तथा।
हसने चलने चैव रोदने पतने तथा॥

गोपुरालयसालानां मण्डपस्य च भेदने।
भंगे वा पतने वापि ...॥

निपाते चैत्यवृक्षस्य भंगे, ज्वलनदर्शने, अद्भुतदर्शने,
भूतादिदर्शने घोरे, अग्निजनने, वृक्षोत्पन्नफले दृष्टे,
दिवानक्षत्रदर्शने, भूमिकम्पे, दिग्दाहे, महावाते,

महावृष्टौ,
प्रतिसूर्यदर्शने, नृपरोगाभिभूते, ग्रामे जनपदे मसूरिकादि घोराणां व्याधीनां च प्रवेशने, परचक्रप्रवेशे, वर्षे वा अशनिपाते, शक्रध्वजनिपातने ...॥

(*Pādma-samhitā*, *caryā*, 20, 9, 18, and *Aniruddha-samhitā*, 20, 2-9)

भूमिकम्पे, दिशां दाहे, महोत्पाते, दुर्भिक्षे, व्याधिते राष्ट्रे, शत्रुसंकटे, अनावृष्टौ, नक्षत्रपतने, व्यत्यासे शशिसूर्यस्य, देवता हसने सति रोदने चलने, बिम्बे चलति च आसनात् शान्त्यर्थं तत्प्रकुर्वीत नैमित्तिकमुच्यते॥

(*Pāramesvara-samhitā*, 19, 5-17)

The naimittika-utsava is meant as as a pacificatory ritual to ward off the evil portents and to placate the deities that have been offended due to some reason. The festival of this nature must not be resorted to when there is no occasion for it.

(3) The 'kāmya' variety of utsava may be sponsored by any individual devotee or the ruler of the land in order to get any of his desires fulfilled: the desires may pertain to one of the four goals of human existence : dharma (virtuous conduct), artha (material prosperity), kāma (normal human pleasures and satisfactions) and mokṣa (ultimate liberation from the cycle of existence) (caturṇām puruṣārthānām uddiśya', 'samkalpita-phala-pradah') (see *Nāradiya-samhitā*, 18, 6; *Padma-samhitā*, caryā, 1; *Iśvara-samhitā*, 10, 8; *Aniruddha-samhitā*, 20, 10 and *Pāramesvara-samhitā*, 16, 7 and 8).

The Vaikhānasa texts speak of these three varieties as nitya (or kāla), santi (or nimitta) and śraddhā. We read in Marici's Vimānārcanākalpa:

त्रिविध उत्सवो नित्योत्सवः शान्त्युत्सवः श्रद्धोत्सव इति।

(१) द्वादशमासेऽस्मिन्मासेऽब्दं प्रति तत्काले नित्यं संकल्प्य यः क्रियते स नित्योत्सवः।

(२) भयप्रमाददुर्भिक्षव्याधिग्रहपीडाद्यशुभशान्त्यर्थं संकल्प्यः यः क्रियते स शान्त्युत्सवः।

(३) श्रद्धा वित्ते यदा युक्ते तदा यः सम्यक् क्रियते स श्रद्धोत्सवो भवेत्॥

It is paraphrased in another text thus:

कालश्रद्धानिमित्तार्था उत्सवास्त्रिविधाः स्मृताः।
मासे तु यस्मिन् कस्मिं श्च वर्षं वर्षं प्रति प्रति ॥१॥
क्रियते समये सैव तु कालोत्सवो भवेत्।
श्रद्धया क्रियते यस्तु स श्रद्धोत्सव उच्यते ॥२॥
भयप्रदनिमित्तेषु तथाऽनावृष्टिकादिषु।
क्रियते तस्य शान्त्यर्थं स निमित्तोत्सवः समृतः ॥३॥

The utsava of any variety may be celebrated for a single day or for several days, usually not exceeding nine. The number of days allowed in scriptures for the conduct of an utsava is always odd: one, three five, seven, or nine. It is usual to enumerate five kinds of utsavas with regard to their duration.

(i) 'ekāha' for a single day, called Śāntika or Mangala. Pūrva-kārana (141, 2-3) and *Ajtāgama* (27, 21-23) call it Śaiva, and *Candra-jñāna* (21) identifies it as Śāṁbhava and *Īśvara-samhitā* (13) calls it Brāhma. This utsava is calculated to be auspicious and to bring about peace.

(ii) 'tryāha', for three days, called Pauṣṭika. *Pūrva-kāraṇa calls it sāttvika, Ajitāgama gauṇa and Candra-jñāna* Mauktika and *Īśvara-samhitā* Śaiva. This utsava when conducted has the value of nourishing the people.

(iii) 'pañcāha', for five days, called Bhautika (*Ajitāgama*) or Jayada. According to *Pūrva-kāraṇa.* it is Pārthiva, while *Candra-jñāna* calls it Brāhma and *Īśvara-samhitā* Aindra. The utsava will secured victory and success in all undertakings.

(iv) 'saptāha', for seven days called Dhanada or Abhyudaya; it is also called Śrīkara (*Pūrva-kāraṇa*), Bhauvana (*Ajitāgama*) or Ārṣa (*Candra-jñāna* and *Īśvara-samhitā*). The utsava brings about wealth and prosperity.

(v) 'sārva-kāmika' for nine days, called also Saukhya (*Pūrva-kāraṇa*) Daivika (*Ajitāgama*) Śākta (*Candra-jñāna) and* Vaiṣṇava (*Īśavara- samhita*).

While this is the general practice, the texts recognize utsavas for longer periods also. *Pūrva-kāraṇa* speaks of a twelve-day utsava (dvādaśāha), called Paitṛka; *Ajitāgama* prescribes a thirteen-day utsava called Kaumāra, a fourteen-days utsava called Sāvitrya, and a fifteen-day utsava called Cāndra.

However, some texts suggest an upper limit of twenty-one days. *Nāradīya-samhitā* (18, 93), for instance, lays down:

But *Hayaśīrṣa-samhitā* (36, 4) prohibits an utsava that is prolonged beyond twelve days:

त्रिरात्रं पञ्चरात्रं वा सप्तरात्रमथापि वा।
दश द्वादशरात्रं वा अत ऊर्ध्वं न कारयेत्॥

Thus, we have six kinds of utsavas in Pūrva-kāraṇa (chap. 141), seven kinds in *Candra-jñāna* (Paṭala 21), and nine kinds in *Dīptāgama* (chap. 83 and *Ajitāgama* (27). The Vaikhānasa texts also recognize nine kinds of ustsavas and arrange them in a scale of merit.

त्रिगुणीकृतनवाहं उत्तमोत्तमम्।
त्रिगुणीकृतसप्ताहं मध्यमम्।
द्विगुणीकृतपञ्चाहं मध्यमाधमम्।
नवाहं अधमोत्तमम्।
सप्ताहं अधममध्यमम्।
पञ्चाहं अधमाधमम्।
इत्युत्सवस्य नवविधत्वम्॥

According *Uttara-kāraṇa* (24, 50-51), however, we have this arrangement:

Saura, Sāvitrya and Cāndra: Uttama (of superior merit)

Kaumāra, Daivika and Bhauvana: Madhyama (of middling merit)

In the five varieties mentioned above, the last two (the festivals seven and nine days) are considered superior, the first (the festival of single day) inferior, and the other two (the festivals of three and five days) of middling merit. *Dīptāgama* (83) considers the first three (ekāha, tryāha and pañcāha) as inferior (kanyāsa) and the last two (saptāha and navāha) as of middling merit (madhyama); the superior (uttama) varieties, according to this text, are the festivals conducted for thirteen, fourteen and fifteen days (viz. Kaumāra, Sāvitrya and Cāndra of *Ajitāgama*). The twelve- day

festival (Saura or Paitṛka) is included under the middling variety.

According to Nārāyaṇa-samhitā (44), among the five varieties of utsava, the first one (brāhma) pleases Brahma (brahma-prīti-phalam) the second one Śiva, the thrid one Indra, the fourth one Lakṣmī and the fifth one Viṣṇu. Īśvara-samhitā (13, 95-96) describes the first variety of utsava (ekāha) as securing the welfare of the three upper castes (trai-varṇika-kṣema), the second variety (tryāha) as having the value of eliminating all diseases (roga-nāśa), the third variety (pañcāha) as preventing drought and famine (durbhikṣa-nāśa), the fourth (saptāha) as securing the prosperity of the kingdom (rājya-vibhava), and the fifth (navāha) as achieving the welfare and protection of all the people (sarva-rakṣārtha), by providing material prosperity as well as spiritual benefits (bhukti-mukti-phala-prada). Therefore, the texts prescribe the nine-day festival as the best:

प्रथमादिनवाहान्तमुत्सवं चोत्तमं भवेत्।

(Śrī-praśna-samhitā 31, 15.)

***

(3)

The sequences in an utsava are also specified in texts in accordance with the days of festival. Some texts enumerate fifteen of such sequences (pañcottara-dasānga). as follows (Viṣvaksena-samhitā 27, 12-16):

1. Aṅkurārpaṇam: ceremonial sowing of seeds to mark the beginning of the festival.

2. Patakārohaṇam: hoisting of the temple-banner.

3. Śuddha-snānam:	purificatory bath by the priests and other participants in the festival.
4. Sthāpanā:	preliminary rites of installation and consecration
5. Aṅkurotsava:	festival of collecting sprouts.
6. Homa:	fire-ritual.
7. Bhuṣaṇa:	decorations and processions.
8. Bali:	food-offerings.
9. Mahotsava:	the festival proper.
10. Tīrthādhivāsa:	ceremonial visit to the sacred tank or river.
11. Tirtha-snāna:	ritual bath for the deities, and also for the participants.
12. Snapana:	water consecration for the main deity.
13. Puṣpa-yāga:	covering the deity with flowers accompanied by Vedic recitals.
14. Dakṣiṅa-sampradāna:	honouring the priests.
15. Dhvajāvarohaṅa:	bringing the banner down, signifying the completion of the festival.

More usually, however, ten sequences (daśānga) figure prominently in a nine-day (sārva-kāmika) festival. In *Rauravāgama* (kriyā, 13) they are numerated as follows:

1. dhvajāṅkura (the ceremonial sowing of the grain-seeds)
2. dhvajāroha (the hoisting of the flag)
3. bherikā-ghoṣa (beating of the big drum)

4. yāgādhivāsa (the sacrificial sequence)
5. homa (the fire-ritual)
7. cūrṇotsava (procession to the river)
8. tīrtha (-snāna) (ceremonial bath for the ditties)
9. caṇḍeśa-yāga.(honouring Caṇḍikeśvara, the attendant of Śiva) (in Śaiva-temples)
10. śuddha-snāna (the purificatory bath, marking the completion of the festival)

In the seven-day festival (dhanada) there are eight sequences (aṣṭāṅga):

1. dhvajāṅkura
2. dhvajāroha
3. yāgāṅkura
4. yāga
5. bherī-tāḍana
6. bali-dāna
7. cūrṅotsava, and
8. tīrtha-snāna

In the five-day festival (jayada), the sequence are seven in number (saptāṅga):

1. dhvājāṅkura
2. dhvaja
3. tīrthāṅkura
4. yāga
5. cūrṇotsava
6. tīrtha, and
7. snapana

In the three-day and one-day festivals, the hoisting of the flag (the first two sequences in the above enumeration) is avoided.

एकाहे च त्र्यहे चैव ध्वजकर्म न कारयेत्।

(*Anirudha-samhitā, 20, 13* and
Pādma- samhitā, carya, 10, 22)

शान्तिके पौष्ठिके न ध्वजारोहण क्रिया।
सध्वजं निर्ध्वजं वापि जयदं कारयेद् बुधः।
धनदे कामिके चैव सावश्यं स्याद् ध्वजक्रिया।।

(*Rauravāgama,* 18)

Kāraṇāgama (24, 424-425) prescribes that the utasava may be conducted in four different ways:

साकल्यं पावनं शान्तं मांगल्य च चतुर्विधम्।

The 'sākalya' is the observance of all the sequences from the hoisting of the flag till the ceremonial bath (dhvajārohādi tīrthāntam). In the 'pāvana' procedure the hoisting of the flag is omitted and all other sequences are gone through ('seṣam ca pūrva- vat kritvā patākāropaṇam vinā'). In the 'sāntika' procedure, the festival is only for a single day and therefore many of the sequences are necessarily eliminated. In the morning fire-ritual takes place and food offerings are made at noon: the percussions are taken out in the evening ('hutvā homam balim caiva pūrvayāme dviyāmake sāyāhne ca utsavam kuṛyāt'). The last alternative, 'māngalya' is when the priest or the patron performs elaborate worship in the morning; and that is all that the festival involves ('yajamānecayā kuryāt prātahkāle śivotsavam'). It is a festival that is completed in the first half of the day.

The most inportant feature of utsava is the excitement and activity. A large group of devotee collect; they

would dress in their best and gather in the temple with eagerness in their hearts. Flowers, garlands, music, processions and rituals figure prominently.

अपूर्वाभरणैर्माल्यैरपूर्वैश्चाम्बरैस्तथा।
अपूर्वोद्यानयानाद्यैः यथा कौतूहलं भवेत्।
तथा विशेषः कर्तव्यः यावत्तीर्थदिनावधि॥

(*Īśvara-samhitā* 11, 315-316)

The utsava is said to commence in one of three ways:

1) By aṅkurārpaṇa, or the ceremonial sowing of the assorted grain-seeds.
2) By bherī-tāḍana, beating the big-drum, or
3) By dhvajārohaṇa or hoisting the flag.

The texts declare that when the utsava commences with aṅkurārpaṇa, it is conductive to the welfare of all people ('sarveṣām mokhsadā, 'sarva- sampat-samṛddhidā); when it begins with bheri-tāḍana the gods are pleased ('devānām priyāvaham') and the fesival bestows heavenly pleasures ('svarga-bhoga-phala'); and when the festival begins with dhvajārohaṇa, the welfare of the kingdom and the ruler is assured ('rāja-rāṣṭra-sukha) and the happiness of all living beings is achieved ('sarva-prāṇi-sukhāvaha') (cf *Pārameśvara-samhitā*, 16, 30 and *pūrva-kāraṇa,* 141, 3 and 4; also *Nāradiya-samhitā,* 18, 7-8).

When the temple utsava in a locality village or town begins with the hoisting of the flag, no domestic celebrations like marriage, tonsure or investitures are permitted until the utsava concludes in that area.

उत्सवे देवदेवस्य ध्वजारोहणपूर्वके।
प्रवर्तिते देवयागे चौलादि नैव संस्क्रिया।

Pādma-samhitā, (caryā, 10, 42)

श्रिया वसुधया सार्धं ग्रामादौ नित्यमुत्सवे।
परिभ्रमणमीशस्य केवलस्यापि वा भवत्॥

(Ibid, 11, 167)

The texts also prescribe that the people who gather for the festival hailing from outside the village or town must be taken care of; they must be provided with food, water and shelters by the residents of the locality or it is the responsibility of the person or persons who sponsor the festival.

देशाद्देशात्समेतानां वर्णानां च तदुत्सवे।
सेवितुं देवदेवेशमन्नाद्यैस्तुष्टिमावहेत्॥
प्रपा पानीयशालाद्यैर्यजमानो दिवानिशम्।

Pādma-samhitā, (caryā, 11,8)

If the people who come from outside to participate in the festival fall ill, proper medication and care must be provided for them.

रोगार्तानथ भैषज्ये भिषजेद्धनराशिभिः॥

(Ibid.,)

Those who arrange for proper attention of the crowds of devotees that collect are extolled in the āgama texts:

महोत्सवे वर्तमाने यदर्थिभ्यः प्रदीयते।
पानीमन्नं वस्त्रं वा तत्सहस्त्रगुणं भवेत्॥

(ibid. 11, 255)

For the utsava is more meritorious than Vedic sacrifices: in fact, the conduct of a single utsava is tantamount to the performance of thousand horse-sacrifices!

हयमेधसहस्रेण यजते यः समाहितः।
यश्चोत्सवेन यजते तयोस्तुल्यफलान्वयः।
यागानामपि सर्वेषां फलमुत्सवकर्मणा॥

(ibid., 11, 270)

Commencement of the utsava with the hoisting of the ritual banner is considered as most proper (mukhya-kalpa). The day meant for this sequence if previously determined by the temple-astrologers and administrators. But this is done with reference to the 'tīrtha', the day and time when the concluding bath (tīrtha) is to performed; the day for flag-hoisting is calculated backwards and fixed.

तीर्थमादौ विनिश्चित्य पूर्वोक्तविधिना सह।

(Pūrva-karaṇa, 141)

निश्चित्य तीर्थदिवसं यागकर्म समारभेत्।

(*Puruṣottama-tantra*, 23)

The flag in the nine-day festival (navāha) is hoisted twenty-one days prior to the day fixed for 'tīrtha' (viz. the concluding sequence) and the utsava is said to have begun on the day when the flag is hoisted:

तीर्थयात्रा दिनादर्वाक् एकविंशतिमे दिने।
ध्वजस्यारोहणं कुर्यादुत्सवार्थं प्रत्नतः॥
उत्सवारम्भदिवसे ध्वजारोहणमाचरेत्।

(Nāradīya-samhitā, 18, 17 and 20)

तीर्थस्नानदिनात्पूर्वं ध्वजारोहणमाचरेत्।
एकविंशति दिने कुर्यान्नवाहोत्सवकर्मणि॥
(कर्मारम्भदिनात्पूर्वमष्टादशदिनेऽपि वा।
पक्षमासे तथा कुर्यान्मासे मासद्वये तथा॥)
(Aniruddha-samhitā, 20, 18 and 20)

The flag is hoisted in honour of Indra and Garuḍa; and also of all the gods:

ऐन्द्रार्क्ष्वकदेवेषु ध्वजारोहणमारभेत्।

The time when the flag is to be hoisted is also prescribed in the texts. If the person who sponsors the festival is a brāhmaṇa, then the flag is to be hoisted in the morning (prātar eva dhvajārohaṇm). It however, he belongs to the kṣatriya caste noon is the time suitable for this purpose (madhyāhne). In case of the sponsor being a vaiśya or a śūdra, then eventide is to be preferred (sāyānhe). When there are many patrons and sponsors, the flag is to be hoisted before noon.

बह्वो यजमानाश्चेत्कुर्यात्पूर्वाह्णकध्वजम्।

If it is a one-day festival, the beginning is made by bherī-tāḍana. The big drum is sounded, not only to announce to the people that the festival has begun, but also to invite the gods to gather at the shrine.

एकाहमारभेद्धीमान् भेरीताडनपूर्वकम्।
(Ajitāgama, 27, 23.)

The beating of the drum is to be done by the members of a particular community attached to the temple; it is done by a stick (koṇa). The āgama texts also prescribe that the drum is to be beaten thrice; first

time while reciting the hymn 'tad-viṣṇoh', the second time while reciting another hymn 'brahmajajñāna', and the third time with the hymn 'kadrudrāya'. The beating of the drum thrice is meant to invite the gods of the three realms (earth, midregion and heavens). The texts also insist that the drum is to be beaten three times with the left hand, and then with the right hand as many times as one desires.

कोणेन ताडयेन्मूर्तित्रयं ध्यायन्।
तद्विष्णोरिति मन्त्रेण प्रथमं ताडनम्॥
ब्रह्मजज्ञानमन्त्रेण द्वितीयं ताडनम्।
कद्रुद्रायेति मन्त्रेण तृतीयं ताडनम्॥
त्रिस्थानादिषु देवानां त्रिधा वै तेन ताडयेत्।
ततः पारशवांस्तां तु वहन् भेरीमलंकृताम्॥
प्रथमं वामहस्तेन त्रिधा सन्ताडनं भवेत्।
दक्षिणेन ततः सम्यक् तथा सन्ताडयेत्तथा॥

(*Īśvara-samhitā*, 31, 33)

ततः पारशतेनैव ताडयेत्तु तथेच्छया।

(*Pārameśvara-samhitā*, 16, 479)

The texts also provide for the recitation of invocator hymns is Samskrit or Prākrit (local dialects) and for dance and songs:

देवतावाहनीं गाथां संस्कृतां प्राकृतां तु वा।
द्राविडीं यथेच्छातस्तथा संश्रावयेद्विभुम्।
तत्काले देवतानृत्यं तत्तद् गीतादिसंयुतम्॥

(ibid. 16, 480)

The utsava necessarily involves the preliminary hoisting of the flag (dhvaja) (utsavam dhvaja-sthāpana-

pūrvakam) except when the utsava is for the duration of a single day or for three days.

एकाहे च त्र्यहे चैव ध्वजकर्म न कारयेत्॥

(*Pādma*-samhitā, 10, 22)

The flag is not hoisted when the utsava is meant for the purpose of pacification or nourishment ('sāntike pauṣṭike na dhvājārohaṇa-kriyā'). For purposes of victory (jayada), an option is given: the utsava may or may not presuppose the hoisting of the flag. However, the utsavas meant for prosperity or fulfillment of desires must necessarily follow flag-hoisting:

सध्वजं निर्ध्वजं वापि जयदं कारयेद् बुधः।
धनदे कामिके चैव सावश्यं स्याद् ध्वजक्रिया॥

(*Rauravāgama*, 18)

For the flag, a new piece of cloth is to be used ('abhinavam vastram'); and its length must be equal to the height of the door of the sanctum ('prāsāda-dvāra-mātram') or to the height of the main icon in the sanctum (mūla-bimba-samam) or five 'hastas' in length (pañca-hastāyatam). The flag is to be decorated and painted tastefully ('yathā-śobham yathā-ruci). In the Vaiṣṇava temples, the figure of Garuḍa is painting on the flag.

The flag is generally brought to the yāga-śālā of the temple night previous of the day fixed for the commencement of the utsava, and consecrated with some rites like akṣi-mocana, prāṇa-pratiṣṭhā etc. Then it is fixed on a pedestal constructed with paddy-grains (śāli-taṇḍula-nirmita) in front of the vimāna (viz. sanctum) or to the south of it. Hymns are recited (svasti-Vācana)

and ceremonial pot filled with water (pūrṇa-kumbha) is placed on the southern side of the flag. The deity of the flag is invoked in it. Śānti-homa is performed and adhivāsas are offered. The following morning begins with the ceremonial sprinkling (samprokṣaṇa) of flag, which is then set up.

The ritual of sprout-offering (ankurārpaṇa) is also an important procedure, conducted at the beginning of the utsava. On the morning (pūrvāhna) of the day fixed for the beginning of the festival, the processional image (utsava-bera) is given a ceremonial bath (snapana); and in an elaborate ceremony earth is collected form river-beds, mountains and gardens (mrt-sangrahaṇa), and carried on the heads of priest in a colourful procession round the village (grāma-pradakṣiṇā). In front of the deity, a maṇḍala (with coding, flour, powders etc.) of sixty-four cells is drawn, and tastefully decorated

Earthern platters (śarāvas) containing several kinds of grains like rice (vrīhi) kidney-bean (mudga), gingelly (tila), millet (śyāmāka), tail-pepper (priyangu), black-gram (māṣa), dolichos unfurls (kulattha), mustard (sarṣapa), cassia taro (śimba) and nispāva are laid out. The grains are washed in milk and duly worshipped. Then leathern containers called pālikas are filled with mud and the grain seeds are sown in them reciting Vedic hymns. The pālikas are then covered with fresh cloth. The evil spirits in the eight directions are offered food (krūra-bali). The ankura- āropaṇa ritual is required in the texts to be conducted during nights, for the moon if said to be the lord of the plant-world (oṣadhīśa).

On the days of the festival it is usual for the processional deity to be carried round the village on

several richly and elaborately decorated 'vehicles' (vāhanas) and in a procession accompanied by music, dance, Vedic chanting and popular items of entertainment. This is a particularly noticeable during the major anual festival in the temple called Brahmotasva.

Even this utsava is said to be of five types: (1) brāhma (one-day) for increase of spiritual merit (brahma-tejo-vṛddhi), (2) śaiva (three-days) for destruction of obstacles (vighna-nasana), (3) aindra (five-days) for elimination of drought and famine (durbhikṣa-nāśārtha), (4) ārṣa (seven-days) for prosperity of the kingdom (rājya-vardhaka, lakṣmī-prīti-kara), and (5) daivika (nine-days) for protection and welfare of all people (sarva-rakṣā-kara, rājya-sukhāvaha).

There is also a classification of brahmotsava into three types: sāttvika (nine-days), rājasa (seven days) and tāmasa (five-days). While nine-day brahmotsava is common, there are brahmotsavas which extend upto fifteen days. On each of the days of brahmotsava, a vāhana-utsava is prescribed to be taken out. However, texts are not uniform in their prescriptions.

Parama-puruṣa-samhitā recommends brahmotsava of twelve and prescribes Hamsa and Ravi-maṇḍala as Vāhanas for the eleventh and twelth days. *Nārāyaṇa-samhitā* allows Meru-vāhana to be taken out on the eleventh day, (viz. the day after Rathotsava). Gāruḍa-samhitā speaks of brahmotsava which continues for fifteen days: it prescribes Aśva, Hamsa, Āndolikā, Kalpa-vrkṣa and Puṣpaka Vimana as to Vāhanas for the eleventh day onwards.

The most important event in brahmotsava is the ratha (Brahma- ratha); the deity if placed in an elabo-

rately, colorfully and richly decorated wooden chariot, drawn by crowds of people. This generally marks the conclusion of the festival, although some vāhanas (like Aśva, Hamsa and Śibikā) may be taken out on the subsequent days.

शिबिकान्दोलिकां वापि अनन्तं गरुडं तथा।
सिंहमश्वं हनूमन्तं वाराहं व्याघ्रवाहनम्॥
रथं महामेरुमहायानं ध्वजारोहण उत्सवे।
ऋक्षकं समारूढं वाहनानां प्रकीर्तितम्।
एवं सप्तदशं प्रोक्तं वाहनेषु यथाक्रमम्॥

(*Nārāyaṇa- samhitā*, 40)

The above account refers to the prescriptions of Vāhanas in Vaiṣṇava texts. The Śaiva temples have most of these vāhanas, but have other vahanas like Vṛṣabha, Kailāsa, Bhūta and Rāvaṇa.

	Days									
Text	1	2	3	4	5	6	7	8	9	10
1. Parama-puruṣa-samhitā	Śibikā	–	Candra-prabhā	Śimha	Śesha	Hanū-mat	Garuḍa	Gaja	Ratha	
2. Gāruda-samhitā	Puṣpa pīṭha	Ravi-maṇḍala	Indu-prabhā	Simha	Śeṣa	Mayūra	Hanū-mat	Garudā	Gaja	Ratha
3. Sanat-kumāra-samhitā	Śibikā	Hanū-mat	Simha	Śeṣa	Garuḍa	Gaja	Ratha	Aśva	Hamsa	Āndo-likā
4. Vasiṣtha-samhitā	Simha	Garuḍa	Syandana (Ratha)	Aśva	Hamsa	Āndo-likā				
5. Mārkaṇḍeya-samhitā	Hanū-mat	Śeṣa	Gaja	Garuḍa	Ratha	Aśva	Hamsa	Āndo-likā		
6. Nārāyaṇa-samhitā	Śibika	Āndo-likā	Ananta (Śeṣa)	Garuḍa	Simha	Aśva	Hanū-mat	Varāha	Vyā-ghra	Ratha

EXCERPTS FROM ISANA-SIVA-GURU-DEVA-PADDHATI (PATALA 49)

महोत्सवं त्रिभिर्मासै श्चतुर्भिः षड्भिरेव वा।
+ + + + + + + + + + + + + + रतिः ॥१॥

चैत्रादिकेषु मासेषु मासा + + सितपर्वसु।
उत्सवावभृथस्नानं सङ्कल्प्यास्मात् पुरैव तु ॥२॥

यात्रां प्रवर्तयेच्छम्भोर्गणेभ्यो विकिरेद् बलिम्।
कुर्याद् विशेषपूजां चाप्यष्टा + + + + + + ॥३॥

+ + + द्वादशाहं वा श्रेष्ठमध्याधमोत्सवे।
दिनैर्वा रुद्रनन्दर्षिसंख्यैः श्रेष्ठादिकोत्सवाः ॥४॥

उक्ताः पञ्चत्र्येकदिनैर्भवन्त्यल्पोत्सवास्त्रयः।
ध्वजारोपणपूर्वं तु कुर्या + + + + + + + + ॥५॥

न ध्वजरापोरणं शस्तं पञ्चाहादिष्विह त्रिषु।
उत्तमाद्युत्सवानां तु त्रिद्व्येकगुणवासरात्(?) ॥६॥

पूर्वमेव शुभे लग्ने ध्वजारोपणमाचरेत्।
तस्मिन्नेव दिने रात्रौ भेरीसंनादनं स्मृतम् ॥७॥

महोत्सवानां प्रत्येकमङ्कुरार्पणकत्रयम्।
ध्वजाङ्कुरः स्यात् प्रथमो द्वितीयश्चोत्सवाङ्कुरः ॥८॥

तृतीयोऽवभृथार्थः स्यात् सर्वे स्युः पूर्वमर्पिताः।
ध्वजदण्डतरुः पूगस्त्वक्सारः शाक एव वा ॥९॥

सालो वा चम्पकः शस्तो रक्तसारोऽसनस्तथा।
अकोटरो निर्व्रणः स्याद् ॠजुर्ग्रन्थ्यादिवर्जितः ॥१०॥

सवल्कलौ वेणुपूगावन्ये सर्वेऽप्यवल्कलाः।
मूलाग्रयोः समच्छेदाः साधुवृत्ता मनोरमाः ॥११॥

ध्वजदण्डस्य तुङ्गं तु विज्ञेयं द्वारतुङ्गतः।
पञ्चपञ्चगुणं श्रेष्ठं मध्यमत्यष्टिसंमितैः ॥१२॥

कनिष्ठं स्याद् दशगुणमथ स्तूपिसमोच्छ्रयः।
मुख्यं कण्ठमितं मध्यं नीचं वृषतलोच्छ्रितम् ॥१३॥

त्रिद्व्येकगुणकं वा स्याद् विमानादिति केचन।
चत्वारिंशच्च षट्त्रिंशत् त्रिशच्चैवाङ्गुलानि तु ॥१४॥

श्रेष्ठादिध्वजदण्डानां नाहाः स्युस्त्रिविधाः क्रमात्।
ध्वजदण्डसजातीयस्तूपदण्डतरुर्भवेत् ॥१५॥

ध्वजदण्डचतुर्थांशात् पञ्चांशाद् वा षडंशतः।
उपदण्डस्य तुङ्गं स्यात् तन्नाहो द्वादशाङ्गुलः ॥१६॥

विकारमनुसूर्यांशैरायताः सार्धविस्तृताः।
सच्छिद्राग्रास्त्रयस्कन्धाश्छिद्रप्रोतोपदण्डकाः ॥१७॥

प्रविष्टा ध्वजदण्डाग्रे युक्त्या कार्याः समान्तराः।
उपदण्डः केतुदण्डादग्रे तालाधिकायातः ॥१८॥

तस्याग्राधस्तलामात्रे(?) वलयस्त्वायसो भवेत्।
पताकबन्धनीरज्जुस्तदन्तः संविशेद् यथा ॥१९॥

कार्पासिकी यन्त्ररज्जुः स्थूला मध्यमया समा।
द्विगुणा ध्वजदण्डोच्चा क्षालिता सुविशोधिता ॥२०॥

ध्वजस्थानं वृषाग्रे वा बलिपीठाग्रतोऽपि वा।
कुर्यात् तु मध्यहारायां मर्यादामध्यमेऽथवा ॥२१॥

द्वारतुङ्गाद् रविगुणं पुरोद्वाराद् विहाय तु।
क्रमेण नाभिकट्यूरुदघ्ने गर्ते विलेपिते ॥२२॥

हेमकूर्मं निधायेष्टा सुलग्नादो दिवैव तु।
ध्वजदण्डं समुच्छ्रित्य दर्भमालाद्यलङ्कृतम् ॥२३॥

शङ्खतूर्यादिनिर्घोषैः स्थापयेयुर्मुदान्विताः।
तन्मूलवेदिकां कुर्याद् द्व्येकहस्ततोच्छ्रयाम् ॥२४॥

द्वारोच्चत्र्यंशतो द्व्यंशव्यासामेकांशमुन्नताम्।
क्रमाच्छिलेष्टकामृद्भिः श्रेष्ठाद्या वेदिकाः स्मृताः ॥२५॥

पताकायास्तथायामो नन्दाष्टमुनिकिष्कुभिः।
तत्पञ्चांशेन तद्व्यासो व्यासार्धाच्छिखरं भवेत् ॥२६॥

पुच्छत्रयं द्वयं वा स्याद् व्यासाद् दीर्घं क्रमात् कृशम्।
स्वायामपञ्चभागैकभागानमध्ये वृषं लिखेत् ॥२७॥

शुक्लो वृषो रक्तखुरो रक्तश्रवणशृङ्गवान्।
सितासितविशालाक्षः सुग्रीवः सुमुखाकृतिः ॥२८॥

सुवालधिः सुपादोरुः पीनोत्तुङ्गककुद् भवेत्।
शयितो वा स्थितो वा स्याद् यथोक्तवृषलक्षणः ॥२९॥

ध्वजोच्छ्रयात् पूर्वदिने पूर्वरात्रेऽधिवासनम्।
कुर्याद् विशेषपूजां च शिवाय वृषभाय च ॥३०॥

वृषभाय तु मुद्गान्नं निवेद्याभिप्रणम्य च।
वृषाग्रे स्थण्डिलं कृत्वा शालिभिस्तण्डुलैरपि ॥३१॥

तस्मिन् नवपदं कृत्वा कलशान् नव विन्यसेत्।
आपूर्य शुद्धसलिलैः कूर्चहेमाम्बरान्वितम् ॥३२॥

अलङ्कृत्य वृषं मध्ये परितोऽष्टौ च दिक्पतीन्।
आवाह्य सम्यग् गन्धाद्यैरभिपूज्य यथाविधि ॥३३॥

तारादिवृषमन्त्रेण स्वगायत्र्या वृषं यजेत्।

ओं वृषभाय नमः। ओं महाबलाय नमः। ओं हरवाहनाय नमः। ओं सौरभेयाय नमः। ओं तीक्ष्णशृङ्गाय विद्महे वेदपादाय धीमहि। तन्नो वृषभः प्रचोदयात्।

स्वैर्मन्त्रैरष्टलोकेशांस्तदग्रे स्थण्डिले पुनः ॥३४॥

पताकां विन्यसेत् तस्मिन् वृषमन्त्रेण तां यजेत्।
तस्माद्धस्तद्वये कृत्वा मण्डलं चतुरश्रकम् ॥३५॥

तत्राग्निं सम्यगाधाय कृत्वा कर्म शिवानले।
पलाशसमिधो हुत्वा वृषमन्त्रेण देशिकः ॥३६॥

तिलानाज्यं चरुं चापि पृथगष्टोत्तरं शतम्।
पूर्णां स्विष्टकृतं चापि हुत्वा वह्निं विसर्जयेत् ॥३७॥

सुव्युष्टायां रजन्यां तु कृतनित्यक्रियो गुरुः।
पूर्वाह्णे वाथ मध्याह्ने पूर्वरात्रे सुलग्नके ॥३८॥

शुश्रूषुभिर्द्विजैः शुद्धैः सोष्णीषैः सोत्तरीयकैः।
ध्वजमुद्धृत्य यन्त्रेण वाहयेच्छिरसाथवा ॥३९॥

शङ्खभेर्यादिनिर्घोषैः कृत्वा ग्रामप्रदक्षिणम्।
अन्तः प्रविश्य निर्दिष्टे ध्वजस्थाने तु विन्यसेत् ॥४०॥

पुण्याहं वाचयित्वाथ तज्जलैः क्षालयेद् ध्वजम्।
दण्डस्य मूले मध्येऽग्रे वृषषण्मुखमारुतान् ॥४१॥

तत्तन्मत्रेण संपूज्य गीतावाद्यादिमङ्गलैः।
वृषकुम्भं समानीय ध्वजोपान्ते तु विन्यसेत् ॥४२॥

कुम्भस्थान् वृषमन्त्रांस्तु ध्वजे वृषहृदि न्यसेत्।
मङ्गलाङ्कुरदीपाद्यैरलङ्कृत्य यथाविधि ॥४३॥

रज्ज्वा पताकासङ्गिन्या गायत्र्या वृषभस्य तु।
ध्वजमारोपयेत् सम्यग् रज्ज्वा दण्डं च वेष्टयेत् ॥४४॥

लोकपालस्थितैः कुम्भैः ध्वजमूलेऽभिषेचयेत्।
तन्मूले ध्वजमाराध्य निवेद्यान्तं यथाविधि ॥४५॥

ओं

नमस्तेऽस्तु त्रिणेत्राय ध्वजाधिपतये नमः।
नमोऽस्तु नन्दिने तुभ्यमुत्सवस्य प्रसिद्धये ॥४६॥

अथ ध्वजस्य पुरतः स्थण्डिले शालितण्डुलैः।
विहिते विन्यसेद् भेरी वाससा समलङ्कृताम् ॥४७॥

रुद्रं दक्षिणतो भेर्या वामतस्तु जनार्दनम्।
मध्ये ब्रह्माणमाराध्य कोणदण्डे गुहं यजेत् ॥४८॥

तदग्रे स्थण्डिले पद्मं विलिख्य शुभकर्णिकम्।
तत्र शूलं प्रतिष्ठाप्य यथावदभिपूजयेत् ॥४९॥

ततस्त्रियम्बकाद्येन मन्त्रेण प्रथमं गुरुः।
कोणेन ताडयेद् भेरीमिदं विष्णवादिना ततः ॥५०॥

तृतीयं ब्रह्मजज्ञानमन्त्रेणैव तु ताडयेत्।
वाद्यकारं ततः स्नातं शुक्लवस्त्राद्यलङ्कृतम् ॥५१॥

आहूय वादयेत् तेन त्रिमार्गपरिवर्तनात्।
ततोऽन्नलिङ्गमुत्थाप्य शङ्खभेर्यादिनिःस्वनैः ॥५२॥

गीतनृत्तरवै श्चैव च्छत्रचामरमङ्गलैः।
ग्रामप्रदक्षिणं कुर्वन् ब्रह्मेन्द्रादीन् दिगी श्वारान् ॥५३॥

दिक्षु सन्धिषु संपूज्य मन्त्रैः लोकैर्निजैः स्तवैः।
आवाह्य चा + भिष्टूय शुद्धान्नेन बलिं क्षिपेत् ॥५४॥

भो भो ब्रह्मंस्त्वयेत्याद्यैः शिवाज्ञां श्रावयेदपि।
ततो देवालयं गत्वा ध्वजस्य पुरतः स्थितः ॥५५।

रुद्रादित्यान् वसून् सोममर्श्विनौ च मरुद्गणान्।
पितृनृषीं श्च गन्धर्वयक्षविद्याधरासुरान् ॥५६॥

नागकिन्नररक्षांसि पिशाचान् भूतनायकान्।
अब्धीनप्सरसः सिद्धान् नदीः शैलान् वनस्पतीन् ॥५७॥

आवाह्योत्सवसेवार्थं स्वैः स्वैस्तारादिनामभिः।
आगच्छन्त्विति च ब्रूयाच्छिवाज्ञां श्रावयेच्च तान् ॥५८॥

ओं

भो भो रुद्रगणाः स्वैः स्वैः परिबर्हैर्गणैः सह।
सेव्योऽयमुत्सवः शम्भोः सुसन्तुष्टैः शिवोज्ञया ॥५९॥

ओं

इत्यादिभिस्तु देवादीञ्छ्रावयेत् स्वस्वनामभिः।
रात्रौ बलिं च विकिरेच्छङ्खभेर्यादिनिःस्वनैः ॥६०॥

समालिप्य प्रतिदिनं निवेद्यान्तं यजेद् ध्वजम्।

ध्वजोच्छ्रयाधिकारः।

* * *

अथोत्सवदिने प्राप्ते वीथीस्तु परिशोधयेत् ॥६१॥

शिवालयग्रामपुरपत्तनादिषु सर्वतः।

अत्र मञ्जर्याम्–

"संमार्ज्य ग्रामवीथीः प्रतिदिशमभितः सेचयेद् गन्धतोयै-
रुत्फुल्लैर्दिव्यगन्धैः प्रतिनवकुसुमैः संस्तरेत् तासु भूयः।
कुर्यात् पीठान् यथाशास्वपि बलिविधये ग्रामपर्यन्तदेशे
ग्रामान्त श्चत्वरेषु प्रतिसुरनिलयं द्वारि चैत्येषु मूले॥"
द्वारगोपुरवप्रान्तर्वीथीष्वपि च सर्वतः ॥६२॥

नालिकेरेक्षुकदलीपूगान् पुष्पद्रुमानपि।
प्रागेवारोपयेन्नोचेत् तद्दिनेषूपपत्तितः ॥६३॥

समूलकदलीपूगैरम्लायद्भिर्विभूषयेत्।
तोरणै श्च ध्वजै श्चत्रैः पुष्पमालावलम्बितैः ॥६४॥

दीपप्रसादवृक्षाद्यैर्यथास्थानं निवेशितैः।
डोलावितानयन्त्राद्यैरलङ्कृत्य यथाविधि ॥६५॥

उत्सवाहस्सु कुर्वीत शम्भोर्नैमित्तिकार्चनम्।
यथाविभवसारं तु वित्तशाठ्यविवर्जितः ॥६६॥

पञ्चामृतै श्च विधिवत् पञ्चगव्येन चाम्भसा।
गन्धोदकेन शीतेन चाभिषिञ्चेनमहे श्वरम् ॥६७॥

सशङ्खभेरितिमिलापणवानकवेणुषु।
नदत्सु पिष्टदीपाद्यैर्नीराज्यं तु यथाविधि ॥६८॥

ब्रह्मभिः पावमानीभिः कद्रुद्रायादिना तथा।
रुद्रश्रीपौरुषैः सूक्तैः स्नापयित्वा यथाक्रमम् ॥६९॥

सुसूक्ष्मैर्वसनैः शुक्लैर्नानावर्णैर्दुकूलकैः।
चन्दनागरुतकर्पूर श्लक्ष्णपिष्टैः सकुङ्कुमैः। ॥७०॥

लिङ्गपीठं समालिप्य सुवर्णकुसुमादिभिः।
मुक्तपुष्पै श्च मालाभिर्हेमपट्टै श्च भूषणैः ॥७१॥

अलङ्कृत्यालयं चापि चित्रैः कुसुममण्डपम्।
चन्दनागरुकर्पूरपुष्पधूपै श्च पूरयेत् ॥७२॥

सकर्पूरदशैर्दीपैः सुगन्धस्नेहपूरितैः।
आलयान्तर्बहि श्चापि निवेद्यान्तं यजेच्छिवम् ॥७३॥

चतुस्त्रिद्विगुणं नित्यनिवेद्यात् प्रतिवासरम्।
श्रेष्ठादिकं यथाशक्ति नैवेद्यं विनिवेदयेत् ॥७४॥

उपचारोक्तमार्गेण ससूपं सोपदंशकम्।
सापूपलड्डुकफलं तदन्नं षड्विधं शुचि ॥७५॥

पायसं कृसरं प्रातर्मध्याह्ने सगुलौदनम्।
शुद्धान्नं त्वथ दध्यन्नं सहरिद्रं निशामुखे ॥७६॥

मुद्गौदनं त्वर्धरात्रे सर्वं मधुघृतोत्तरम्।
अथवा सर्वसन्ध्यासु पायसादीन्यनुक्रमात् ॥७७॥

ईशानादिषु वक्त्रेषु दद्याच्छुद्धौदनं पुनः।
निशासु यन्त्रलिङ्गाद्यैः पत्रच्छेदादिभिस्तथा ॥७८॥

इन्धादिभिर्विचित्राभिः प्रेक्षार्हाभिर्यजेच्छिवम्।
पूर्वमध्यापराह्णेषु यात्रा रात्रौ च शस्यते ॥७९॥

श्रेष्ठोत्सवे चतुष्कालं त्रिद्विकालं तथान्ययोः।
रथेन रङ्गेन तथा शिबिकाभि श्च वै क्रमात् ॥८०॥

श्रेष्ठादिकासु यात्रा स्यात् सर्वैर्यानैस्तु संभवे।
अलङ्कृते समाच्छन्ने हेमपट्टाम्बरादिभिः ॥८१॥

सुवर्णरत्नमालाभिः पताकाभि श्च शोभिते।
आस्तीर्णे चित्रवसनैः कुसुमोत्करमण्डिते ॥८२॥

याने हैमादिकं देवं श्रेष्ठादिक्रमयोगतः।
आरोप्य तस्मिन् सुदृढं विदध्यात् पीठरक्षणम् ॥८३॥

अत्र संहिताटीकायाम्

"नित्योत्सवादियात्रासु हैमाद्या प्रतिमोचिता।
चन्द्रशेखरमूर्तिः स्यात् सा च नित्यं सुपूजिता॥"

इति।

अथवा द्व्यष्टमूर्त्तीनां मूर्तिं भिक्षाटनीं विना।
विनैवोमार्धहर्यर्धे कङ्कालं च विनैव तु ॥८४॥

या मूर्त्तयो द्वादशोक्तास्ताभिर्वा स्यान्महोत्सवः।
मूर्त्तिं सम्यगलङ्कृत्य स्रगम्बरविभूषणैः ॥८५॥

आवाहितशिवामिष्ट्वा गन्धाद्यैर्भक्तिनम्रधीः।
यात्रां प्रवर्तयेद् वाद्यगीतनृत्तादिमङ्गलैः ॥८६॥

अत्र मञ्जर्याम्–

''भेरीवृषेभव्यजनानि सिंहकुम्भौ पताका श्च तथैव दीपाः।
एतानि संगृह्य सुलोहक्लृप्तान्यष्टौ प्रयायादथ मङ्गलानि॥''

अथ वेदविदो विप्राः स्वक्षितसूक्तादिपाठकाः।
आशिषो वाचयित्वाऽग्रे पठेयुः स्वस्तये स्तुतिम् ॥८७॥

स्वस्तयेऽस्तु सदा विष्णुः स्वस्तयेऽस्तु चतुर्मुखः।
स्वस्तयेऽस्तु सदा रुद्रः स्वस्तयेऽस्तु शतक्रतुः ॥८८॥

स्वस्तयेऽस्तु सदा वह्निः स्वस्तयेऽस्तु यमस्त्विह।
स्वस्तये निर्ऋति श्चास्तु स्वस्तये वरुणस्त्विह ॥८९॥

स्वतस्तयेऽस्तु सदा वायुः स्वस्तयेऽस्तु धने श्वरः।
स्वस्तयेऽस्तु सदेशानः स्वस्तयेऽस्तु मरुद्ग णः ॥९०॥

स्वस्तये सन्तु वसवो रुद्राः स्युः स्वस्तये तथा।
आदित्याः स्वस्तये सन्तु स्वस्तये सन्तु किन्नराः ॥९१॥

स्वस्तये सन्तु नागा श्च स्वस्तये सन्तु पन्नगाः।
स्वस्तये सन्तु विद्येशाः स्वस्तयेऽप्सरसस्त्विह ॥९२॥

स्वस्तये सन्तु नद्य श्च गन्धर्वाः सरितस्तथा।
सागराः स्वस्तये सन्तु शैला श्च स्वस्तये तथा ॥९३॥

स्वस्तये मारतः सन्तु पितरः स्वस्तये सदा।
देव पारिषदाः सर्वे स्वस्तये सन्तु नः सदा ॥९४॥

स्वस्ति राज्ञे प्रजाभ्य श्च स्वस्ति राष्ट्राय सर्वदा।
स्वस्ति गोब्राह्मणेभ्योऽस्तु वैश्येभ्यः स्वस्ति वर्धताम् ॥९५॥

स्त्रीशूद्रेभ्योऽपि च स्वस्ति भूतेभ्यः स्वस्ति वर्धताम्।
स्वस्त्यस्तु जङ्गमेभ्य श्च स्थावरेभ्यस्तथैव च ॥९६॥

स्वस्ति चास्तु च मन्त्रेभ्यः कर्मणे स्वस्ति वर्धताम्।
स्वस्त्यस्तु सर्वदेवेभ्यः पितृभ्यः स्वस्ति सर्वदा ॥९७॥

ॠषिभ्यः स्वस्ति भवतु भौमेभ्यः स्वस्ति वर्धताम्।
स्वस्ति पातालवासिभ्यो दिव्येभ्यः स्वस्ति सर्वदा ॥९८॥

स्वस्त्यस्तु चान्तरिक्षेभ्यः सर्वभ्यः स्वस्ति वर्धताम्।
उत्सवेऽस्मिन् महेशस्य बलिभिः स्वस्ति वर्धताम्। ॥९९॥

अथ द्वारपलोकेशवृषभाणां यथाक्रमम्।
विघ्नस्य वीरभद्रस्य मातृणां शास्तुरेव च ॥१००॥

षणमुखस्य च दुर्गायाः कुबेरहरिणाङ्कयोः।
चण्डक्षेत्रेशयो श्चापि तीक्ष्णनेत्रमृगास्ययोः ॥१०१॥

बहिर्मध्यमहारायां नन्दीशप्रभृति क्रमात्।
गणे श्वराणां पीठस्थभूतेशानां तथैव च ॥१०२॥

दिक्षु विंशतिसंख्यानां गणेशानां पृथक् पृथक्।
बलिमन्त्रास्तु लिख्यन्ते तेषामेवेह तुष्टये ॥१०३॥

ओं स्फुर स्फोटय हूं त्रिणेत्राय स्वाहा। ओं ह्रीं प्रों कपालिन् हं नमः।

ओं

नमस्ते द्वारि युक्ताय शूलहस्ताय धीमते।
दृष्ट्या निहतदैत्याय महाकालाय नमो नमः ॥१०४॥

ओं

नमस्ते द्वारियुक्ताय परशुव्यग्रपाणये।
दृष्ट्या निहतदैत्याय महाकालाय ते नमः ॥१०५॥

आभ्यां नन्दिमहाकालावुपतिष्ठेत। ओं भीं भृङ्गीशाय मनः। ओं गं गणपतये नमः।

ओं

नमस्ते द्वारियुक्ताय भृङ्गीशाय कृशात्मने।
दृष्ट्या निहतदैत्याय शाङ्कराय नमो नमः ॥१०६॥

ओं

नमस्ते द्वारियुक्ताय गजवक्त्राय खात्मने।
दृष्ट्या निहतदैत्याय शाङ्कराय नामे नमः ॥१०७॥

आभ्यां भृङ्गीशविनायकावपतिष्ठेत। एवं सर्वत्राप्युपस्थानमन्त्रैरुपतिष्ठेत। ओं वृं वृषभाय नमः। ओं सुं सुब्रह्मण्याय नमः।

ओं

नमस्ते द्वारियुक्ताय धर्माय वृषभात्मने।
दृष्ट्या निहतदैत्याय सौरभेयाय ते नमः ॥१०८॥

ओं

नमस्ते द्वारियुक्ताय षण्मुखाय शिवात्मने।
दृष्ट्या निहतदैत्याय शाङ्कराय नमो नमः ॥१०९॥

ओं दुं दुर्गायै नमः। ओं धुं चण्डे श्वराय नमः।

ओं

नमस्ते द्वारियुक्तायै दुर्गायै शङ्करालये।
दृष्ट्या निहतदैत्यायै तुभ्यं देव्यै नमो नमः ॥११०॥

ओं

नमस्ते द्वारियुक्ताय चण्डेशाय महात्मने।
दृष्ट्या निहतदैत्याय शाङ्कराय नमो नमः ॥१११॥

इन्द्राय सुराधिपतये सायुधवाहनपरिवाराय रुद्रपार्षदे नमः। तत्पार्षदेभ्यो नमः।

ओं

दैत्यदर्पविनाशाय सहस्त्राक्षाय धीमते।
कुलिशव्यग्रहस्ताय नमस्तेऽस्तु शतक्रतो ॥११२॥

ओं मनो भूतेभ्योऽरिष्टकृद्भ्यः सद्भ्योऽसद्भ्यः सर्वगणेभ्यो नमोनमः स्वाहा। ओं पूर्वस्यां दिशि शिवस्य भगवतो ये गणा वज्रपाणयः श्वेताः श्वेताक्षाः श्वेतलोहिताः दिव्यान्तरिक्षभौमा श्च पातालनिवासिन श्च तेभ्यस्ताभ्यो नमोनमः स्वाहा। ओं ये भूताः पुरःसदो निशाचरा रौद्राः सदसन्तो विरुपा वि श्वरूपा महारूपा घोररूपा मृगास्या विहगाननाः पुष्टिकृतोऽपुष्टिकृतः कामदा बलिमिच्छन्ति तेषां बलिं हरामि। महद्भ्यो रुद्रकेभ्यः सर्वेभ्यस्तेभ्यो नमोनमः स्वाहा।

ओं अग्नये तेजोधिपतये सायुधवाहनपरिवाराय रुद्रपार्षदे नमः।

ओं

मुखं यः सर्वदेवानां येन हव्यं च नीयते।
येन प्रवर्तते सर्वं समस्तस्मै हविर्भुजे ॥११३॥

ओं आग्नेय्यां दिशि शिवस्य भगवतो ये गणाः शक्तिपाणयो रक्ता रक्ताक्षा रक्तलोहिता दिव्यान्तरिक्षभौमाः पातालतलवासिनस्तेभ्यस्ताभ्यो नमो नमः स्वाहा।

ओं यमाय प्रेताधिपतये सायुधवाहनाय रुद्रपार्षदे नमः। तत्पार्षदेभ्यो नमः।

ओं

येन संह्रियते सर्वं येन सर्वं च रक्ष्यते।
यस्माद् बिभेति लोकोऽयं प्रेतनाथ! नमोऽस्तु ते ॥११४॥

ओं नमो भूतेभ्योऽरिष्टकृद्भ्य इत्यादिना च।

ओं याम्यां दिशि शिवस्य भगवतो ये गण दण्डपाणयः कृष्णा कृष्णाक्षा श्च कृष्णलोहिता दिव्यान्तरिक्षभौमाः पातालनिवासिनस्तेभ्यस्ताभ्यो नमो नमः स्वाहा। ये भूता दक्षिणसद इत्यादिना च।

ओं निर्ऋतये रक्षोधिपतये सायुधवाहनपरिवाराय रुद्रपार्षदे नमः। तत्पार्षदेभ्यो नमः।

ओं

रक्षसां यातुधानानां पिशाचानां च यः पतिः।
तस्मै निर्ऋतये नित्यं रक्षसां पतये नमः ॥११५॥

ओं नमो भूतेभ्योऽरिष्टकृद्भ्य इत्यादिना च।

ओं नैर्ऋत्यां दिशि शिवस्य भगवतो ये गणाः खड्गहस्ताः श्यामाः श्यामाक्षाः श्यामलोहिता दिव्यान्तरिक्षभौमाः पातालनिवासिनस्तेभ्यस्ताभ्यो नमो नमः स्वाहा।

ओं वरुणाय जलाधिपतये सायुधवाहनपरिवाराय रुद्रपार्षदे नमः। तत्पार्षदेभ्यो नमः।

ओं

येन प्रसूयते सर्वं यस्मिन् सर्वं प्रलीयते।
वरुणाय जलेशाय पाशहस्ताय ते नमः ॥११६॥

ओं नमो भूतेभ्योऽरिष्टकृद्भ्य इत्यादिना च।

ओं वारुण्यां दिशि शिवस्य भगवतो ये गणाः पाशपाणयः शबलाः शबलाक्षाः शबललोहिताः दिव्यान्तरिक्षभौमाः पातालनिवासिनः तेभ्यस्ताभ्यो नमो नमः स्वाहा। ओं ये भूताः पश्चिमसदः इत्यादिना च।

ओं वायवे प्राणाधिपतये सायुधवाहनपरिवाराय रुद्रपार्षदे नमः। तत्पार्षदेभ्यो नमः।

ओं

आपूर्यन्ते प्रवर्तन्ते येन प्राणादिवायवः।
भूतानामिह सर्वेषां नमस्तस्मै नभस्वते ॥११७॥

ओं नमो भूतेभ्योऽरिष्टकृद्भ्य इत्यादिना च।

ओं वायव्यां दिशि शिवस्य भगवतो ये गणा अङ्कुशपाणयः पीताः पीताक्षाः पीतलोहिताः दिव्यान्तरिक्षभौमाः पातालनिवासिनस्तेभ्यस्ताभ्यो नमो नमः स्वाहा।

ओं कुबेराय यक्षाधिपतये सायुधवाहनपरिवाराय रुद्रपार्षदे नमः। तात्पार्षदेभ्यो नमः।

ओं

यत्प्रसादाज्जगत् सर्वं धनेन परिपूर्यते।
तस्मैं गुह्यकनाथाय धनेशाय नमोऽस्तु ते ॥११८॥

बों सोमाय नक्षत्राधिपतये सायुधवाहनपरिवाराय रुद्रपार्षदे नमः। तत्पार्षदेभ्यो नमः।

ओं

ज्योत्स्नापते! नमस्तुभ्यं नमस्ते ज्योतिषां पते।
नमस्ते रोहिणीकान्त! सुधाकुम्भ! नमोऽस्तु ते ॥११९॥

ओं नमो भूतेभ्योऽरिष्टकृद्भ्य इत्यादिना च।

ओं कौबेर्यां दिशि शिवस्य भगवतो ये गणा दण्डपाणयः सिताः सिताक्षाः सितलोहिताः दिव्यान्तरिक्षभौमाः पातालनिवासिन श्च तेभ्यस्ताभ्यो नमो नमः स्वाहा।

ओं ये भूता उत्तरसदः इत्यादिना च।

ओं ईशानाय विद्याधिपतये सायुधवाहनपरिवाराय रुद्रपार्षदे नमः। तात्पार्षदेभ्यो नमः।

ओं

नमस्त्रिशूलहस्ताय लोकसंरक्षणाय ते।
विद्यानां पतये तुभ्यमीशानाय नमो नमः ॥१२०॥

ओं नमो भूतोभ्योऽरिष्टकृद्भ्य इत्यादिना च।

ओं ऐशान्यां दिशि शिवस्य भगवतो ये गणाः शूलपाणयः

कपिलाः कपिलाक्षाः कपिललोहिता दिव्यान्तरिक्षभौमाः पातालनिवासिन श्च तेभ्यस्ताभ्यो नमो नमः स्वाहा।

ओं ब्रह्मणे सर्वलोकाधिपतये सायुधवाहनपरिवाराय रुद्रपार्षदे नमः। तत्पार्षदेभ्यो नमः।

ओं

ब्रह्मणे सर्वलोकानां पतये सृष्टिहेतवे।
यज्ञाध्यक्षाय विधये चतुर्वक्त्राय ते नमः ॥१२१॥

ओं तत्पुरुषाय विद्महे पितामहाय धीमहि तन्नो ब्रह्मा प्रचोदयात्।
ओं नमो भूतेभ्योऽरिष्टकृद्भ्य इत्यादिना च।

ओं ऊर्ध्वायां दिशि शिवस्य भगवतो ये गणाः पद्मपाणयः सूक्ष्माः सूक्ष्माक्षाः सूक्ष्मलोहिता दिव्यान्तरिक्षभौमाः पातालवासिनस्तेभ्यस्ताभ्यो नमो नमः स्वाहा।
ओं ये भूता अरिष्टदा इत्यादिना च।

ओं अनन्ताय पातालाधिपतये सायुधवाहनपरिवाराय रुद्रपार्षदे नमः। तत्पार्षदेभ्यो नमः।

ओं

नमः सहस्रशिरसे बिभ्रते शिरसा महीम्।
अधोलोकाधिपतये अनन्ताय नमोऽस्तु ते ॥१२२॥

ओं नमो भूतेभ्योऽरिष्टकृद्भ्य इत्यादिना च।
ओं अधस्ताद् दिशि शिवस्य भगवतो ये गणा श्चक्रपाणयो धूम्रा धूम्राक्षा धूम्रलोहिता दिव्यान्तरिक्षभौमाः पातालनिवासिनस्तेभ्यस्ताभ्यो नमो नमः स्वाहा।

ओं ये भूता अधस्सद इत्यादिना च।
ओं वृषभाय नमः। ओं हरवाहनाय नमः।

ओं महाबलाय नमः। ओं सौरभेयाय नमः।

ओं

वाहनाय नमः शम्भोः क्षुब्धार्णवघनस्वन।
वृषभाय नमस्तुभ्यमुत्सवस्येह वृद्धये ॥१२३॥

ओं वीं वीरभद्राय नमः। ओं वीरभद्राय विद्महे गणे श्वराय धीमहि। तन्नः शान्तः प्रचोदयात्। ओं गं गणपतये नमः।
ओं एकदंष्ट्राय विद्महे भवपुत्राय धीमहि। तन्नो दन्ती प्रचोदयात्।

ओं व्यों ब्रह्माण्यै नमः।
ओं ब्रह्मात्मिकायै विद्महे कुशहस्तायै धीमहि। तन्नो ब्रह्माणी प्रचोदयात्।

ओं मां माहे श्वर्यै नमः। ओं रुद्रात्मिकायै विद्महे शूलहस्तायै धीमहि तन्नो माहे श्वरी प्रचोदयात्।
ओं मां कौमार्यै नमः। ओं स्कन्दात्मिकायै विद्महे शक्तिहस्तायै धीमहि। तन्नः कौमारी प्रचोदयात्।

ओं हैं वैष्णव्यै नमः। ओं विष्णवात्मिकायै विद्महे चक्रहस्तायै धीमहि। तन्नो वैष्णवी प्रचोदयात्।
ओं हैं वाराह्यै नमः। ओं प्राजापत्यायै विद्महे गदाहस्तायै धीमहि। तन्नो वाराही प्रचोदयात्।

ओं हों इन्द्राण्यै नमः। ओं इन्द्रात्मिकायै विद्महे वज्रहस्तायै धीमहि। तन्न इन्द्राणी प्रचोदयात्।

ओं हौं महाकाल्यै नमः। ओं रुद्रात्मिकायै विद्महे शूलहस्तायै धीमहि। तन्न श्चामुण्डी प्रचोदयात्।

अथवा

''दीर्घस्वरैः क्रमाद् भिन्नः सान्तस्वाख्यादिभिः स्थितः।
बीजानीहाष्टमातृणां सप्तपक्षे तु सप्त वै॥''

इति स्वच्छन्दे।

ओं मातृभ्यो नमः। ओं सर्वलोकमातृभ्यो नमः। ओं सर्वलोकमातृगणेभ्यो नमः।

ओं नानारूपा मातरः प्रतिदिशं व्यवस्थिता दिव्यान्तरिक्षभौमाः पातालवासिन्यस्ता इहायान्तु शिवाज्ञया अस्माननुगृह्णन्तु (प्रतिगृह्णन्तु) पूजां सौत्म्यरूपधारिण्यस्ताभ्यो मातृभ्यो नमो नमः स्वाहा। ओं शां शास्त्रे नमः। ओं प्रशास्त्रे नमः ओं महाशास्त्रे नमः। ओं शां हुं कुमाराय नमः। ओं हस्त्य श्ववाहनाय नमः। ओं रुद्रपुत्राय नमः।

ओं भूतनाथाय विद्महे (भावपुत्राय) धीमहि। तन्नः शास्ता प्रचोदयात्। ओं प्रभायै नमः इति शास्तुर्वामतस्तद्देव्यै, ओं सत्यकाय नमः इति शास्तुर्दक्षिणतस्तत्पुत्राय।

ओं

शाम्बादीनां गणा ये तु कोटिकोटिगणाधिपाः।
भवन्तु सर्वे सम्प्रीतास्तेभ्यस्ताभ्यो नमो नमः ॥१२४॥

शास्तुः पं श्चमतोऽनेन शाम्बादिभ्यो बलिं हरेत्।
वचत्पदं तु तारादि नमोन्तं च भुवे पदम् ॥१२५॥

स्कन्दमन्त्रौ बलौ जप्ये होमः स्वाहान्त एव हि।

ओं कार्तिकेयाय नमः। ओं देवसेनायै नमः। इति तद्वामतो देव्यै। ओं षणमुखाय विद्महे महासेनाय धीमहि। तन्नः स्कन्दः प्रचोदयात्।

धनौ शराग्निस्वरगौ चण्डशब्दस्ततः परम् ॥१२६॥

तारादिहुंफडन्तोऽयं चण्डे श्वरमनुः स्मृतः।

ओं चण्डाय नमः। ओं चण्डे श्वराय नमः। ओं चण्डे श्वराय विद्महे महासेनाय धीमहि। तन्न श्चण्डः प्रचोदयात्। ओं क्षां क्षीं क्षूं क्षेत्रपालाय नमः। ओं वटुकनाथाय नमः। ओं

वि श्वक्षेत्राधिपतये वि श्वसिद्धिप्रदायिने ॥१२७॥

वि श्वरक्षणशीलाय क्षेत्रपालाय ते नमः।
ततोऽन्तर्गोपुरद्वारि तीक्ष्णनेवमगास्ययोः ॥१२८॥

ओं तीक्ष्णनेत्राय नमः। ओं मृगास्याय नमः।
निष्क्रम्य गोपुराद् बाह्ये बलिपीठस्य पूर्वतः।
स्थित्वा तु पार्षदान् सर्वाननेनैवानुमन्त्रयेत् ॥१२९॥

ओं

ये समस्तं जगद् व्याप्य तिष्ठन्ति बलिकाङ्क्षिणः।
ते रुद्रपार्षदाः सर्वे गृह्णन्तु बलिमुत्तमम् ॥१३०॥

इत्युक्त्वामन्त्र्य तु गणान् नन्द्यादिभ्यो बलिं हरेत्।
नन्दीशं च महाकालं भूतनाथं महीधरम् ॥१३१॥

पर्वतेशं गुहेशं च कालपाशं कपालिनम्।
इष्ट्वा तेभ्यो नमोन्तैः स्वैर्नामभिर्विकिरेद् बलिम् ॥१३२॥

अथ विंशतिसं (ख्यै ?ख्या)स्तु गणकोटीश्वराः पृथक्।
ते स्युः प्रतिदशिं तेभ्यो नामभिः स्वैर्बलिं हरेत् ॥१३३॥

तद् यथा

महाकालो विधाता च वज्रपाणिः क्रतुः प्रभुः।
दक्षः शतक्रतुतनुरप्रमेयोऽथ वीर्यवान् ॥१३४॥

नित्यो विद्युत्प्रभ श्चैव शूलहस्तस्त्रिलोचनः।
स्वाङ्गदीपस्तमोघ्न श्च सृष्टिकृच्चोरुविक्रमः ॥१३५॥

मन्धाता च महावीर्यो नित्ययोगः प्रसादनः।
इति प्राच्यां गणे श्वराः।
अग्निरग्निसमान श्च ज्वालामाली च वि श्वभुक् ॥१३६॥

हुताशो मूर्तिमान् व्यापी कपिलो रक्तलोचनः।
उग्रो रक्तवपुर्धूम्रः सप्तार्चिर्वि श्वभेषजम् ॥१३७॥

सुतपा वेगवां श्चाथ भस्मच्छन्नो मरुत्सखः।
योगप्रियो दारुक श्चेत्याग्रेय्यां कोटिनायकाः ॥१३८॥

यमो वैवस्वतो धाता दैत्यघाती प्रजान्तकः।
मृत्युः प्रेताधिपो धर्मः कृष्णः कृष्णाक्ष एव च ॥१३९॥

नित्ययोगी च काल श्चाप्याशुकारी परेतपः।
मायारूपी कृतान्त श्च सत्यासत्यप्रियः सुहृत् ॥१४०॥

पितृनाथ श्च कीनाश इति याम्यां तु विंशतिः।
राक्षस श्चासुरः क्रव्याद् वीरहा निर्ऋतिस्तथा ॥१४१॥

तीक्ष्णनेत्रो यातुधानो यज्ञहन्ता निशाचरः।
महामूर्तिः कैकसेयः क्रूरः क्रूरवपुस्तथा ॥१४२॥

रक्षः कोणपको धूम्रो धूम्राक्षो भीषणस्तथा।
विरूपाक्षोऽथ भस्माङ्गो नैर्ऋत्यामथ विंशतिः ॥१४३॥

वरुणः शबलोऽम्भोधिः प्रचेता निम्नगापतिः।
यादोनाथः पाशपाणिरानन्दोऽम्बुपतिः शिवः ॥१४४॥

कपर्दी प्राणदः श्वेतः श्यामनेत्रः सनातनः।
प्रत्यङ्निवासो जलदो जीवनो नक्रवाहनः ॥१४५॥

पयोधिनिलय श्चेति कोटीशानां तु विंशतिः।
वायुर्गन्धवहः सूक्ष्मः स्पर्शन श्च प्रभञ्जनः ॥१४६॥

प्राणोऽपानस्तथा व्यान उदान श्च समानकः।
नागः कूर्मोऽथ कृकरो देवदत्तो धनञ्जयः ॥१४७॥

ध्वजपणिण श्च पवनः श्वयनो मारुत्।
इति विंशतिकोटीशा वायव्यां तु गणे श्वराः ॥१४८॥

रेक्षेशो रयिमान् सोमो मणिभद्रोऽथ गुह्यकः।
चेलमाली कुबेर श्च जम्भलः शिबिकुण्डली ॥१४९॥

किं नरेश श्चैलिबिलिर्धनद श्च धनाधिपः।
राजराजस्तथा श्रीदो ज्येष्ठो मालाधरो धनी ॥१५०॥

उत्तराशानिवास श्च ततः स्यादेककुण्डलः।
एते विंशतिकोटीशाः कौवेरीं दिशमाश्रिताः ॥१५१॥

ईशान ई श्वरः शम्भुः शूलहस्तस्त्रिलोचनः।
अनादिनिधनो योगी कपिलः पिङ्गलोचनः ॥१५२॥

रुद्रो रौद्रगणाधीशो वि श्वभर्ता दिगम्बरः।
नीलग्रीवः कपर्दीशो वृषवाहो वृषध्वजः ॥१५३॥

हरः शर्वो वि श्वभुज इत्यैशान्यां तु विंशतिः।
महाबलो महानादो ब्रह्ममूर्ति श्चतुर्मुखः ॥१५४॥

सृष्टिकृद् विजयो धाता अघेराघोर एव च।
अघोरो लाङ्गली मन्युरङ्गारः शिखिभूषणः ॥१५४॥

जीमूतो मूर्तिभृत् कुण्डी मन्त्रीशस्त्रिपुरान्तकः।
ऊर्ध्वायां दिशि कोटीशा विंशतिः प्रमथे श्वराः ॥१५५॥

बुद्धिः प्रमर्दनः शुद्धः कालरूपोग्रदंष्ट्रिणौ।
दीर्घबाहुः प्रकाम श्च भर्ता हर्ता विचक्षणः ॥१५६॥

कालाग्नी रौरवोऽघोरो नरकः शर्व एव च।
नागसंज्ञ श्च घोर श्च किम्पुरुर्दनुजः क्षमी ॥१५७॥

कोटी श्वराणामित्युक्ता विंशतिः स्यादधो दिशि।

अत्र मञ्जर्याम्–

"एषां भृत्यगणाः शतं शतमथो तेषां पुन श्चैकशो
भृत्याः सनित सहस्रशोऽप्ययुतशस्तेषां च तेषामपि।
प्रत्येकं परिवारलक्षमुदितं तेषां तथा कोटयः
ख्याताः पारिषदाः पृथक्पृथगतो वक्तुं न शक्यास्तु ते॥"

इति।

तारादिभिर्नमोन्तैस्तु पृथगेषां तु नामभिः ॥१५८॥

क्रमात् सगन्धपुष्पाम्बुतत्तद्रात्रोचितान्नतः।
बलिं तु विकिरेद् दिक्षु भूतक्रूरेण वा निशि ॥१५९॥

सामान्यार्घ्याम्बुकूर्चेन दद्यादाद्यन्तयोर्बलेः।
बलिपीठं ततोऽभ्येत्य भूतिदादीन् यथाक्रमम् ॥१६०॥

अभ्यर्च्य विकिरेत् तेभ्यो बलिं नित्योत्सवे यथा।
विशेष श्चात्र तु स्नात्वा बलिदानादनन्तरम् ॥१६१॥

आचार्यः सहितः शिष्यैरन्तः प्राग्वत् प्रविश्य तु।
यानादेरवरोप्याथ देवं पीठे निधाय तु ॥१६२॥

यथापूर्वं समभ्यर्च्य स्वस्थानस्थं यजेत् पुनः।
अत्रोत्सवदिनानां तु विज्ञेया रात्रयः क्रमात् ॥१६३॥

यथा बलिभुजस्तासु पूज्यन्ते साधिपा गणाः।
ब्रह्मभूतेन्द्रगन्धर्वयक्षराक्षसरात्रयः ॥१६४॥

पिशाचरात्रं च ततः सप्तपक्षे यथाक्रमम्।
नवपक्षे विष्णुरात्रमष्टमं परिचक्षते ॥१६५॥

प्राजेशरात्रं नवमं तेषु तत्तद्बलिं क्षिपेत्।
सपुष्पकुशशुद्धान्नं ब्रह्मरात्रे बलिः स्मृतः ॥१६६॥

अन्नं दधिनिशाचूर्णलाजसक्तुजलान्वितम्।
भूतक्रूरमिति ख्यातं भूतरात्रे तु दापयेत् ॥१६७॥

इन्द्रवल्लीरसोनिमश्रमन्नं सक्तुपयोदधि।
इन्द्ररात्रे तृतीये तु बलिं दद्यात् तु देशिकः ॥१६८॥

वैणवान्नं पयोयुक्तं गान्धर्वे स्याच्चतुर्थके।
पञ्चमे यक्षरात्राख्ये पुष्पान्नाज्याम्बुभिर्बलिः ॥१६९॥

रक्तान्नं सतुषं मृत्स्नायुक्तं षष्ठे तु राक्षसे।
सप्तमे त्वथ पैशाचे माषान्नं कृसरं मधु ॥१७०॥

हारिद्रचूर्णतैलाढ्यं समाषं विकिरेद् बलिम्।
अष्टमे पायसं साज्यं विकिरेन्नवमे पुनः ॥१७१॥

साज्यक्षीरं तु कृसरं प्राजापत्ये बलिः स्मृतः।
अन्यथा केचिदाचार्याः प्राहुर्वै गणसप्तकम् ॥१७२॥

ते भूतपितृयक्षा श्च नागब्रह्मेशवैष्णवाः।
गणस्ते नवपक्षे तु स्कन्दमातृसमन्विताः ॥१७३॥

प्रथमे भूतरात्रे तु भूतक्रूरेण दापयेत्।
तिलैस्तण्डुलमिश्रैस्तु पितृरात्रे द्वितीयके ॥१७४॥

तृतीये नालिकेराम्भश्शाल्यन्नैर्यक्षरात्रके।
सक्षीरपिष्टसक्त्वद्भिर्नागरात्रे चतुर्थके ॥१७५॥

सप क्षान्नमाज्यं च ब्रह्मरात्रे तु पञ्चमे।
सापूपान्नेन साज्येन षष्ठे शैवे तु दापयेत् ॥१७६॥

गुलौदनेन साज्येन सप्तमे वैष्णवे बलिम्।
स्कन्दरात्रे गुलान्नं तु दध्यन्नं मातृरात्रके ॥१७७॥

साज्यं सनालिकेराम्बु द्राङ्निशाचूर्णतोऽरुणम्।
अतोऽधिकदिनैः श्रेष्ठाद्युत्सवेषु यथाक्रमम् ॥१७८॥

त्रिद्वयेकगुणयुक्त्या स्युरेते बलिभुजो गणाः।
शिवैरप्याढकैः प्रस्थैरेकविंशतिसंख्यया ॥१७९॥

श्रेष्ठो मध्यकनिष्ठ श्च क्रमाद् भूतबलिस्ततः।
शाल्याद्यन्यतमैः शुक्लैस्तण्डुलैः साधितं हविः ॥१८०॥

विशुद्धं बलियोग्यं स्यादन्यथा दोषमावहेत्।
विधौतदन्ताः स्युः स्नाता द्विजाः शुक्लाम्बरादिकाः ॥१८१।

साधयेयुर्बलेरन्नं वहेयु श्च सुयन्त्रिताः।
अथवा सर्वरात्रेषु साज्यं सकदलीफलम् ॥१८२॥

ससक्तुदधि सक्षीरमन्नं भूतबलेः स्मृतम्।
उक्तोत्सवदिनान्येवमतिवाह्य यथाविधि ॥१८३॥

पूर्वेद्युर्निश्यवभृथात् कुर्यात् कौतुकबन्धनम्।
पुण्याहं वाचयित्वेष्टा सुलग्ने गणनायकम् ॥१८४॥

उत्सवप्रतिमां चापि त्रिशूलं चाभिपूजयेत्।
पट्टसूत्रं नवगुणं सौवर्णं च समौक्तिकम् ॥१८५॥

तद् द्वादशाङ्गुलायाममक्षतेषु निधाय तु।
आराध्य गन्धपुष्पाद्यैर्भसितं चास्त्रमन्त्रतः ॥१८६॥

अभिमन्त्र्याथ बध्नीयाद्धस्ते देवस्य दक्षिणे।
त्रैय्यम्बकेन च हृदा शूलास्त्रस्य च कौतुकम् ॥१८७॥

साङ्गुष्ठानामिकाभ्यां तु कराभ्यां तत्र बन्धयेत्।
भाले रक्षां च निक्षिप्य नीराज्यारात्रिकेण तु ॥१८८॥

निशां सङ्गीतवाद्याद्यैर्जागरेणातिवाहयेत्।
प्रातः स्नात्वा यथापूर्वं नित्यपूजां समाप्य तु ॥१८९॥

उत्सवप्रतिमां बाह्यमण्डपे सन्निवेशयेत्।
त्रिशूलं विनिवेश्याग्रे तस्य प्राच्यां तु वोत्तरे ॥१९०॥

गोमयाद्भि श्चतुष्कोणमुपलिप्य तु मण्डलम्।
वितानच्छत्रकलशदीपदर्पणचामरैः ॥१९१॥

पालिकाभिस्तथा शङ्खैरलङ्कृत्य समन्ततः।
मुसलोलूखले धौते वाससा परिधाप्य तु ॥१९२॥

दर्भैराच्छाद्य सम्पूज्य चूर्णं तत्र तु साधयेत्।
स्नात्वा स्वलङ्कृताः कन्या गायन्त्यो मधुरस्वराः ॥१९३॥

तत्र मङ्लचूर्णं तत् साधयेयुर्हरिद्रया।
दध्यक्षताज्यदूर्वाग्रगन्धबीजाङ्कुराणि षट् ॥१९४॥

आरोपयेयुस्ताः कन्या मुसले चाप्युलूखले।
ततस्तत्साधितं चूर्णं हैमपात्रादिसंस्थितम् ॥१९४॥

हृदयेनाभिमन्त्र्याथ मङ्गलालम्भनानि षट्।
दध्यादीन्यथ देवस्य शिरस्यारोप्य मूलतः ॥१९६॥

गन्धतैलेन चाभ्यज्य यवमाषादिचूर्णकैः।
उद्वर्त्य देवमस्त्रं च परिमृज्याथ वाससा ॥१९७॥

तेन मङ्गलचूर्णेन हेमचूर्णयुतेन तु।
निर्मृज्य देवमस्त्रं च तच्छेषं भक्तमूर्धसु ॥१९८॥

निक्षिपेन्मङ्गलार्थं तु वि श्वकल्मषशोधनम्।

संस्नाप्य चाथ वसनेन च भूषणाद्यै-
र्गन्धादिभि श्च कुसुमैः परिभूष्य देवम्।
विद्याङ्गमूर्तिमनुभि श्च शिवाङ्गमूलौ
मूर्तौ शिवस्य सकलीकरणं विदध्यात् ॥१९९॥

अथात्र तीर्थयात्रार्थं स्थण्डिलेऽग्निं निधाय तु ॥२००॥

आवाह्य तु शिवं हुत्वा मन्त्रसंहितया घृतम्।
वक्त्रेण पक्वं पालाशीः समिधोऽथ घृतं चरुम् ॥२०१॥

प्रत्येकाष्टशतं हुत्वा कृष्णेनाष्टोत्तरं शतम्।
प्रायश्चित्तं तिलाज्याभ्यां मूलात् पूर्णाज्जुहोतु च ॥२०२॥

कनिक्रदत्प्रभृतिभिः षड्भिराज्यं जुहोतु च।
स्वस्तिसूक्तेन चैवाज्यं हुत्वा त्वथ जयादिभिः ॥२०३॥

ततस्स्विष्टकृतं हुत्वा विसृज्याग्निं हृदम्बुजे।
रथादौ देवमारोप्य तीर्थस्नानाय तु व्रजेत् ॥२०४॥

शङ्खभेर्यादिनिर्घोषैर्गीतनृत्तादिमङ्गलैः।
त्रिशूलास्त्रं पुरस्कृत्य स्नानोपकरणैः सह ॥२०५॥

उच्चावचध्वजच्छत्रचामरव्यजनादिभिः।
प्रदीपधूपकलशैर्विधृतै श्चाष्टमङ्गलैः ॥२०६॥

प्रादक्षिण्येनालयादेर्गच्छेदायोजनान्तरम्।
विशिष्टसिन्धुनद्यब्धितीर्थाद्यं प्रचुराम्बुमत् ॥२०७॥

व्रजेन्मध्यमया गत्या न द्रुतं न विलम्बितम्।
तत्र स्वस्तिस्तुतिं चोक्तां स्वस्तिसूक्तं च मङ्गलम् ॥२०८॥

तथा शकुनसूक्तं च चमकं च द्विजोत्तमाः।
पठेयुर्गीतवाद्यादौ जयशब्दे च मूर्च्छति ॥२०९॥

संप्राप्य तीर्थतीरं तत् प्रपातोरणमण्डितम्।
अलङ्कृतं वितानाद्यैः पीठे देवं निवेशयेत् ॥२१०॥

गन्धाद्यैरभिपूज्याथ तीर्थं तदभिमन्त्रयेत्।
इमं मे गङ्गे यमुने सरस्वतीत्यादिनापि च ॥२११॥

मन्त्रसंहितया वापि संपूज्य कुसुमादिभिः।
ततोऽस्त्रमथ देवं त्रिर्मज्जायित्वा शनैः शनैः ॥२१२॥

सह स्नातो गुरुः शिष्यैस्तटस्थं देवमर्चयेत्।
निवेद्यान्तमथाधाय स्थण्डिले शिवपावकम् ॥२१३॥

मूलेनाष्टशतं हुत्वा ब्रह्माङ्गैस्तद्दशांशतः।
पक्वं हुत्वाथ पूर्णां च तीर्थान्यावाह्य पूजयेत् ॥२१४॥

इमं मे गङ्गे यमुनेत्याद्ययाज्यं जुहोतु च।
जयादिकं स्विष्टकृतं हुत्वा तीर्थे जले श्वरम् ॥२१५॥

आबाह्येष्ट्वा तु तीर्थानि गङ्गादीन्यपि पूजयेत्।
पुण्याहं वाचयित्वाथ तीर्थे देवं प्रवेशयेत् ॥२१६॥

तार्थे निमज्जयेद् देवं तत्र पीठे निवेश्य तु।
गन्धामलकहारिद्रचन्दनागरुकुङ्कुमैः ॥२१७॥

क्रमादुद्वर्तयेत् तोयपुष्पधूपान्तरैः पृथक्।
शङ्खभेर्यादिनिर्घोषैर्वेदघोषै श्चतुर्दिशम् ॥२१८॥

तत्पीठस्थं तु नीत्वेशं कारयेच्चाघमर्षणम्।
हिरण्यशृङ्गमित्यादिसूक्तमान्ताज्जपेदपि ॥२१९॥

स्नान्ति ये ये तदा तस्मिंस्तीर्थे नार्योऽथवा नराः।
तिर्यञ्चो वापि ते सर्वे मुच्यन्ते सर्वकिल्बिषैः ॥२२०॥

विमुच्य कौतुकं त्यक्त्वा देवमुत्तारयेज्जलात्।
प्रपायां पीठगं देवमाभूष्य वसनादिभिः ॥२२१॥

गन्धाद्यैस्तु निवेद्यान्तमिष्ट्वा सङ्गीतमङ्गलैः।
अभिनन्द्य यथापूर्वं यानमारोपयेच्छनैः ॥२२२॥

गत्वा प्रासादमासाद्य परिणीय प्रदक्षिणम्।
मण्डपान्तर्निवेश्येशामिष्ट्वाथास्त्रं च पूजयेत् ॥२२३॥

उत्सवप्रतिमां चास्त्रं यथास्थानं निवेश्य तु।
मूललिङ्गगतं शम्भुं सविशेषं ततो यजेत् ॥२२४॥

दत्तवा चतुर्विधान्नाद्यं रात्रौ नित्यं समाप्य तु।
ध्वजं संपूज्य गन्धाद्यैर्ध्वजं तमवतारयेत् ॥२२५॥

प्रागुक्तवत् समाहूतान् गणान् देवादिकान् क्रमात्।
विसर्जयेत् स्वधामानि यथाजोषं भजन्त्विति ॥२२६॥

ततः पताकावृषभं स्वैर्मन्त्रैरभिपूज्य तु।
योजयेन्मूलवृषभे सविशेषं च तं यजेत् ॥२२७॥

महाभूतबलिं दत्वा गुरुर्मौनी जनैर्वृतः।
निःशब्दं निखिलातोद्यैर्विना दीपैर्व्रजेद् बहिः ॥२२८॥

सन्धिसंस्थांस्तु लोकेशान् ब्रह्मादीनभिपूज्य तु।
विसर्जयेच्च लोकेशान् ब्रह्मादीन् सन्धिगोचरान् ॥२२९॥

ततः स्नात्वा प्रविश्यान्तः क्षेत्रेशमभिपूजयेत्।

उत्सवावभृथाधिकारः।

* * *

अथ प्रातर्यथापूर्वं नित्यपूजां प्रकल्पयेत् ॥२३०॥

ततो विकिरविक्षेपकुम्भास्त्रभ्रमपूर्वकम्।
नवकादिसहस्रान्तैः कलशैरुपपत्तितः ॥२३१॥

स्नापयित्वा विशेषेण महापूजां प्रवर्तयेत्।
आचार्याय सशिष्याय हिरण्यवसनानि च ॥२३२॥

भूषणादीनि दत्वास्मै दत्वा देयानि शक्तितः।
लिङ्गिनः परिचारां श्च ब्राह्मणान् व्रतिनस्तथा ॥२३३॥

देवभृत्यांस्तथा दासीस्तथैव नटनर्तकान्।
भृत्यान् कर्मकरां श्चान्यान् दीनानाथांस्तथार्थिनः ॥२३४॥

अन्नाद्येन हिरण्येन वसनाद्यै श्च तोषयेत्।
ध्वजोच्छ्रयात् समारभ्य स्नपनान्तदिनेष्वपि ॥२३५॥

अर्थिभ्यो ब्राह्मणादिभ्यो लिङ्गिभ्योऽप्युपपत्तितः।
प्रदद्यादन्नपानादि सुव्यञ्जनरसोत्तरम् ॥२३६॥

एवं यः कारयेच्छम्भोरुत्सवं कुर्वते च ये।
ये वा पश्यन्ति ते सर्वे भवन्ति गणनायकाः ॥२३७॥

इत्थं शिवोत्सवविधिः कथितो ध्वजादिः
श्रेष्ठादिभेदविहितः स्नपनावसानः।
येनेन्दुमौलिरुपयाति परं प्रसादं
शैलाधिराजसुतया सहितो गणेन्द्रैः ॥२३८॥

इति श्रीमदीशानशिवगुरुदेवपद्धतौ सिद्धान्तसारे क्रियापादे
महोत्सवविधिपटल एकोनपञ्चाशः॥

EXCERPTS FROM NARADIYA-SAMHITA (CHAPTERS 18 AND 19)

गौतम :-

उत्सवस्य विधिं ब्रूहि ममेदानीं मुनी श्वर।
यत्कृत्वा साधकः सम्यक् प्रतिष्ठाफलम श्नुते ॥१॥

(उत्सवशब्दार्थप्रतिपादनम्)

नारद :-

सव इत्युच्यते यज्ञो विद्वद्भिः साधुसम्मतैः।
उद्ग तस्तु सवो यस्मात् तसमादुत्सव उच्यते ॥२॥

(त्रिविधोत्सवनामकीर्तनम्)

नित्यो नैमित्तिकः काम्यस्त्रिविध श्चोत्सवो मतः।

(नित्योत्सवस्य लक्षणम्)

वत्सरे वत्सरे यस्तु क्रियते स तु नित्यकः ॥३॥

(नैमित्त्किोत्सवलक्षणम्)

भूमिकम्पे दिशां दाहे महोत्पादेषु सत्सु च।
दुभिक्षे व्याधिते राष्ट्रे तथा वै शत्रुसंकटे ॥४॥

अनावृष्टौ च समये नक्षत्रपतने च खात्।
व्यत्यासे दिशि सूर्यस्य देवताहसने सति ॥५॥

रोदने चाङ्गचलने बिम्बे चलति चासनात्।
शान्त्यर्थं यत् प्रकुर्वीरन् स नैमित्तिक उच्यते ॥६॥

(काम्योत्सवस्य लक्षणम्)

फलेच्छया कृतो यस्तु कामिभिः काम्य उच्यते।

(एकैकोत्सवस्य त्रैविध्यकथनम्)

एकैकमुत्सवं विद्धि त्रिविधं द्विजपुङ्गव ॥७॥

ध्वजारोहणपूर्वस्तु देवताह्वनपूर्वकः।
अङ्कुरार्पणपूर्वस्तु विहितस्स्यान्महोत्सवः ॥८॥

(त्रिविधोत्सवानां फलवर्णनम्)

ध्वजारोहणपूर्वस्तु राजराज्यसुखप्रदः।
देवताह्वानपूर्वस्तु स्वर्गभोगफलप्रदः ॥९॥
अङ्कुरार्पणपूर्वस्तु सर्वेषां मोक्षदो भवेत्।

(एकैकमुत्सवस्य षड्विधत्वम्)

एकैकमुत्सवस्तद्वत् षड्विधः समुदाहृतः ॥१०॥

द्वादशाहो नवाह श्च सप्ताह श्च तथापरः।
पञ्चाहस्त्रियहो विप्र तथैकाहस्तु कीर्तितः ॥११॥

(महोत्सवारंभस्य तीर्थदिनस्य च कालनिर्देशः)

चैत्रदिषु च मासेषु श्रवणर्क्षे प्रशस्यते।
द्वादश्यां वा महाभाग पञ्चदश्यामथापि वा ॥१२॥

यजमानस्य जन्मर्क्षे ग्रहणे विषुवे तथा।

अयने वा मुनिश्रेष्ठ नवम्यां वापि कारयेत् ॥१३॥

नगरग्रामजन्मर्क्षे प्रतिष्ठादिवसे तथा।
प्रासादारंभनक्षत्रे राज्ञो जन्मदिनेऽपि वा ॥१४॥

एकस्मिन्नेषु सर्वेषु तीर्थयात्रा विधीयते।

(अध्वजोत्सवनिषेधः)

उत्सवं तत्र वक्ष्यामि ध्वजस्थापनपूर्वकम् ॥१५॥

अध्वज श्चोत्सवो यस्तु स न कार्यो हितैषिणा।

(उत्सवध्वजारोहणकालः)

विनैकाहोत्सवाच्चापि त्रिदिनात् पञ्चवासरात् ॥१६॥

तीर्थयात्रादिनादर्वागेकविंशतिमे दिने।
ध्वजस्यारोहणं कुर्यात् उत्सवार्थं प्रयत्नतः ॥१७॥

एकाहस्य त्रिरात्रस्य पञ्चाहस्य तथैव च।
सप्ताहस्य नवाहस्य द्वादशाहस्य सुव्रत ॥१८॥

दैविकैर्मानुषैर्विघ्नैः द्रव्याणां सङ्कटेन वा।
अतिक्रान्ते दिने चास्मिन् एकविंशतिमे दिने ॥१९॥

उत्सवारंभदिवसे ध्वजारोहणमाचरेत्।

(अङ्कुरार्पणकालः)

ध्वजस्यारोहणं कुर्याद्यस्मिन्नहनि साधकः ॥२०॥

तस्यार्वाक् सप्तमे वापि नवमे पञ्चमेऽपि वा।

अङ्कुरानर्पयित्वा तु यथाविधि समाहितः ॥२१॥

(ध्वजकल्पनप्रकारः)

ध्वजार्थं वस्त्रमाहृत्य क्रीतं वाभिनवं शुभम्।
प्रासादद्वारमात्रं वा मूलबिम्बसमं तु वा ॥२२॥

पञ्चहस्तायतं वापि चतुस्तालेन विस्तृतम्।
एकहस्तोन्नतशिरः तथा पादद्वयान्वितम् ॥२३॥

पताकायामविस्तारौ यथाशोभं यथारुचि।
ध्वजो गरुडमालिख्य द्विभुजं पक्षभूषितम् ॥२४॥

मूलबिम्बस्य नाभ्यन्तो बाह्वन्तो गरुडोच्छ्रयः।
तीक्ष्णदंष्ट्रं बृहत्कायं नीलकुञ्चितनासिकम् ॥२५॥

तप्तकाञ्चनसंकाशं नवतालक्रमान्वितम्।
वामपादं समाकुञ्च्य दक्षिण स्थाप्य भूतले ॥२६॥

कृताञ्जलिपुटं सौम्यम् ईषत्प्रहसिताननम्।
मुकुटादिविचित्राङ्ग नागराजविभूषितम् ॥२७॥

एवं कृत्वा ध्वजं प श्चात् आनयेद्यागमण्डपे।

(ध्वजगरुडाभिमोचनम्)

ध्वजारोहणनक्षत्रात् पूर्वेद्युर्निशि देशिकः ॥२८॥

विसृज्य शिल्पिनं प श्चात् संप्रोक्ष्य च यथाविधि।
दृष्टिमुद्घाट्य पक्षीशं 'तच्चक्षु'रिति कीर्तयन् ॥२९॥

(ध्वजगरुडाद्यधिवासक्रमः)

विमानाभिमुखे वापि दक्षिणे वान्यतोऽपि वा।
हस्तमात्रोन्नते पीठे शालितण्डुलनिर्मिते ॥३०॥

ध्वजं संस्थाप्य यत्नेन ब्राह्मणैः 'स्वस्ति'वाच्य च।
नवाम्बरधरः प श्चात् पुण्याहं वाचयेत्सुधीः ॥३१॥

नृत्तगीतशुभाख्यानैः वेदस्याध्ययनैरपि।
पुरस्तात्तोषयेत्ताक्ष्र्यं विन्यस्ताङ्गो जितेन्द्रयः ॥३२॥

तस्य दक्षिणपा र्श्वे तु तथा पीठं प्रकल्प्य च।
पूर्णं कुम्भं तु संस्थाप्य वस्त्रयुग्मविभूषितम् ॥३३॥

तस्मिन्नावाहयित्वा तु पक्षीशं पूजयेत्ततः।
तत्त्वैः संयोजयेत्खेशं सृष्टिसंहारवर्त्मना ॥३४॥

शान्तिहोमं ततः कुर्यात् नित्याग्नौ पूर्ववद् गुरुः।
सम्पाताज्येन संस्पृश्य संपूज्य च यथाविधि ॥३५॥

विनिवेद्य हविः प श्चात् दद्याद्वन्ध्यातुरादिषु।
ध्वजस्य पुच्छे बध्नीयात् कौतुकं तस्य विद्यया ॥३६॥

गरुडं शाययेत्प श्चात् शय्यायां दक्षिणामुखम्।
पताकां वैणवं दण्डं स्तम्भं चैवाधिवासयेत् ॥३७॥

एवं कृत्वाधिवासं तु रात्रौ जागरणान्वितः।

(ध्वजपीठस्थानम् तत्र स्तंभस्थापननिर्देश श्च)

प्रभातायां तु शर्वर्यां स्नात्वाचार्यस्तु साधकः ॥३८॥

नवाम्बरधरो भूत्वा भूषणैरपि भूषितः।
ध्वजपीठं समासाद्य तृतीयावरणे कृतम् ॥३९॥

द्वितीयावरणे वापि प्रथमावरणेऽपि वा।
देवस्याभिमुखं वृत्तं चतुरश्रमथापि वा ॥४०॥

संप्रोक्ष्य गन्धतोयेन स्पृष्ट्वा प्रसृतमुद्रया।
स्तंभं स्थापयेत्तत्र

(सफेणकस्य स्तंभस्य लक्षणं तस्य स्थापनञ्च)

तस्य लक्षणमुच्यते ॥४१॥

शततालं समायामं तदर्धार्धायतं तु वा।
आर्द्रमृजुं नवं स्निग्धं विवरस्फोटवर्जितम् ॥४२॥

सम्यक् परीक्षयित्वा तु शास्त्रदृष्ट्या द्विजोत्तम।
वैणवं नालिकेरं वा क्रमुकं तालमेव वा ॥४३॥

आयुग्मपर्वकं शुद्धं सत्वचं फेणकान्वितम्।
फेणकाः सप्तपञ्चोक्ताः त्रयो वा हस्तसम्मिताः ॥४४॥

तदर्धविस्तृता वापि चतुरङ्गुलविस्तृता।
तथा शोभान्विताः सम्यक् सारवन्तो बलीयसः ॥४५॥

स्तंभाग्रात् संव्यपोह्यैव द्वितालं तालमेव वा।
अधोधः फेणकाः सर्वे स्थापनीयाः सुनि श्चलाः ॥४६॥

एकैकस्यान्तरं प्रोक्तं तालं वा हस्तमेव वा।
एवं कृत्वा ततः स्तंभं क्षालयित्वा तु वारिभिः ॥४७॥

ब्राह्मणैः स्थापयेत्स्तंभं शूद्रैर्दासैस्तु पावनैः।
प्रासादाभिमुखं स्थाप्य वालुकाभिस्तु पूरयेत् ॥४८॥

एवं स्तंभं दृढं गर्ते नि श्चलं स्थाप्य यत्नतः।

(ध्वजारोहणप्रकारः)

ततः प्रविश्य पक्षीशं सम्पूज्यान्नं निवेद्य च ॥४९॥

होमं कृत्वा यथान्यायं 'गारुडेन' तु मन्त्रवित्।
वैणवीं यष्टिमादाय सुदृढामभिधाय ताम् ॥५०॥

सपताकध्वजं तत्र योजयित्वा विधानवित्।
अलङ्कारैरलङ्कृत्य गुरुं सम्पूज्य शक्तितः ॥५१॥

शङ्खदुन्दुभिनिर्घोषैः गेयनृत्तसमन्वितम्।
अङ्कुरैः धूतदीपै श्च ध्वजं सम्पूज्य साधकः ॥५२॥

चत्वारोऽभिनवैर्वस्त्रैः भूषणैरपि भूषिताः।
प्रासादं तु परिभ्रम्य सर्वेष्वावरणेष्वपि ॥५३॥

महाजनै श्च संयुक्तं ग्रामं चापि परिभ्रमेत्।
प्रविश्य देवभवनं सर्वमङ्गलसंयुतम् ॥५४॥

ध्वजपीठं समासाद्य प्रदक्षिणवशेन तु।
पुण्याहं वाचयित्वा तु वैष्णवैर्मन्त्रवित्तमैः ॥५५॥

दीक्षितं शूद्रमाहूय तस्य हस्तेऽर्पयेद् ध्वजम्।
आरुह्य बध्वा स्तंभाग्रे पाशैः सोऽपि प्रयत्नवान् ॥५६॥

अवरुह्य शनैः प श्चात् नमस्कुर्याच्च साधकान्।

(गरुडार्चनविधिः)

आदाय साधितं कुंभं वस्त्रपीठोपरिस्थितम् ॥५७॥

नववस्त्रधरानीतमाचार्यः स्वस्थमानसः।
पक्षीशं 'मूल' मन्त्रेण ध्वजं संप्रोक्षयेज्जलैः ॥५८॥

संपूज्य च यथान्यायं 'तार्क्ष्य' मन्त्रेण मन्त्रवित्।
'वाहनाय महाविष्णोः तार्क्ष्यायामिततेजसे ॥५९॥

गरुडाय नमस्तेऽस्तु सर्वसर्पेन्द्रमृत्यवे'।
अनेन 'मूल' मन्त्रेण पूजयेत्तन्त्रवित्तमः ॥६०॥

अङ्गानि परमन्त्राणां न्यस्तव्यानि न देशिकैः।

(स्तंभमूलस्थवेदिकायां परिवारार्चनक्रमः)

मेखलात्रयसंयुक्तां वेदिकां पद्मभूषिताम् ॥६१॥

स्तंभमूले शुभां कृत्वा परिवारांस्तु कल्पयेत्।
प्रथमावरणे स्थाप्यः शङ्खचक्रादयो द्विज ॥६२॥

द्वितीयावरणे स्थाप्याः लोकपालाः स्वदिक्षु वै।
तृतीयावरणे स्थाप्यः कुमुदाद्यास्तु भूतपाः ॥६३॥

एतान् सम्पूज्य विधिवत्

(गरुडं प्रति ज्ञापनक्रमः)

इमं मन्त्रमुदीरयेत्।
'नमोऽस्तु वैनतेयाय नमस्ते गरुडाय च ॥६४॥

पन्नगाश नमस्तेऽस्तु नमस्तेऽस्तु गणाधिप।
कल्याणार्थं हरेरत्र तिष्ठ नित्यं महाबल ॥६५॥

यावत्समाप्यते यागस्तावत्पक्षिगणे श्वर'।

एवं ध्वजं समारोप्य दिवैव गुरुरात्मवान् ॥६६॥

(कामनानुसारं ध्वजारोहणादिकालविवेकः)

दिवैवारोपयेद्देवं भुमिगानां तु वृद्धये।

अन्तरिक्षचराणां तु रात्रौ कुर्वीत वृद्धये ॥६७॥
तदा प्रभृति तत्रैव पूजयेद्विधिपूर्वकम्।

त्रिकालं वा द्विकालं वा एककालमथापि वा ॥६८॥

(ध्वजपतनादिप्रायश्चित्तनिर्देश)

परिभ्रमणाले तु धवजस्तु पतितो यदा।
वायुना वा प्रमादेन तमुद्धृत्य तदैव हि ॥६९॥

प्रोक्षयेत्तमभिन्न श्चेत् 'पञ्चोपनिषदै'र्जलैः।
'पुण्याहं' वाचयित्वा तु शेषकर्म समापयेत् ॥७०॥

भिन्न श्चेत्तं परित्यज्य सम्पाद्यान्यं तु पूर्ववत्।
संस्कृत्य पूर्ववत् प श्चात् शेषं कर्म समाचरेत् ॥७१॥

(ध्वजारोहणदिने देवपूजनक्रमः)

तस्मिन्नहनि देवेशं स्नापयेद्विधिपूर्वकम्।
महाहविर्निवेद्याथ ब्राह्मणानपि पूजयेत् ॥७२॥

(उत्सवे देवताह्वानविधिः 'भेरीतहनम्')

सम्प्राप्तायां निशायां तु देवावाहनमारभेत्।
ध्वजस्य दक्षिणे पूर्व कृत्वा गोमयमण्डलम् ॥७३॥

पिष्टचूर्णैरलङ्कृत्य धान्यपीठं प्रकल्पयेत्।
पटहं तत्र विन्यस्य वस्त्रेण परिवेष्टितम् ॥७४॥

कोणदक्षिणतः स्थाप्य पूजयित्वा यथाविधि।
ब्राह्मणाच्छूद्रकन्यायां जातः पारशवः स्मृतः ॥७५॥

तेनैव वादनं कुर्यात् ग्रामे वा नगरेऽपि वा।
घोषयित्वालयं तत्र प्रदक्षिणवशेन तु ॥७६॥

प श्चाद्ग्रामं परिभ्रम्य सवलिङ्कारसंयुतम्।
तथैव घोषयित्वा तु 'तारका'द्यमुदीरयन् ॥७७॥

दिक्षु सर्वासु कृत्वैवं प्रविशेदालयं शनैः।
एवं ग्रामं परिभ्रम्य प्रासादं संप्रविश्य तु ॥७८॥

गरुडस्थानमासाद्य घोषयित्वा खगध्वाजम्।
तालिकैः स्तुतिरवै श्च विष्वक्सेनं च तोषयेत् ॥७९॥

अनेन विधिना देवाः आहूताः स्युर्न संशयः।
उत्सवारं भदिवसे ध्वजस्यारोहणं यदि ॥८०॥

सहध्वजोत्सवेनैव देवतावाहनं स्मृतम्।
देवतावाहनं येऽत्र द्रष्टुकामाः समागताः ॥८१॥

तदा प्रभृति ते तस्मान्नगच्छेयुर्हितेप्सवः।
अज्ञानाद्यदि गच्छेयुः ते भविष्यन्ति रोगिणः ॥८२॥

रोगाद्विमुक्तिमिच्छन्तः पुनरागत्य देशिकम्।
पूजयित्वा नमस्कृत्य वैनतेयं च वैष्णवान् ॥८३॥

तीर्थयात्रां तु संसेव्य भविष्यन्ति हि नीरुजः।

(उत्सवे ग्रामाद्यलङ्करणकथनम्)

यदा वै देवताह्वानं तदा प्रभृति नित्यशः ॥८४॥

आलयं समलङ्कुर्यात् ग्रामस्यान्यतमं तु वा।
मार्जनं सर्ववीथीनां सक्तासक्तयथाविधि ॥८५॥

उत्थापयित्वा केतूं श्च तोरणानि च शक्तितः।
ग्रामद्वारेषु सर्वेषु क्रमुकैस्तोरणैस्तथा।

तथैव कदलीस्तंभैः केतुमालाविभूषितैः ॥८७॥
अलङ्कुर्यात् विशेषेण ग्राममध्यं विशेषतः।

(द्वादशाहाद्युत्सवे ध्वजारोहणदिनविवेकः)

द्वादसाहं नवाहं वा सप्ताहं वा महोत्सवम् ॥८८॥

प श्चाहं त्रयहं वापि तद्वदेकाहमेव वा।
यस्मिन् दिने तु विप्रेन्द्र ध्वजस्यारोहणं कृतम् ॥८९॥

द्वादशाहोत्सवारंभं तस्मात्तु दशमेऽहनि।
एवं त्रयोदशदिने नवाहोत्सवमारभेत् ॥९०॥

तद्वत्पञ्चदशाहे तु सप्ताहोत्सवमारभेत्।
तद्वत्सप्तदशाहे तु पञ्चाहोत्सवमारभेत् ॥९१॥

तथा नवदशाहे तु तत्र्यहोत्सवमारभेत्।
तथैकाहोत्सवारंभः एकविंशद्दिने द्विज ॥९२॥

एकविंशद्दिनादूर्ध्वम् उत्सवं न समारभेत्।

(अङ्कुरार्पकालनिर्देशः)

उत्सवारंभदिवसात् अर्वाग्वै पञ्चमेऽहनि ॥९३॥

कृत्वाङ्कुरार्पणं सम्यक् मृदाद्युत्सवकर्मणि।

(उत्सवे कौतुकबन्धनकालः)

उत्सवारंभदिवसात् पूर्वेद्युर्निशि कौतुकम् ॥९४॥

बध्वा तु साधकः सम्यक् आधूपकसमन्वितम्।
आरभेदुत्सवं प श्चात् स्त्रपनाद्यं महामुने ॥९५॥

नारद :-

अथातः संप्रवक्ष्यामि महोत्सवविधिं परम्।
कृत्वा यं साधकः श्रिप्रं कांक्षितं फलमाप्नुयात् ॥१॥

उत्सवार्थं तु विहितं बिम्बं यत्पूर्वलक्षणम्।
अथवा बलिबिम्बं वा कर्मबिम्बं तु वा द्विज ॥२॥

उत्सवारंभदिवसे पूर्वाह्ने मुनिसत्तम।
स्त्रपनं विधिवत्कृत्वा निवेद्य न महाहविः ॥३॥

अपराह्णे तु सम्प्राप्ते मृदाद्युत्सवमारभेत्।
शङ्खदुन्दुभिनिर्घोषैः नृत्तनीतसमन्वितैः ॥४॥

छत्रध्वजवितानै श्च मङ्गलाङ्कुरभाजनैः।
भक्तैः भगवतैः सार्घं यतिभिर्मुनिभिस्तथा ॥५॥

प्रसादं तु परिभ्रम्य पुण्योद्याने वनेऽपि वा।
मृत्तिकां सङ्ग्रहेच्छुद्धां 'क्षिति'मन्त्रेण साधकः ॥६॥

नद्यास्तु वालुका ग्राह्या करीषं गोकुलात्तथा।
वासमा वेष्टयित्वा तु शिरसा धारयेद्गुरुः ॥७॥

ग्रामं प्रदक्षिणं कृत्वा

(अङ्कुरार्थं पालिकान्यासक्रमः)

प्रविश्याथ हरेर्गृहम्।

देवस्य पुरतो वापि देशे वाभिमते शुभे ॥८॥

मण्डलं तु शुभं कृत्वा शकृता शुशुभेन तु।
पिष्टचूर्णैरलङ्कृत्य चतुरश्रं समन्ततः ॥९॥

कोष्ठकानां चतुः षष्टिं तथा कुर्याद्विचक्षणः।
मध्येऽष्टदिक्षु नवकं चतुः कोष्ठं प्रकल्पयेत् ॥१०॥

शालिभिः पीठकास्तत्र कार्याः पञ्चाङ्गुलोन्नताः।
एको द्वौ बहवो वापि विज्ञेयाः देशिकोत्तमाः ॥११॥

नवाम्बरधराः सर्वे सोत्तरीयाः अलङ्कृताः।
न्यसेद्वै पालिकास्तेषु दूर्वाकाण्डाद्यलङ्कृताः ॥१२॥

(पालिकोपादानद्रव्यनिर्देशः)

लोकजा पालिका कार्या मृण्मया वा सलक्षणा।

(पालिकायाः त्रिविधत्वम्)

पालिकास्त्रिविधाः प्रोक्ताः मङ्गलाङ्कुरकर्मणि ॥१३॥

पालिका घटिका चैव शरावा श्च त्रिभेदतः।

(पालिकालक्षणम्)

साङ्गुलं चैकहस्तं वै पालिकोच्छ्राय उच्यते ॥१४॥

पालिकावक्त्रविस्तारमुच्यते षोडशाङ्गुलम्।
उनमत्तकुसुमाकारं वक्त्रं पद्माकृतिर्भवेत् ॥१५॥

उत्सेधः पालिकायास्तु तदर्धं वा सविस्तरम्।

(घटिकालक्षणम्)

षोडसाङ्गुलमायामं घटिकायाः प्रकीर्तितम् ॥१६॥

घटिका पञ्चरक्त्रा स्यात्तदूर्ध्वं कलशाकृतौ।
उत्सेधस्तु तदर्धं वा

(शरावस्य लक्षणम्)

शरावस्याधुनोच्यते ॥१७॥

उत्सेध श्चोर्ध्वविसतारात् द्वादशाङ्गुलमुच्यते।
चतुरङ्गुलविस्तारमधस्तात्पीठसंयुतम् ॥१८।

(पालिकाधिदेवता)

पालिका वैष्णवी चान्या ब्राह्मी शैवं शरावकम्।
त्रिदैवतं तु विज्ञेयं यागेषु त्रितयं भवेत् ॥१९॥

(अङ्कुरार्थं पालिकादिसंख्या)

केवला वैष्णवी वापि पालिका षोडश द्विज।
पालिका षोडश प्रोक्ता घटिका षोडश द्विज ॥२०॥

शरावं द्वारशप्रोक्तं मङ्गलाङ्कुररोपणे।

(अङ्कुरबीजानि)

व्रीहिमुद्ग तिलाः श्यामाः शिम्बनिष्पावसर्षपाः ॥२१॥

प्रियङ्गुमाषकौलत्थाः बीजान्येतानि चोच्यते।

(अङ्कुरबीजावपक्रमः)

पयसा दश बीजानि क्षालयेद्'द्वादशा'त्मना ॥२२॥

दशभिर्नामधेयैस्तु चतुर्थ्यन्तैः पृथक् पृथक्।
पूजयित्वा तु गन्धाद्यैः वाससा परिवेष्ट्य च ॥२३॥

मृदाद्यै'र्मूल'मन्त्रेण पूरयेत्पालिकाः क्रमात्।
घृतारोपणपूर्वं तु तेन सम्पूजयेत्ततः ॥२४॥

'जितन्त' इति मन्त्रेण सर्वबीजानि वापयेत्।
'द्वादशाक्षर'मन्त्रेण सिञ्चेद्धारिद्रवारिणा ॥२५॥

परिवेष्ट्य ततो वस्त्रैः नवैस्तु सदर्शैश्शुभैः।

(भूतक्रूरबलिदानादिक्रमः)

भूतक्रूरबलिं दद्यात् अष्टदिक्षु यथाक्रमम् ॥२६॥

भूतानां कुमुदादीनां पूर्वादिक्रमयोगतः।
तदा प्रभृति ताः सर्वा रक्षन्ति कुमुदादयः ॥२७॥

एवं सर्वेषु यागेषु मङ्गलाङ्कुरमाचरेत्।
निष्पलाः सर्वयज्ञास्तु मङ्गलाङ्कुरवर्जिताः ॥२८॥

(अङ्कुरार्पणस्य रात्रौ कर्तव्यतायां कारणम्)

वृक्षाणामधिपः सोमो ओषधीशोऽमृतात्मकः।
सोमौषधिद्वयवलात् रात्रावेवाङ्कुरार्पणम् ॥२९॥

(गुप्त्यै अङ्कुराणां स्थापनादिकम्)

क्रमादुद्धृत्य ताः सर्वाः सुगुप्त्यै स्थापयेत्ततः।
पञ्चसप्तनवाहे वा कुर्यादेवं महोत्सवे ॥३०॥

एकद्वित्रिदशाहे तु (चतुर्थे) पञ्चमेऽपि वा।
तीर्थयात्रादिनादर्वाक् कारयेदङ्कुरार्पणम् ॥३१॥

विधिरद्यागसिद्धिः स्यात् मङ्गलाङ्कुरवर्धनात्।

(उत्सवारात्रबलिदैवतवर्णनम्)

दद्याद्दिने रजन्यां च प्रतिरात्रं बलिं पृथक ॥३२॥

प्रथमं सर्वभूतानां रात्रं प्रीतिकरं भवेत्।
भक्त्या गच्छन्ति ये देवं भवन्त्यघविवर्जिताः ॥३३॥

द्वितीयं पैत्रिकं रात्रं पितृणां प्रीतिवर्धनम्।
रात्रं तृतीयं यक्षाणां सर्वलोकेष्टसिद्धिदम् ॥३४॥

सर्वरक्षाकरं मन्त्रं नागानां तु चतुर्थकम्।
पञ्चमं ब्रह्मणो रात्रं रात्रं षष्ठं शिवस्य तु ॥३५॥

सपतरात्रात्सामारभ्य वैष्णवं सकलं परम्।

(प्रतिदिनं दीयमानानां बलीनां द्रव्यदेवताविवेकः)

निशाचूर्ण तु पललं सलाजं दधि सक्तुकम् ॥३६॥

भूतक्रूरमिति प्रोक्तं तेषां तेन बलिं क्रमात्।
द्वितीये पैत्रिके दद्यात् सतिलैः शालितण्डुलैः ॥३७॥

लाजया मधुबीजै श्च यक्षरात्रिबलिं क्रमात्।
नालिकेरपयः पिष्टशक्तुभि श्चापरेऽहनि ॥३८॥

दद्यान्नागबलिं प श्चात् ब्रह्मं पद्माक्षतैः क्रमात्।
यवै श्च चरुणापूपैः गुलान्नेन च वैष्णवम् ॥३९॥

अष्टमे पायसं प्रोक्तं नवमे कृसरं तथा।
शुद्धान्नं दशने दद्यात् मुद्गान्नमपरेऽहनि ॥४०॥

द्वादशाहे बलिं दद्यात् क्षीरं दध्याज्यमिश्रितम्।
शुद्धान्नं शालिजं विप्र गुजखण्डसामन्वितम् ॥४१॥

(महोत्सवे होमक्रमः)

विधिहोमं ततः कुर्यात् कुण्डं कृत्वा विधानतः।
यात्रान्तं नित्यकुण्डे वा धुमच्छेदं न वा भवेत् ॥४२॥

अष्टोत्तरसहस्त्रेण अष्टोत्तरशतेन वा।
आचार्यो 'मूल'मन्त्रेण विष्णुयागपरायणः ॥४३॥

ब्रह्मवृक्षसमिद्भिस्तु पुष्पैः पद्मादिकैस्तथा।
धूपन मधुपर्केण शलिबीजतिलैस्तथा ॥४४॥

सुसितान्नेन चाज्येन परिवाराङ्गसंयुतम्।
ततः 'पुरुष' सूक्तेन प्रत्येक षोडशाहुतीः ॥४५॥

'पञ्चोपनिषदा' पञ्च बलिद्रव्येण होमयेत्।
रात्राधिदेवतामन्त्रं ध्यात्व तेनैव होमयेत् ॥४६॥

रात्राधिदेवतामन्त्रं ध्यात्वा 'मूलं' जपेदगुरुः।

(द्वादशरात्रोत्सवे प्रतिरात्राणां देवताः)

श्रृणु द्वादशरात्राणां क्रमाद्वक्ष्येऽधिदैवतम् ॥४७

वराहपूर्वाः कृष्णान्ताः सप्तरात्राधिदैवतम्।
अष्टमस्य तथा कल्की मत्स्यात्मा नवमस्य तु ॥४८॥

सर्वाधारस्तु कूर्मात्मा दशमस्याधिदैवतम्।
एकादशस्यानन्तात्मा तथा नारायणः प्रभु ॥४९॥

क्रमाद्द्वादशरात्राणां दैवतं परिकीर्तितम्।

(मण्डले बलिदानक्रमः अङ्कुरसंरक्षणञ्च)

एवं कृत्वाग्निकार्यं तु साधको मुनिसत्तम ॥५०॥

पालिकानान्तु परितः क्रमादश्टासु दिक्षु च।
बलिं तु मण्डले दद्यात् सेन्द्रादिक्रमयोगतः ॥५१॥

भूतानां कुमुदादीनां नमोन्तैस्तु स्वनामभिः।
यदा चोप्तानि बीजानि तदा प्रभृति नित्यशः ॥५२॥

न कार्श्चित् प्रविशेदत्र न स्पृशेद्वा कथाञ्चन।
आचार्य एव प्रविशेत्ताच्छिष्यो वा समाहितः ॥५३॥

उच्छिष्टादीनि सर्वाणि दूरतः परिवर्जयेत्।
अदत्वा तद्बलिं कांश्चिन्न कुर्यात् पालिकाक्रियाम् ॥५४॥

(महोत्सवे आचार्यसंख्यादिनिर्देशः)

चत्वारोऽष्टौ द्वादश वा प्रारभेयुर्महोत्सवम्।
सुसितैर्नववस्त्रैस्तु भूषिताः भूषणैरपि ॥५५॥

समाहितास्तु शुचयः कृतदन्तानुधावनाः।
हविष्यन्नभुजो हृष्टाः आचार्याः बहवः स्मृताः ॥५६॥

गुरोरनुज्ञाया युक्ताः प्रधानस्य विपर्श्चतः।
होमशेषं तु कूर्वीत युक्त एकः प्रसन्नधीः ॥५७॥

आनयेयुः बलिं चान्ये पूजयेयुः परेऽहनि।

(महोत्सवविधिनिरूपणम्)

रथं वा कुञ्जरं वापि शिबिकां वा स्वलङ्कृताम् ॥५८॥

एषामलाभे प्रियं वा सम्पूज्य गरुडात्मना।
तत्रोत्सवार्चामारोप्य बलिबिन्बं तु वा द्विज ॥५९॥

कर्तुरिच्छावशेनैव कर्मार्चां वा विभूषिताम्।
पूजयित्वार्घ्यपाद्याद्यैः स्तुत्वा प्रतिसरान्विताम् ॥६०॥

शङ्खदुन्दुभिनिर्घोषैः जयनादसमन्वितैः।
स्तुतिभिर्नृत्तगीतैश्च ध्वजैर्नानाविधैस्तथा ॥६१॥

रामाभिर्वारमुख्याभिः सलीलाभिरितस्ततः।
वैष्णवैर्यतिभिर्विप्रैः साधकैः भगवन्मयैः ॥६२॥

हृष्टपुष्टजनैरन्यैः वन्दिभिः सूतमागधैः।
शिल्पिभिः कृतहस्तैश्च निपुणैर्बलिभिस्तथा ॥६३॥

वैतालिकैश्च शैलूषैः मल्लाद्यैश्च समाकुलैः।
वाहयेद्ब्राह्मणैर्देवं शिबिकास्थं प्रसन्नधीः ॥६४॥

देवस्य पुरतो दूराद्गच्छेयुः बलिदायिनः।
प्रदक्षिणं परिभ्रम्य प्रासादं तु पुनः पुनः ॥६५॥

प्रदीपशतसंयुक्तं रात्रौ कार्यं महोत्सवम्।
नगरं पत्तनं ग्राममन्यद्वा समलङ्कृतम् ॥६६॥

प्रदक्षिणं परिभ्रम्य बलिदानपुरस्सरम्।
अष्टदिक्षु बलिं दत्वा ग्राममध्ये समापयेत् ॥६७॥

कुमुदाद्यास्तु भूतेशाः तेन तृप्यन्ति नित्यशः।
बलिमन्त्रं स्वनाम्ना तु तेषां चैव नमोऽन्वितम् ॥६८॥

भूतक्रूरबलिं दद्यात् अस्यां रात्रौ यथाविधि।

(ग्रामयात्रोद्यतदेवार्चनादिफलम्)

ग्रामयात्रोद्यतं देवं योऽर्चयेद्भक्तिपूर्वकम् ॥६९॥

भक्ष्यैर्भोज्यै श्च लेह्यौ श्च चोष्यैः पेयैः सुसंस्कृतैः।
तस्य पुण्यफलावाप्तिं कश्शक्रोत्यभिवर्णितुम् ॥७०॥

अनुगच्छन्ति ये भक्ता कौतुकं कौतुकान्विताः।
विमुक्तकल्मषास्ते स्युः क्रमात् पारिषदे श्वराः ॥७१॥

नृत्यन्त्यत्र च ये हर्षौत् लुठन्ति च रमन्ति च।
आस्फोटयन्ति ये हर्षात् अपवर्गं समाप्नुयुः ॥७२॥

(ग्रामयात्रायाः अनन्तरमालये देवस्य पुनरानयनादिक्रमः)

ग्रामं च भ्रामयित्वैवं प्रासादं च पुनः पुनः।
पूर्ववत्पूजयित्वा तम् अवरोप्य च वाहनात् ॥७३॥

प्रासादे स्थापयित्वा तु पुष्पैराराध्य केवलैः।
मूलबिम्बे यथापूर्वं 'मूले'न प्रतिरोपयेत् ॥७४॥

(उत्सवे उत्सवादिबिम्बोपयोगे विशेषः)

यदोत्सवार्चा कर्मार्चा नियुक्त वा महोत्सवे।
तदैकदैव कुर्वीत रात्रावहनि चोत्सवम् ॥७५॥

यदा महोत्सवविधौ बलिबिम्बं प्रयुज्यते।
कालयोरुभयोस्तद्वत् कर्तुरिच्छानुरूपतः ॥७६॥

तत्रोत्सवार्चता कुर्यात् एकदा नित्यमुत्सवम्।
यथाभिमतकाले तु यथाभिमतवीथिषु ॥७७॥

(उत्सवबिम्बाभावे प्रतिनिधिः)

असत्यामुत्सवार्चायां कर्मबिम्बे समाचरेत्।

(निशोत्सवावसाने अभिषेकनिषेधः)

निशेत्सवावसाने तु नाभिषिञ्चेज्जनार्दनम् ॥७८॥

प्रत्यहं देवदेवस्य स्नपनं चाह्नि कारयेत्।

(उत्सवे नित्याराधनादिप्रकारः)

पूर्वस्माद्द्विगुणैर्भोगैः नित्याराधनमुच्यते ॥७९॥
ब्राह्मणान् भोजयेन्नित्यं दीक्षितां श्च विशेषतः।
एवं कृत्वोत्सवं सम्यक् प्रथमेऽहनि साधकः ॥८०॥

अह्निप्रदक्षिणं कुर्याच्छेषेषु दिवसेषु च।
दिवोत्सवान्ते देवेशं स्नानाद्यैः पूजयेत्सदा ॥८१॥

सहस्रधारया स्नानं कृत्वा 'मूले'न मन्त्रवित्।
अलङ्कृत्य यथान्यायं यथाशोभं यथारुचि ॥८२॥

अम्भसा कालशं पूर्णं पत्रपुष्पाद्यलङ्कृतम्।
दीपपात्रेण संयुक्तं भ्रामयित्वा तु मूर्धनि ॥८३॥

एकाधा वा त्रिधा वापि देवमूर्धोपरि क्रमात्।
देवगाराद्बहिः प श्चात् 'क्षिपेदि'ति विसर्जयेत् ॥८४॥

भोज्योसनं ततो दत्त्वा पाद्यमाचमनं तथा।
मधुपर्कं तथाचामं ताम्बूलं गन्धभावितम् ॥८५॥

तत श्चाचमनं दत्त्वा विनिवेद्य महाहविः।
राजोपचारमार्गेण मुखवासावसानकम् ॥८६॥

एवं दिनं निशीथे च कुर्यादेव महोत्सवम्।
एवं नित्यं परिभ्रम्य दत्त्वा तत्तद्बलि क्रमात् ॥८७॥

(महोत्सवाङ्गरूपे तीर्थोत्सवे
प्रतिसरबन्धविज्ञापनप्रकारः)

रात्रौ प्रतिसरारभं पूर्वेद्युः कारयेत्सुधीः।
सौवर्णं राजतं वापि ताम्रजं वाल्यविग्रहम् ॥८८॥

बिम्बं तु तीर्थयात्रार्थं शङ्कचक्रसमन्वितम्।
वामेन कटिमालम्ब्य पाणिण वामपा श्वतः ॥८९॥

वनमालान्वितं हस्तं दक्षिणं स्वागतान्वितम्।
अथवा नित्यपूजायां विहितं कौतुकं तु वा ॥९०॥

अलाभे त्वस्य बिम्बस्य बलिबिम्बं तु वा भवेत्।
तत्र सायं परिभ्रम्य दत्त्वा च बलिमुत्तमम् ॥९१॥

प्रविश्य देवमाचार्यः प्रार्थयेत्तदनन्तरम्।
तौर्थयात्रा त्वया देव श्वः कर्तव्या सुरे श्वर ॥९२॥

तत्र प्रतिसारारं भं त्वमानुज्ञातुमर्हसि।
इति विज्ञाप्य देवेशमाचार्यस्तदनन्तरम् ॥९३॥

(प्रतिसरबन्धनप्रकारः)

प्रासादाभ्यन्तरे कुर्यात् वेदिकां व्रीहिभिः शुभाम्।
हस्तमात्रोन्नतायामविस्तारां पद्मसन्निभाम् ॥९४॥

वासोभिर्वेष्टयित्वा तां चतुरश्रायतां क्रमात्।
प्ररोहघटिकाभिस्तु शरावैस्तु चतुर्दिशम् ॥९५॥

कोणेष्वलङ्कृतां कृत्वा चतुर्भिः क्रमयोगतः।
तस्यां संस्थापयेत्प श्चात् यात्राबिम्बमलङ्कृतम् ॥९६॥

दीक्षितैर्वैष्णवैस्तत्र घृतारोपणमादितः।
कारयित्वा विधानेन 'शाकुनं' सूक्तमुच्चरन् ॥९७॥

दर्पणं दर्शयेत्प श्चात् मङ्गलानि च दर्शयेत्।
सङ्खदुन्दुभिनिर्घोषैः जयशब्दै श्च नादयेत् ॥९८॥

ऊर्णामयेन सूत्रेण क्षौमसूत्रयुतेन च।
अङ्गुष्ठानामिकाभ्यां तु सादयित्वा विचक्षणम् ॥९९॥

तत श्चोभयहस्ताभ्यां दक्षिणे भगवत्करे।
'जितन्त' इति मन्त्रेण बध्नीयात् साधकः क्रमात् ॥१००॥

एवं सर्वेषु यागेषु कुर्यात् कौतुकबन्धनम्।
चामरैस्तालवृन्तै श्च वीजयेन्मङ्गलान्वितम् ॥१०१॥

एणकायां तु क्लृप्तायां निषेश्य प्रतिमां ततः।
रात्रिशेषं समासीत अनिर्वाणैः प्रदीपकैः ॥१०२॥

गुग्गुल्वगरुधूपै श्च धूपयित्वा विचक्षणः।

(तीर्थोत्सवक्रमः)

आचार्यः प्रातरुत्थाय स्नात्वा जप्त्वा यथाविधि ॥१०३॥

उत्सवं पूर्ववत्कृत्वा तस्मिन्नहनि पूर्ववत्।
प्रविश्य देवभवनं संस्राप्यात्सवकौतुकम् ॥१०४॥

प्रासादस्यान्तरे स्थाप्य ततः पूर्ववदाचरेत्।
तीर्थयात्रां कुरुष्वेति कार्यं रिज्ञापयेच्छनैः ॥१०५॥

तत्र संहृत्य तद्बिम्बम् उत्पाद्य विधिपूर्वकम्।
तीर्थवेम्बे समाबाह्य पूजाकाले यथोदितम् ॥१०६॥

तत्तीर्थबेरमादाय कृतकौतुकबन्धनम्।
प्रासादस्याग्रतः स्थाप्य वेद्यां तत्रार्धमण्डपे ॥१०७॥

पुण्याहं वाचयित्वा तु वैष्णवैर्वेदपारगैः।
अर्घ्यपाद्यादिदत्त्वा तु घृतारोपणमाचरेत् ॥१०८॥

प्ररोहपालिकाभिस्तु अलङ्गकुर्यात्समन्ततः।
ततो मङ्गलपूर्णानि वैष्णवीभिस्तु कारयेत् ॥१०९॥

शालिभिर्योजयित्वा तु पुष्पैराराध्य कैवलेः।
मूलबिम्बं यथापूर्वं 'मूले' न प्रतिरोपयेत् ॥११०॥

(उत्सवे कार्मार्चायाः उत्सवार्चात्वेन नियोजिते विशेषः)

यत्रोत्सवार्चा कर्मार्चा नियुक्ता वा महोत्सवे।
तदैवमेव कुर्वीत रात्रावहनि चोत्सवम् ॥१११॥

(स्नानद्रव्यविन्यासक्रमः)

शालिभिर्यवगोधूमैः रजनीचूर्णमिश्रिामतैः।
कृत्वा सुवर्णसूत्रं तु स्थापयित्वा तदुत्तरे ॥११२॥

घृतं च मध्यमे न्यस्य पूर्वे तु दधि विन्यसेत्।
पयस्तु दक्षिणे न्यस्य पर्श्चिमे मधु विन्यसेत् ॥११३॥

पूर्वमेवोत्तरे न्यस्य रजनी चूर्णमुत्तमम्।
उष्णोदकं तथाग्नेय्यां सुतप्तयुतसंयुतम् ॥११४॥

नैरऋत्यां गन्धतोये तु पुष्पम्भो वायुगोचरे।
एकपत्रं विष्णुपर्णी नन्द्यावर्तं सरोरुहम् ॥११५॥

मन्दारतुलसीजातिमल्लिकामिश्रितं जलम्॥

(स्नानद्रव्यप्रतिनिध्यादिनिर्देशः)

एतेषामप्यलाभे तु वैष्णवं पद्ममेव वा ॥११६॥

मङ्गलोदमीशाने सर्व 'मूले'न विन्यसेत्।

(स्नपनक्रमनिर्देशः)

अर्चयित्वा तु गन्धाद्यैः वासोभिर्वेष्टयेत्क्रमात् ॥११७॥

घृतेन स्नापयत्पूर्वं बीजेन 'परमेष्ठि'ना।
'पुंसा'भिषेचयेद्दध्ना 'विश्वे'न पयसा तथा ॥११८॥

'निवृ'त्या मधुना चापि स्नापयित्वा समाहितः।
ततश्च विमृजेच्चूर्णैः कुशकूर्चेन मार्जयेत् ॥११९॥

'प्रणवे'न ततो दद्यात् 'सर्वे'णोष्णोदकं ततः।
'अष्टाक्षरे'ण गन्धाम्भः पुष्पम्भो 'द्वादशात्म'ना ॥१२०॥

ततश्च 'विष्णुगायत्र्या' स्नापयेन्मङ्गलाम्भासा।

(भगवदाराधनक्रमः)

तत श्च वाससी शुद्धे दद्या'त्प्रणव'मन्त्रिते ॥१२१॥

आराध्य गन्धपुष्पाद्यैः रजनीचूर्णमुत्तमम्।
सौवर्णेन समायुक्तं दत्त्वा देवस्य मूर्धनि ॥१२२॥

प्रतिमा प्रतिमृज्याथ भक्तानां मूर्ध्नि निक्षिपेत्।

(रजनीचूर्णमाहात्म्यम्)

गङ्गास्नानफलं चूर्ण सर्वपापप्रणाशनम् ॥१२३॥

क्रीजया वापि तच्चूर्णं मूर्ध्नि कुर्यात्तु मानवः।
तस्य देहगतं पापं तदह्नाय विनश्यति ॥१२४॥

तस्मात्तच्चूर्णकं मूर्ध्नि धारयेत्सततं बुधः।
यजमानस्य तद्राज्ञो मूर्ध्निस्थं तु जयप्रदम् ॥१२५॥

(हविर्निवेदनक्रमः)

परमान्नं ततो दद्यात् तस्मिन् काले समाहितः।
एतज्जयप्रदं विद्धि राज्ञः सर्वसमृद्धिदम् ॥१२६॥

(तीर्थयात्राक्रमः)

बिम्बं तस्मात् समादाय दर्शयित्वा हरेः प्रभोः।
रथं वा कुञ्जरं वापि यात्रावाहनमानयेत् ॥१२७॥

नाना वादित्रकुशलान् बहूं श्च परिचारकान्।
छत्रध्वजपताकां श्च भेरीपटहकाहलान् ॥१२८॥

शिल्पिनः सेवकां श्चापि गणिकादेवदासिकाः।
एवमेतान् समाहूय मुहूर्तें शोभने गुरुः ॥१२९॥

अष्टभिः संवृतशिष्यैः चतुर्भिर्वा स साधकः।
देवं प्रदक्षिणीकृत्य प्रणिपत्य समाहितः ॥१३०॥

दक्षिणेन समादाय पाणिना वाग्यतः स्वयम्।
शिष्यस्य शिरसि स्थाप्य वस्त्राद्यैर्भूषितस्य च ॥१३१॥

बहिर्निष्क्रम्य घोषेण शिषयैः परिवृतः स्वयम्।
वहेतां चामरे द्वे तु छत्रमेकं सितं शुभम् ॥१३२॥

चतस्त्रः पालिका श्चान्ये वहेर्युर्द्विजसत्तम।
सन्निधानं समासाद्य कुञ्जरस्य रथस्य वा ।१३३॥

गरुडं भावायित्वैनामारोहेयुरनाकुलाः।
ते तत्र वाग्यताः सर्वे नववस्त्रैलङ्कृताः ॥१३४॥

वाग्यताः सोत्तरीय श्च सन्तुष्टाः दक्षिणादिभिः।
महाजनेन संवीताः गच्छेयुर्यत्र निम्नगाः ॥१३५॥

प्रदक्षिणं परिभ्रम्य सर्वेष्वावरणेषु च।
'प्रणवेन' यथान्याथं नृत्तगीतसमन्वितम् ॥१३६॥

निर्गच्छेद्योजनादर्वाक् अत ऊर्ध्वं तु वर्जयेत्।

(यात्रायाम् अस्पृस्यस्पर्शदोषाभावः)

यात्राया वर्तमानायामस्पृश्यास्पर्शने सति ॥१३७॥

अशुचिर्न भवेन्मन्त्री सर्वे पूता यतस्तदा।
(आचार्या आशिषं ब्रूयांत् राज्ञो राष्ट्रस्य वृद्धये ॥१३८॥

'भवन्तु ताः' द्विजाः सर्वे प श्चाद्ब्रयुस्तथैव च।
अस्मिन् काले यदाचार्यः प्रब्रूयाद्देवसन्निद्धौ ॥१३९॥

तत्थैव भवेदेव देवोऽपि प्रियमाप्नुयात्।

(तीथे निमज्जनक्रमः)

वाहनादवतीर्याथ स्नात्वा चैव समाहितः ॥१४०॥

'ओं खं नमः षराय तोयात्मने।'
आवाह्यानेन मन्त्रेन तीर्थानि प्रथितानि वै।
अर्चा.. हस्तानामभिकाम्रोदकस्थितः? ॥१४१॥

'परमेष्ट्यया'त्मना मज्जेत् ध्यायन् देवं सदा हृदि।
सम्प्रोक्ष्य पञ्चभिर्मन्त्रैः कुशपाणिसमहितः ॥१४२॥

महाजनैः सहस्तायां? ब्राह्मणानाञ्च वाञ्छया।

(तीर्थस्यानात् प्रत्यागमनक्रमः)

उत्तीर्याचमनं दत्त्वा पूर्ववद्वाहनं नयेत् ॥१४३॥

निवर्तेत ततः तीर्थात् यात्रादिवस एव तु।

(रात्रौ तीर्थयात्रानिषेधः)

न रात्रौ तीर्थयात्रा स्यादहन्येव विधीयते ॥१४४॥

(आलये बिम्बोद्वासनक्रमः)

देवागारं परिभ्रम्य सपीठं पूर्ववस्तुधीः।
महाजनेन संवीतः प्रासादं तु प्रवेशयेत् ॥१४५॥

मूलबिम्बे यथापूर्वं 'सर्वे'णोद्वसयेत्ततः।

(पुष्पयागप्रकारः)

पुष्पयागं ततः कुर्यात् तस्मिन् रात्रौ समाहितः ॥१४६॥

प्रथमावरणे वापि द्वितीयावरणेऽपि वा।
तृतीयावरणे वापि मण्डपे लक्षणान्विते ॥१४७॥

अग्रतः पा श्व॑योर्वापि यथाभिमतदिग्गते।
चक्राब्जमण्डलं लिख्य पूर्ववल्लक्षणान्वितम् ॥१४८॥

तत्केवलैस्तु कुसुमैः तक्ष्द्वर्णैः प्रपूरयेत्।
मण्डपस्य बहिः कुर्यात् अत्रैवावरणत्रयम् ॥१४९॥

तेषु पुष्पमयं पीठम् अष्टदिक्षु प्रकाल्पयेत्।
यथाभिमतमानेन पुष्पैरेव द्विजोत्तम ॥१५०॥

तोरणान्ति चतुर्दिक्षु वस्त्रछन्नानि कल्पयेत्।
वस्त्रछन्नौ प्रतिद्वारं द्वौ द्वौ तु कलसौ न्यसेत् ॥१५१॥

प्ररोहपालिकाः वस्त्रैः वेष्टिताः स्थापयेत् पृथक्।
स्तंभान् सर्वास्तु संवेष्ट्य नववस्त्रैर्दशान्वितैः ॥१५२॥

महद्भि सदर्शैश्शुक्लेः वस्त्रैः संवेष्टितो नवैः।
अलङ्कृतो यथाशोभं मकुटादिविभूषणैः ॥१५३॥

सोष्णीषः सोत्तरीय श्च सविचित्रः प्रसन्नधीः।
उत्सवार्चां समादाय कर्मार्चां वा स्ववाञ्छया ॥१५४॥

स्नापयित्वा यथान्यायमलङ्कृत्य च यत्नतः।
स्थापयेत्पत्रपद्मस्य मध्ये मण्डलमध्यतः ॥१५५॥

प्राङ्मुखो वस्त्रसंच्छन्नः 'प्रणवे'न समाहितः।
वस्त्रपीठे समासीनः उदगास्यः प्रसन्नधीः ॥१५६॥

महीं वस्त्रैस्समाच्छाद्य तस्मिन् पात्राणि विन्यसेत्।
एवं कृत्वा यथापूर्वं पूजयेत्पूर्ववद्गुरुः ॥१५७॥

मूर्तयो वासुदेवाद्यः देव्यः शान्त्यादयो द्विज।
प्रथमावरणे पूज्याः मुद्राशङ्खादयो परे ॥१५८॥

तृतीयावरणे पूज्याः लोकपालास्तु पूर्ववत्।
विष्वक्सेनं तथैशान्यां सर्वेषां बाह्यतो यजेत् ॥१५९॥

एवं न्यासविधानेन पूजयेत्कल्पवर्त्मना।
न चात्र स्नापयेद्देवं मनसा तत्समाचरेत् ॥१६०॥

प्रभूतैः गन्धकुसुमैः पूजयित्वा समाहितः।
हविर्निवेदयेत्प श्चात् प्रभूतव्यञ्जनान्वितम् ॥१६१॥

(अग्रकार्यक्रमः)

अग्निकार्यं ततः कुर्यात् कुण्डे वा स्थाण्डिलेऽपि वा।
देवस्य दक्षिणे भागे बह्निभागे तु मण्डपे ॥१६२॥

अष्टोत्तरसहस्त्रं वा अश्टोत्तरशतं तु वा।
समिद्भिः सर्पिषा चैव वह्निकार्यं यथाक्रमम् ॥१६३॥

अस्मिन् हो मे न पुष्पाद्याः होतव्याः सिद्धिमिच्छता।

(अग्निकार्याङ्गबलिदानम्)

सर्वेषां वाग्यतो दद्यात् अष्टदिक्षु समन्ततः ॥१६५॥

हविषा कुमुदादीनां बलिं बलिविधानतः।

(आचार्यादिसम्मानः दक्षिणायाः उत्तमादिपरिमाणञ्च)

आचार्य पूजयेत्प श्चात् वस्त्रैर्धान्यैर्धनैः शुभेः ॥१६५॥

सुवर्णानां शतं तत्र गुरोरिष्टा तु दक्षिणा।
तदर्धा मध्यमा प्रोक्ता मध्यमार्धाधमा स्मृता ॥१६६॥

अथवा दक्षिणा विप्र वित्तस्यैवानरूपतः।
तदर्धा साधकानां तु अन्येषां तु यथाधनम् ॥१६७॥

(उत्सवान्ते देवाय आत्मनिवेदनम्)

एवं संपूज्य विधिवत् गुरुपूर्वांस्तु वैष्णवान्।
आत्मानं परया भक्त्या देवाय विनिवेदयेत् ॥१६८॥

(विष्णोः उत्सवस्य फलकीर्तनम्)

एवं यः कारये द्विष्णोरुत्सवं सकृदप्यसौ।
अणिमादिगुणान् प्राप्य वैष्णवं पदमश्नुते ॥१६९॥

(मण्डलादानीय प्रासादे देवस्य स्थापनम्)

एवमाराध्य देवेशं स्तुत्वा स्तोत्रैस्तु देशिकः।
उद्धृत्य मण्डलाद्देवं प्रासादे स्थापयेत्ततः ॥१७०॥

आरोप्य पूर्ववद्देवं नमस्कुर्यात्पुनः पुनः।

(गरुहोद्वासनक्रमः)

अपरेऽहनि रात्रौ तु गुरुर्वै साधकैः सह ॥१७१॥

संस्त्राप्य विधिना प श्चात् उत्सवार्चां यथाविधि।
महाहविर्निवेद्याथ गरुडं पूज्य पूर्ववत् ॥१७२॥

उद्वास्य मूलगरुडे ध्वजस्थं तस्य विद्यया।

समाहितमाना भूत्वा देवमाराधयेत्ततः ॥१७३॥

(महोत्सवे विनियुक्तद्रव्याणां विनियोगः)

अस्मिन् महोत्सवे यद्यद्विनियुक्तं महामुने।
स्वयमेव समादद्यात् तत्सर्वं वाञ्छितं गुरुः ॥१७४॥

EXCERPTS FROM VISVAMITRA-SAMHITA (CHAPTER 17)

काश्यपः-

श्रुतो नित्योत्सवविधिर्महोत्सवविधेर्मम।
शुश्रूषा वर्तते ब्रह्मन् तं मे वक्तुं त्वमर्हसि ॥१॥

वि श्वामित्रः-

महोत्सवस्त्रिधा प्रोक्तो नित्यो नैमित्तिकस्तथा।
काम्य श्चेति मया प्रोक्तः प्रथमं ते द्विजोत्तम ॥२॥

शुभे च तिथिनक्षत्रे विषुवायनयोर्द्वयोः।
सङ्कल्पितावभृथकः सर्वदैवतसेवितः ॥३॥

ज्ञेयो नैमित्तिक इति निमित्ते सति कल्पितः।
अनावृष्टौ सुदीर्घायां सति दुर्भिक्षसंभवे ॥४॥

पतितासु महोल्काशु रात्राविन्द्रधनु*र्दिशि*।
दर्शने वालमीनानां श्वेतकाकस्य दर्शने ॥५॥

अशनीनां निपाते च दिग्दाहे भूमिकम्पने।
देवतालयभेदे च पतने चैत्यभूरुहाम् ॥६॥

देवताप्रतिमानां च कम्पने भेदने तथा।
महावाते महावृष्टौ ग्रहयुद्धविधानके ॥७॥

एवमादिषु सर्वेषु महोत्पातेषु सुव्रत।
एतद्दोषप्रशान्त्यर्थं क्रियते यो महोत्सवः ॥८॥

स नैमित्तिकनामा स्यादुत्सवो मधुविद्विषः।
यत्किञ्चित्काममुद्दिश्य क्रियते यत्फ(यः फ?)लार्थिभिः॥९॥

स काम्य इति विज्ञेयो यथेष्टफलदायकः।
नवाहः सप्तदिवसः पञ्चाहस्त्रिदिनावधिः ॥१०॥

यथाविभवविस्तारं प्रकल्प्यः स महोत्सवः।
तदर्थं मनसा पूर्वमालोच्यैव प्रकल्पयेत् ॥११॥

अयने विषुवे वापि मासर्क्षेष्वथवा द्विज।
पौर्णमास्याममायां व रोहिण्यां श्रवणे तथा ॥१२॥

प्रतिष्ठादिवसे वापि कल्पयेत्तीर्थवासरम्।
ग्रामे वा नगरे वापि पत्तने वा विशेषतः ॥१३॥

बलिप्रदानं रथ्यासु कारयेज्जनसंयुते।
ग्रामादिरहिते धाम्नि बहिर्नोत्सवमाचरेत् ॥१४॥

धाम्नोऽन्तरे वा कर्तव्यं सर्वेष्वावरणेषु च।
गग्रमाद्यङ्गे स्वतन्त्रे वा तथा ह्यालययोर्द्वयोः ॥१५॥

उत्सवो यौगपद्येन न कार्यो द्विजपुंगव।
वास्त्वङ्गदेवतानां च कल्याणं दोषवद्भवेत् ॥१६॥

वर्तमानेऽन्यदेवानामुत्सवे वैष्णवं मत(ह?)म्।
कुर्याद्वैष्णवकल्याणे नान्यत्कार्यं(?) कदाचन ॥१७॥

सर्वासां देवतानां हि वासुदेवोऽधिदैवतम्।
ध्वजारोहणपूर्वे तु वर्तमाने महोत्सवे ॥१८॥

केशवस्यादिदेवस्य न कुर्यान्मानुषं महम्।
अधिमासे सुराचार्ये शुक्रे चास्तमिते सति ॥१९॥

नोत्सवं प्रथमं कुर्यात्कुर्याच्चेद्राजराष्ट्रयोः।
जायते सुमहत्क्ले(हाक्ले ?) शो मरणं चोपजायते ॥२०॥

द्वितीयादौ न दोषः स्यादुत्सवे प्रथमोदितः।
तीर्थाङ्कुरार्पणदिनात् पूर्वमेकोनविशके ॥२१॥

दिने ध्वजारोहणं स्यादष्टविश(दश ?)दिनेऽथवा।
द्वादशाहेऽथवा कुर्याद्वैनतेयध्वजोच्छ्रयम् ॥२२॥

ध्वजारोहणनक्षत्रान्नवमे सप्तमेऽथवा।
पञ्चमे वा दिने कुर्यादङ्कुराणां समर्पणम् ॥२३॥

उत्सवोक्तदिनात्पूर्वं कुर्ता श्चत्कारणान्तरात्।
ध्वजारोहणविघ्न श्चेदुत्पन्नो द्विजपुङ्गव ॥२४॥

उत्सवारम्भदिवसे कुर्यादेव ध्वजोत्सवम्।
रात्रौ सन्ताडनं कुर्याद्भेर्यास्तु शुभलग्नके ॥२५॥

मङ्गलाङ्कुरवापं च पालिकासु विधाय च।
भेरीताडनतः प श्चाद् ध्वजमारोपयेत्तु वा ॥२६॥

कार्पासं वसनं सूक्ष्मं शुक्लं दृढमथाहरेत्।
हस्तैः षौडशभिर्वापि न्यूनैर्वापि समायतम् ॥२७॥

दशहस्तायतं तस्मादर्धविस्तारसंयुतम्।
यद्वा यथोदतं कुर्याद्यथाविभवविस्तरम् ॥२८॥

निर्णिज्यालिप्य च खलीं संशोष्यपि विमृज्य च।
तस्य मध्ये लिखेत् ताक्ष्र्यं पीताभं लक्षणान्वितम् ॥२९॥

नवतालसमुत्सेधं द्विहस्तं च सकञ्चुकम्।
पुष्पाञ्जलिधरं श्वेतवस्त्रवासितविग्रहम् ॥३०॥

दंष्ट्राकरालवदनं दधानं भ्रुकुटीयुत(ग ?)म्।
जानुनोऽधः सुवर्णाभमा नाभेस्तुहिनप्रभम् ॥३१॥

कुङ्कुमारुणमा कर्णादाललाटात् सितेतरम्।
दधानं नीलनासाग्रं वामपादं च कुञ्चितम् ॥३२॥

पृष्ठे निविष्टं बिभ्राणं बृहत्पक्षविराजितम्।
आकाशोद्ग मनोद्युक्तं वृत्तरौद्राक्षियुग्मकम् ॥३३॥

करण्डमकुटोपेतं ललाटालम्बितालकम्।
हारादिसर्वाभरणभूषितं सुखविग्रहम् ॥३४॥

यज्ञसूत्रीकृतं शोणं बिभ्राणं वासुकिं तथा।
वामदोर्दण्डकटकमनन्तं बिभ्रतं सितम् ॥३५॥

कार्कोटकं पीतवर्णं वक्षसा बिभ्रतं सदा।
धूम्राभं तक्षकं चैव बिभ्राणं कटिसूत्रकम् ॥३६॥

रक्ताब्जवर्णपद्माख्यं दक्षिणे श्रवसि स्थितम्।
पिङ्गलं च महापद्मं वामकर्णे च बिभ्रतम् ॥३७॥

शङ्खं च तुहिनप्रख्यं दधानं मस्तकोपरि।
भ्रमराभं च गुलिकं दधानं चाङ्गदीकृतम् ॥३८॥

पा र्श्वद्वयोपरिष्टाच्च विलिखेच्चामरद्वयम्।
अधोभागेऽम्बुसंपूर्णकुम्भं साङ्कुरपालिकम् ॥३९॥

विलिखेत्पा र्श्वयो श्चैव दीपयुग्मं समुज्जवलम्।
उपरिष्टाल्लिखेच्छत्रं मुक्ताहारविभूषितम् ॥४०॥

पा र्श्वयोरुभायो श्चैव शङ्खं चक्रं सखड्गकम्।
शाङ्र्गं च बाणसहितं गदामपि विलेखयेत् ॥४१॥

लिखेच्च पञ्चभिर्वर्णैः श्यामवर्णकमन्तरम्।
ध्वजार्धपरिमाणा स्यात्पताका नैव चित्रिता ॥४२॥

जातेऽधिवाससमये निशीथिन्यां गुरुः स्वयम्।
गत्वा च कारुशालायां नयनोन्मीलनक्रियाम् ॥४३॥

शिल्पिना संविधायाथ शिल्पिनं परितोष्य च।
विसृज्य तं स्वर्णमये पात्रे निक्षिप्य तं ध्वजम् ॥४४॥

तूर्यवादित्रसहितं कृत्वा धामप्रदक्षिणम्।
प्रवेश्य धामान्तरालं देवस्याग्रे प्रदर्शयेत् ॥४५॥

यागमण्डपमानीय प्रतिष्ठोक्तक्रमेण तु।
नयनोन्मीलनादीनि विधाय तदनन्तरम् ॥४६॥

जलपूर्णकटाहे तु छायामस्याधिवासयेत्।
आदर्शस्य प्रतिकृतौ स्त्रपनं विदधीत च ॥४७॥

अष्टाविंशतिभिर्वापि तथा षोडशभिस्तु वा।
कलशैः पौरुषैणैव सूक्तेन सह मूर्तिपैः ॥४८॥

अर्घ्यादिपूजनं कुर्यात् स्वगायत्र्या महामते।
शालीनां दशभिर्भारैः कल्पिते शयने शुभे ॥४९॥

तदर्धैस्तण्डुलैस्तस्योपरिष्टाच्च तदर्धकैः।
तिलैर्मध्ये तु विस्तीर्णैः शुभैर्वस्त्रैः समावृते ॥५०॥

तस्योपरिष्टात् सुशुभैः कम्बलादिभिरास्तृते।
शाययित्वा पटान्तःस्थं देवं गरुडरूपिणम् ॥५१॥

तस्य दक्षिणपा श्वें तु कुम्भं निर्दोषमव्रणम्।
धान्याराशौ स्थापयित्वा करकं सुशुभं तथा ॥५२॥

विन्यस्य चाष्टकलशान् परितः सर्वदिक्ष्वपि।
कुम्भे गरुडमावाह्य करके च सुदर्शनम् ॥५३॥

कलशेष्वष्टसु तथा शक्रादीनपि पूजयेत्।
विस्तार्य च गरुत्मन्तं पटस्थं धामसंमुखम् ॥५४॥

आवाह्य तत्प्रतिकृतौ व्याहृतीभिः पतत्प्रभुम्।
सन्निधिं तत्र विप्रेन्द्र गाथया प्रार्थयेत च ॥५५॥

वेदमूर्ते नमस्तुभ्यं वैनतेय महाबल।
महाबाहो संनिधत्स्व पटेऽस्मिंस्ते नमो नमः ॥५६॥

आहूतः कर्मसिद्धिं च विहगेश कुरुष्व नः।
देवस्योत्सवसंपत्त्यै लोकाह्वानं विधत्स्व च ॥५७॥

इति विज्ञाप्य गरुडं गायत्र्या स्वीयया पुनः।
अर्चयित्वार्घ्यपूर्वैस्तु निवेद्य च चतुर्विधम् ॥५८॥

नैवेद्यजातं सकलं कुम्भान्तःस्थं समर्च्य च।
नैवेद्यान्ते गरुमन्तं प श्चात् स्तोत्रैः स्तुवीत च ॥५९॥

महाविष्णोर्वाहनाय तार्क्ष्यायामिततेजसे।
सर्पेन्द्रमृत्यवे तुभ्यं गरुडाय नमोऽस्तु ते ॥६०॥

पक्षीन्द्राय नमस्तुभ्यं स्वाध्यायवपुषे नमः।
विहगेन्द्र नमस्तेऽस्तु समुत्पाटितकल्पक ॥६१॥

आहृतामृतकुम्भाय जननीशापमोचिने।
सुरासुरेन्द्रजयिने नागेन्द्राभरणाय च ॥६२॥

यदाधारमिदं सर्वं तदाधाराय ते नमः।
रथन्तरं बृहत्साम यस्य पक्षावुभौ प्रभेः ॥६३॥

त्रिवृत्साम शिरः प्रोक्तं गायत्री यस्य चाक्षिणी।
स्तोम आत्मा नमस्तेऽस्तु वामदेवाङ्गसंपदे ॥६४॥

नमः प्राणादिवायूनामीशानाय गरुत्मते।
दोषानपनयाखण्डान् गुणानावह सर्वतः ॥६५॥

विघ्नानि(?)जहि सर्वाणि(?) मामपि स्वात्मसात् कुरु।
एवं स्तुत्वा जपेन्मन्त्रं गरुत्मनतमनन्यधीः ॥६६॥

ब्रह्मघोषैस्तूर्यनादैर्जागरेण नयेन्निशाम्।
कवलीकृत्य नैवेद्यं तन्मन्त्रैरभिमन्त्र्य च ॥६७॥

योषिद्भ्य श्चैव वन्ध्याभ्यो दद्यान्मन्त्राभिमन्त्रितम्।
ध्यात्वाच्युतं गरुत्मन्तं क्षिपेदञ्जलिषु स्वयम् ॥६८॥

पिण्डान् स्त्रियो भक्षयित्वा बहून् पुत्रानवाप्नुयुः।
प्रातःकाले गरुत्मन्तमाराध्य च हवींषि च ॥६९॥

निवेद्य पटसंस्थं तं भूषयित्वाम्बरादिभिः।
रथे वा हस्तिपृष्ठे वा शिबिकायामथापि वा ॥७०॥

आरोपयित्वा तद्ग्राम ग्रामं चैव प्रदक्षिणम्।
नयेन्मृदङ्गपटहभेरीघोषणपूर्वकम् ॥७१॥

शङ्खकाहलचिह्नानां नादैर्बहुविधैरपि।
वेदघोषैर्द्विजानां च गीतैर्नानाविधैरपि ॥७२॥

आघोष्य पुरतो देवान्नयेयुर्वाहनोद्वहाः।
स्थानस्थानेषु गीतां श्च श्रावयित्वा पृथग्विधान् ॥७३॥

दर्शयित्वा च नृत्तानि खाद्यानि च फलानि च।
मध्ये द्विजोत्तमाः सर्वे पालिकाः साङ्कुरा द्विज ॥७४॥

नयेयुर्मूर्धभिर्मुख्या वैष्णवा वशिनोऽपि च।
नयेयुरुत्सवं बिम्बं गरुडस्यान्वगेव तम्(त?) ॥७५॥

यजमानेच्छया कुर्यान्मङ्गलानि समन्ततः।
बलिपीठाग्रतो वापि गोपुराद्बहिरेव वा ॥७६॥

भूमौ खनेद् ध्वजस्तम्भं दारवं दोषवर्जितम्।
बहिःसारेषु वृक्षेषु विदुः क्रमुकमुत्तमम् ॥७७॥

चन्दनादि प्रशस्तं स्यादन्तःसारेषु काश्यप।
वर्ज्यं(ज्यों ?) निःसारदारूत्थं(त्थः ?)
स्तम्भं(म्भः ?) पक्षी श्वरस्य तु ॥७८॥

आयामः शततालः स्याद्विंशन्यूनोऽपि वा भवेत्।
मानाङ्गुलप्रमाणेन स्तम्भस्य द्विजपुङ्गव ॥७९॥

उच्छ्रायेण समानो वा प्रासादस्य महामते।
गोपुरोच्छ्रायमानो वा गरुडस्तम्भ उच्यते ॥८०॥

आधाराणां मस्करस्य पीठानां त्रितयस्य तु।
मूलेषु छिद्रयुक्तानामग्रे स्याद्विनिवेशनम् ॥८१॥

द्वितालायामयुक्तानि पीठानि स्युर्महामते।
तस्यार्धेन च विस्तीर्णान्येतदर्धघनानि च ॥८२॥

स्थूलानि मूलेष्वग्रेषु सूक्ष्माण्यपि च कारयेत्।
अयुग्मं पीठयुग्मं तु छिद्रयुक्तं च मस्करम् ॥८३॥

छिद्रयित्वा निवेश्यैव ध्वजयष्टिं द्विजोत्तम।
वेणुकं नव वा सप्त पञ्च वा विनिवेशयेत् ॥८४॥

ईदृशं तद् ध्व(तं ध्व ?) जस्तम्भमुत्तरे पीठपा श्वंके।
वेदविद्भिर्द्विजवरैर्गुरुरानीय(नाय्य ?) शाययेत् ॥८५॥

प्रागग्रमुत्तराग्रं वा स्तम्भं प्रक्षालयेत् पुनः।
स्तम्भमब्लिङ्गकैर्मन्त्रैः प्रच्छाद्य च कुशैरपि ॥८६॥

ऊर्ध्वाग्रैस्तु शुभैः स्तम्भं दामस्त्रग्भि श्च वेष्टयेत्।
अवटे लोहबीजादिशोभिते स्तम्भमीदृशम् ॥८७॥

स्थापयेद्विष्णुसूक्तेन सुदृढं धामसंमुखम्।
अङ्गुष्ठमात्रनाहेन(हं च ?) पाशेन(शं ?)
त्रिगुणेन (णमेव ?) च ॥८८॥

ध्वजस्तम्भाग्रविवरे सुदृढं विनिवेशयेत्।
अथवा स्तम्भमारुह्य ध्वजरज्जुं निवेशयेत् ॥८९॥

गुरुः सुशोभने लग्ने ध्वजमारोपयेदिति (दपि ?)।
पूर्वभागेऽथवा मध्ये सायाह्ने वापराह्णके ॥९०॥

पौरुषेणैव मन्त्रेण बध्वा घण्टां पताकया।
सुपर्णोऽसीतिमन्त्रेण ध्वजारोहणमाचरेत् ॥९१॥

तदारोहणवेलायां गुरुः स्नातः स्वलंकृतः।
देवमुत्सवबेरस्थं स्थापयित्वास्य संमुखम् ॥९२॥

अलंकृते मण्डपे च वितानैर्मौक्तिकैः शुभैः।
लम्बिताभिर्विचित्राभिर्मालिकाभिः समन्ततः ॥९३॥

परार्ध्यैः क्षौमपट्टै श्च वेष्टितस्तम्भसंचयैः।
गन्धोदकाद्यैः सान्द्रं च संसेवितपुरोभुवि ॥९४॥

मुक्तपुष्पैर्बहुविधैर्गन्धामोदितदिङ्मुखैः।
समन्तात् संप्रकीर्णै श्च साङ्कुरैः पालिकागणैः ॥९५॥

सर्वतः संवृते मध्ये निक्षिप्ते कनकासने।
सुखासीनाय देवाय सेविताय द्विजोत्तमैः ॥९६॥

अर्चिताय च गन्धाद्यैर्निवेद्यापूपपूर्वकम्।
नानाविधं स्वाद्यगणं फलैर्बहुविधैः सह ॥९७॥

ताम्बूलवीटीर्बहुधा पाण्डराः प्रियदर्शनाः।
तैलाधिवासितानेकपूगीफलसमन्विताः ॥९८॥

निवेद्य च द्विजाग्रे(ग्ये ?)भ्यः सेवकेभ्यः प्रदाय च।
उर्वशीमेनकारम्भासंनिभाभिः पृथक् पृथक् ॥९९॥

नर्तकीभिर्दर्शयित्वा नृत्तजातमनन्तरम्।
स्तम्भमूले तु निर्माय गरुडं पततां वरम् ॥१००॥

तन्मध्ये परितः स्तम्भं कल्पयित्वा सरोरुहम्।
मूर्तिपैः सह पक्षीन्द्रस्तोत्रमन्त्रादिजापकैः ॥१०१॥

पुण्याहवाचनं कृत्वा कुम्भं कलश(रक ?)संयुतम्।
प्रोक्षयित्वा तदम्भोभिर्गरुडं बलसंयुतम् ॥१०२॥

स्तम्भं चेन्द्रादिनाभ्यचर्य मन्त्रोच्चारणपूर्वकम्।
कलशस्थैर्जलैः प्रोक्ष्य विज्ञाप्य च गरुत्मते ॥१०३॥

सर्वासुरगणोत्साहनिवारण(क ?) खगे श्वर।
पटेऽस्मिन् सन्निधाय त्वमुत्सवावभृथावधि ॥१०४॥

पक्षविक्षेपमरुता विघ्नौघं विनिवारय।
इति विज्ञापनं कृत्वा पृथुकापूपसंचयम् ॥१०५॥

अन्नं चतुर्विधं चैव घृताक्तं फलसंयुतम्।
नानोपदंशसंयुक्तं नैवेद्यं विनिवेद्य च ॥१०६॥

देवमारोप्य शिबिकां नीत्वा ध्वजसमीपकम्।
दर्शयित्वा च पतनमाह्वानार्थं दिवौकसाम् ॥१०७॥

ब्रह्माण्डमध्यसंस्थानां सर्वेषामपि काश्यप।
आज्ञापयित्वा देवेन पाशेन च खगे श्वरम् ॥१०८॥

आरोप्य स्तम्भशिरसि बध्वा पाशेन नि श्चलम्।
प्रवेश्य देवं धामान्तर्मण्डपादौ निवेशयेत् ॥१०९॥

तदाप्रभृति पक्षीशं त्रिसन्ध्यासु च पूजयेत्।
अर्घ्यादिभिर्निवेद्यान्तैर्भोगजातैर्दिने दिने ॥११०॥

प्रदीपयेदनिर्वाणप्रदीपं चास्य संनिधौ।
मण्डपस्थाय देवाय निवेद्य च महाहविः ॥१११॥

होमान्तमर्चयित्वाथ रात्रावपि सभाज्य च।
ध्वजपीठाग्रगां भूमिं गोपयेनोपलिप्य च ॥११२॥

चतुरश्रं सुधाचूर्णैः शोभयित्वा च तत्र च।
शालीनामष्टभिभरैः पीठिकां परिकल्प्य च ॥११३॥

तन्मध्ये कालचक्रं च लिखित्वा कालरूपिणम्।
पुरुषं पुण्डरीकाक्षं सभाज्य समनन्तरम् ॥११४॥

देवमाराध्य तत्रैव संमुखीनं निवेश्य च।
अर्घ्यादिभिर्निवद्यान्तैर्भोगैस्तमभिपूज्य च ॥११५॥

कृत्वा पूर्णावसानं च भेरीताडनमाचरेत्।
तत्प्राच्यां शङ्खनिचयं वह्निकोणे च काहलान् ॥११६॥

दक्षिणे मर्दलं वंशान् नैर्ऋते स्थापयेदपि।
मृदङ्ग पर्ि श्चमायां च झल्लरीं पर्ि श्चमोत्तरे ॥११७॥

कांस्यतालसमायुक्तां विन्यस्य तदनन्तरम्।
उत्तरस्यां च पटहान् सहस्वपटहान् न्यसेत् ॥११८॥

ऐशान्यां मड्डुकां ढक्कासंयुतां विनिवेशयेत्।
तत्पा र्श्वे दक्षिणे स्थाप्य नर्तक्यो गायकानपि ॥११९॥

एवं क्रमेण संस्थाप्य यथाविभवविस्तरम्।
भेरी संप्रोक्ष्य वासोभ्यां वेष्टयित्वा समन्ततः ॥१२०॥

आकाशं शब्दनिलयं भेर्यां ध्यात्वा प्रपूजयेत्।
ततः स्नातः पारशवः श्वेतवस्त्रस्त्रगन्वितः ॥१२१॥

सपवित्रः सोपवीतः प्रविशेद्देवसन्निधिम्।
अस्त्रेण तं प्रोक्षयित्वा मुहूर्ते शोभने गुरुः ॥१२२॥

प्रक्षाल्य कोणं संप्रोक्ष्य ध्यायन् हयमुखं हरिम्।
त्रीन् वारान् ताडयित्वाथ दत्वा पारशवाय तम् ॥१२३॥

ततः पारशवः कोणमादाय पुरुषोत्तमम्।
भेरीमध्ये चिन्तयित्वा श्रीभूमी पा र्श्वयोर्द्वयोः ॥१२४॥

ताडयेच्च यथाकामं दर्शयन् हस्तकौशलम्।
देवतावाहनकरीं गाथां संश्रावयेद्विभुम् ॥१२५॥

तत्काले देवसंघस्य प्रीणनाय तु गायकैः।
तत्तद्ग ाथा श्च रागां श्च गीतानि श्रावयेत् पृथक् ॥१२६॥

नृत्तगीतै श्च तृप्त्यर्थं तेषां नृत्तादि दर्शयेत्।
बलिं प्रदाय तेभ्य श्च सर्वभोगसमन्वितम् ॥१२७॥

देशिकः प्राङ्मुखो भूत्वा तच्छिष्यस्तत्सुतोऽपि वा।
स्वरेणोच्चतरेणैव पठेदञ्जलिपूर्वकम् ॥१२८॥

आगच्छतामरगणाः प्रागाशां येऽधिशेरते।
विरूपा श्च सुरूपा श्च सपर्यामुद्यतामिमाम् ॥१२९॥

गृहीत्वा पान्तु नस्तृप्ताः कुमुदस्यानुयायिनः।
महं त्विममुपायान्तु प्रीतास्तेभ्यो नमोऽस्तु वः ॥१३०॥

अनेन मन्त्रेणावाह्य कुमुदं सगणं तथा।
अर्घ्यादिभिः समभ्यर्च्य पायसं च निवेदयेत् ॥१३१॥

ततः शङ्खरवै श्चैव काहलस्वनसंयुतैः।
महद्भिस्तूर्यघोष श्च तद्वाद्यश्रावणेन च ॥१३२॥

तत्संगीतै श्च नृत्तै श्च प्रीणयेत्तं गणाधिपम्।
तत श्चाग्नेयकोणस्थं प्राङ्मुखः श्रावयेदिदम् ॥१३३॥

आगच्छतामरगणा आग्नेयया(यी ?)मधिशेरते।
भीमा भीममुखा रौद्राः सपर्यामुद्यतामिमाम् ॥१३४॥

गृहीत्वा पान्तु नस्तृप्ताः कुमुदाक्षानुयायिनः।
महं त्विममुपायान्तु प्रीतास्तेभ्यो नमोऽस्तु वः ॥१३५॥

अनेन कुमुदाक्षं तमावाह्य गणनायकम्।
यथापुरं तोषयित्वा याम्यां
दिशि(म्याशायां ?) ततः परम् ॥१३६॥

आगच्छत पितृगणा गाम्याशां येऽधिशेरते।
दारुणारुणरूपाः स्युः सपर्यामुद्यतामिमाम् ॥१३७॥

गृहीत्वा पान्तु नस्तृप्ताः पुण्डरीकानुयायिनः।
महं त्विममुपायान्तु प्रीतास्तेभ्यो नमोऽस्तु वः ॥१३८॥

अनेन पुण्डरीकाक्षमावाह्य गणनायकम्।
तोषयित्वा च गत्वा च यातुधानदिशं प्रति ॥१३९॥

आगच्छत गणाः क्रूरा नैर्ऋत्यां(तीं ?) येऽधिशेरते।
क्रव्याशनाः क्रूरधियः सपर्यामुद्यतामिमाम् ॥१४०॥

गृहीत्वा पान्तु नस्तृप्ता वामनस्यानुयायिनः।
महं त्विममुपायान्तु प्रीतास्तेभ्यो नमोऽस्तु वः ॥१४१॥

इत्यावाह्य गणेशं तं वामनं पूजयेत्ततः।
पश्चिमाशां ततो गत्वा शङ्कुकर्णं गणेश्वरम् ॥१४२॥

आगच्छताहिपतयः प्रतीच्या(ची ?)मधिशेरते।
महाविषा दन्दशूकाः सपर्यामुद्यतामिमाम् ॥१४३॥

गृहीत्वा पान्तु नस्तृप्ताः शङ्कुकर्णानुयायिनः।
महं त्विममुपायानतु प्रीतास्तेभ्यो नमोऽस्तु वः ॥१४४॥

इत्यावाह्य तमिष्ट्वा च गत्वा वायुदिशं ततः।
आयान्तु गन्धर्वगणा वायव्यां(वीं ?) येऽधिशेरते ॥१४५॥

सुदर्शना भीमवेगाः सपर्यामुद्यतामिमाम्।
गृहीत्वा पान्तु नस्तृप्ताः सर्पनेत्रानुयायिनः ॥१४६॥

महं त्विममुपायान्तु प्रीतास्तेभ्यो नमोऽस्तु वः।
अनेनावाह्य सगणं सर्पनेत्रं तु तोषयेत् ॥१४७॥

उत्तरां ककुभं गत्वा सुमुखं तु गणाधिपम्।
आगमा(यात ?) वै यक्षगणा उदीचीं येऽधिशेरते ॥१४८॥

विरूपा दण्डहस्ता श्च सपर्यामुद्यतामिमाम्।
गृहीत्वा पान्तु नस्तृपताः सुमुखस्यानुयायिनः ॥१४९॥

महं त्विममुपायान्तु प्रीतास्तेभ्यो नमोऽस्तु वः।
इति पूर्ववदावह्य सुमुखं तोषयेत्ततः ॥१५०॥

आयान्तु(त ?) पैशाचगणा ऐशान्यां(नी ?) येऽधिशेरते।
नानाकुत्सितरूपा श्च सपर्यामुद्यतामिमाम् ॥१५१॥

गृहीत्वा पान्तु नस्तृप्ताः सुप्रतिष्ठानुयायिनः।
महं त्विममुपायान्तु प्रीतास्तेभ्यो नमोऽस्तु वः ॥१५२॥

अनेन मन्त्रेणावाह्य संपूज्य च गणाधिपम्।
मध्यं(ध्ये ?)दिशः(शं ?) स्थितो भूत्वा ततो
गगनसंमुखः ॥१५३॥
प्रश्रिगर्भं गणाध्यक्षमावाह्यैनं जपेन्मनुम्।
आगच्छत सिद्धगणा गगनं येऽधिशेरते ॥१५४॥

शुचयः शुचिरूपा श्च सपर्यामुद्यतामिमाम्।
गृहीत्वा पान्तु नसतृप्ताः प्रश्रिगर्भानुयायिनः ॥१५५॥

महं त्विममुपायान्तु प्रीतास्तेभ्यो नमोऽस्तु वः।
अनेन तोषयित्वा तं प्रश्रिगर्भं यथापुरम् ॥१५६॥

अधस्तान्मानवाह्वानं कुर्वन् मन्त्रमिमं पठेत्।
आगच्छातामरगणाः पृथिवीं येऽधिशेरते ॥१५७॥

बहुरूपा बहुमुखाः सपर्यामुद्यतामिमाम्।
गृहीत्वा पान्तु नस्तृप्ता मानवस्यानुयायिनः ॥१५८॥

महं त्विममुपायान्तु प्रीतास्तेभ्यो नमोऽस्तु वः।
इत्यावाह्य क्रमादेतान् तोषयेन्नृत्तपर्श्रमम् ॥१५९॥

समतलास्तथा मत्ततालों लाङ्गलिकस्तथा।
मल्लतालो मङ्गल श्च जयताल श्च भद्रकः ॥१६०॥

ढक्करीसंज्ञकस्तालो ब्रह्मतालस्तथैव च।
अनन्तताल इत्येते दशतालाः प्रकीर्तिताः ॥१६१॥

कुमुदादिगणेशानां स्वरानपि श्रृणु द्विज।
षड्जं(ड्ज ?) ऋंषभगान्धारो(रौ ?) मध्यमः
मञ्चमस्तथा ॥१६२॥

रैवत श्च निषाद श्च धैवतो मध्यमस्तथा।
पञ्च पञ्च(म श्च ?) क्रमेणैव(वं ?)
कथितास्ते दश स्वराः ॥१६३॥

गान्धारराग: कौलयाख्यः कौशिको नटभाषिकः।
श्रीकामद श्च तत्केशी दक्षरागस्तथैव च ॥१६४॥

शालापाल्यभिधा(धो ?) रागो मेघराग श्च पञ्चमः।
इत्येते कुमुदादीनां दश रागाः प्रकीर्तिताः ॥१६५॥

विलासं सर्वतोभद्रं खेटकं चक्रमण्डलम्।
कान्तारं कुट्टिमं पृष्ठकुट्टिमं कटिबन्धनम् ॥१६६॥

वामजानूर्ध्वनृत्तं च आद्यतं च द्वयं पुनः।
एते नृत्तविशेषा श्च कुमुदादेः क्रमात् स्मृताः ॥१६७॥

अन्येषां सर्वदेवानां तालो भद्रः प्रशस्यते।
भवेद्ग रुडतालस्तु पक्षीशस्य तु मध्यमः ॥१६८॥

स्वरो रागस्तु गौडः स्याद्विष्णुक्रान्तं च नृत्तकम्।
विघ्नारेर्जयतालः स्यान्नृत्तं स्वस्तिकमुच्यते ॥१६९॥

ऋषभस्तु स्वरः प्रोक्तो वरालीराग एव च।
इत्थमावाहनं कृत्वा गणेशानां ततो गुरुः ॥१७०॥

आह्वानं दिव्यहेतीनामपि स्वेनैव कारयेत्।
आवाह्यस्तु तथा ब्रह्मा स्वलो(र्लो ?)कस्थैर्मुनी
श्वरैः ॥१७१॥

मरीचिप्रमुखैः सार्धं रुद्र श्च प्रमथे श्वरः।
इन्द्रः सर्वैः सुरगणैर्गायत्र्या चाद्यदेवताः ॥१७२॥

तन्महस्सन्निधानार्थमाहू(ह्वा ?)तव्याः प्रयत्नतः।
इत्यावाह्य च सर्वेषां विधाय द्विजपुङ्गव ॥१७३॥

प्रवेश्याभ्यन्तरं देवं सहर्त्विग्भि श्च मूर्तिपैः।
भेर्यादिवादनज्ञै श्च गायकैर्नृत्त(र्नर्त ?)कैरपि ॥१७४॥

नित्योत्सवस्य प्रतिमामरोप्य शिबिकादिषु।
सुदर्शनं वा परितो ग्रामं नीत्वा प्रदक्षिणम् ॥१७५॥

पूर्वोक्तेन क्रमेणैव दिशासु विदिशासु च।
इन्द्रादीनां महे तस्मिन् प्रार्थयित्वा च सन्निधिम् ॥१७६॥

चतुर्मुखं ग्राममध्ये समावाह्य सभाज्य च।
सन्निधिं प्रार्थ्य रुद्रस्य सगणस्य च सन्निधिम् ॥१७७॥

संप्रार्थ्य भेरीं संताड्य गीतं नृत्तं प्रदर्श्य च।
मध्ये मध्ये च गरुडतालं संशोध्य(?) देशिकः ॥१७८॥

अन्तः प्रविश्य गरुडध्वजस्तम्भस्य सन्निधौ।
सर्वदेवतसंनादं कारयित्वा च गायकैः ॥१७९॥

गापयित्वा सर्वगीतीर्नर्तकीभि श्च नर्तनम्।
कारयित्वा प्रविश्यान्तर्देवं विज्ञाप्य सादरम् ॥१८०॥

प्रणम्य स्वगृहं यायात् प्रसन्नो गुरुरात्मवान्।
भेरीताडनवेलायां तन्नादश्रावको जनः ॥१८१॥

नदीं तीर्त्वा न गच्छेत्तु न यायाद्योजनात् परम्।
उत्सवावभृथं यावद् ग्रामे तत्रैव संवसेत् ॥१८२॥

मङ्गलाङ्कुरवापस्तु कृतो येन ध्वजोत्सवम्(वे ?)।
स एवावभृथं यावदुत्सवस्य गुरुर्भवेत् ॥१८३॥

तत्रागन्तुं न शक्त श्चेत् तत्सुतः शिष्य एव वा।
अनुज्ञातस्तु यः कर्श्चिदह्नायाथ समापयेत् ॥१८४॥

उत्सवारम्भदिवसात् पूर्वस्मिन् सप्तमेऽहनि।
मङ्गलाङ्कुरसंवापं कारयेद्देशिकोत्तमः ॥१८५॥

षट्त्रिंशतं पालिकानां शरावाणां च तावती(तीम् ?)।
तत्प्रमाणा श्च घटिका समानीय विचक्षणः ॥१८६॥

पात्रेषु त्रिविधेष्वेषु वापयेन्मङ्गलाङ्कुरान्।
उत्सेधः पालिकानां स्याद्धस्तः सैकाङ्गुलो मुने ॥१८७॥

अङ्गुल्यः षोडश भवेत्तासामाननविस्तृतिः।
सप्ताङ्गुलं पादपीठं विस्तारः साङ्गुलः करः ।१८८॥

अष्टाङ्गुलंः पादपीठं विस्तारः साङ्गलः कर।
मोहिनीपुष्पसंकाशं पद्मभं तन्मुखं भवेत् ।१८९॥

पञ्चवक्त्रास्तु घटिका द्वाविंशत्यङ्गुलोच्छ्रयाः।
मध्ये घटोपमाकाराः षडङ्गुलमितं भवेत् ॥१९०॥

वक्त्रं तासां मध्यसंस्थं चतुरङ्गुलसंमितम्।
चतुर्दिक्षु मुखानां स्यात् प्रमाणं द्विजपुङ्गव ॥१९१॥

उच्छ्रायस्तु शरावाणं विंशदङ्गुलसंमितम्(तः ?)।
विस्तार श्च वितस्तिः स्यात् त्रिधैवं पात्रकल्पना ॥१९२॥

हैमं रौप्यं ताम्रजं वा कल्पयेत् पात्रसञ्चयम्।
यथाविभवविस्तारं सर्वाभावे तु मृण्मयम् ॥१९३॥

इत्थमष्टोत्तरशतमुत्तमा क्लृप्तिरिच्यते।
मध्यमायां कल्पनायां प्रत्येकं षोडशं(?) भवेत् ॥१९४॥

तदर्धमधमं प्रोक्तं यथासंभवमेव वा।
देवकर्मणि युग्माः स्युरयुग्मा मानुषे विधौ ॥१९५॥

पालिका एव वा ग्राह्या मङ्गलाङ्कुररोपणे।
सुशुभे विजने देशे कुर्यान्मण्डपमुत्तमम् ॥१९६॥

मङ्गलाङ्कुरवापार्थं स्तम्भैः षोडशभिर्युतम्।
चतुर्द्वारं प्रतिद्वारं दुग्धवृक्षसमुद्भवैः ॥१९७॥

भूषितं तोरणवरैर्दर्भमालासमावृतम्।
पराघ्यक्षौमनिचयैः(य ?) प्रकल्पितवितानकम् ॥१९८॥

वितानाधोलम्बिताभिर्मुक्तास्त्रग्भिर्विभूषितम्।
क्षैमैर्महार्घैः (महार्घक्षौम ?)
संवीतस्तम्भसंचयमद्भुतम् ॥१९९॥

गोमयालेपिततलं सुधाचूर्णप्रकल्पितैः।
रेखागणैरब्जकुलैर्विराजिततलं शुभैः ॥२००॥

प्रदीपनिकरैर्बद्धं(युक्तं ?) तैलसंपूर्णमल्लिकैः(?)।
विभूषितं मुक्तपुष्पैराकीर्णं साक्षतैः सितैः ॥२०१॥

ध्वजमालापरिवृतं धूपामोदितदिङ्मुखम्।
प्रकल्प्य मण्डपवरमेवंविधमुदारधीः ॥२०२॥

मृत्तिकाग्रहणं कुर्याच्छुभे लग्नेऽथ देशिकः।
सशङ्खकाहलगणं तूर्यघोषनिनादितम् ॥२०३॥

वेदविद्भिर्द्विजगणैः श्वेतस्त्रग्वस्त्रधारिभिः।
ऊर्ध्वपुण्ड्रैर्द्वादशाभिः श्वेतमृत्स्नाविनिर्मितैः ॥२०४॥

विभूषिताङ्गसंघातैः शान्तैर्दान्तैर्जितेन्द्रियैः।
महाभागवतै श्चैव *संमुख प्रागुदङ्मुखः*(?) ॥२०५॥

सस्यानां पावनं शुद्धं गत्वा क्षेत्रमनुत्तमम्।
शुचिस्तत्र खनित्रं च संक्षाल्याद्भिः समाहितः ॥२०६॥

खात्वा वाराहमन्त्रं च (खनित्वा वाराहमन्त्रं ?)
पठेत् पात्रे हिरण्मये।

निधाय च मृदं क्षौमैर्नवैराच्छाद्य शोभनैः ॥२०७॥

पुष्पस्त्रग्भिरलंकृत्य गजस्यन्दनसंस्थितैः।
ऋत्विग्भिर्वाहयेच्छत्रच्छायातः(धः ?)संस्थितैर्द्विज ॥२०८॥

विष्वक्सेनं समारोप्यस्यन्दने वा गजेऽथवा।
शिबिकायामथा श्वे वा यथादेवं विभूष्य च ॥२०९॥

मुक्ताच्छत्रादिभिः सर्वै श्चामरै श्च सुशोभितम्।
उह्यमानं द्विजवरैर्नयेत् सार्धं द्विजोत्तमः ॥२१०॥

बह्वचैः शाकुनं सूक्तं पठद्भिः सहितो मुने।
श्रीसूक्तं पुरुषसूक्तं च (पौरुषं सूक्तं ?) साम
चोद्घोष्य सर्वतः ॥२११॥

ग्रामं प्रदक्षिणं कृत्वा धाम चापि परीत्य वै।
प्रविश्य मण्डपवरं प्रागुक्तं(?) सूर्तिपान्वितः ॥२१२॥

आचार्यो मूर्तिपै श्चैव सर्वतः प्रावृतैर्मुने(?)।
नवीनक्षौमवसनाः सोत्तरीयाः स्वलंकृताः ॥२१३॥

उष्णीषधारिणो रत्नमुद्राशोभितपाणयः।
स्वनुलिप्ताः स्त्रग्विण श्च कुण्डलालंकृताननाः ॥२१४॥

पवित्रपामय श्चैव सोर्ध्वपुण्ड्राः सुचेतसः।
पादप्रक्षालनं कृत्वा स्वाचान्ता मूलविद्यया ॥२१५॥

शुकव्यासवसिष्ठदिमुनिमुख्योपमा द्विजाः।
संप्रोक्ष्याङ्कुरवापार्थं भूमिं शुद्धेन चाम्भसा ॥२१६॥

अस्त्रमन्त्रप्रजप्तेन(प्तानि ?) कुशाग्रस्थापितेन(तानि ?) वा।
सूत्राणि चन्दनक्षोदसिक्तानि स्फालयेत् क्रमात् ॥२१७॥

प्राच्यादि प्रथमं सूत्राण्युदीच्यां द्वादश स्फुटम्।
पातयित्वा पञ्चदश तथोदीच्यानि कल्पयेत् ॥२१८॥

दिक्ष्वष्टासु तथा मध्ये द्वादशद्वादशैव तु।
स्थापनीयाः पालिकाद्याः शतमष्टाधिकं क्रमात् ॥२१९॥

ब्रह्मेन्द्ररुणेषु स्याद् घटिकानां गणो मुनें।
स्थापयेद्वहिनिर्ऋतियमभागेषु पालिकाः ॥२२०॥

शरावान् मारुतशशिरुद्रभागेषु कल्पयेत्।
अथवा नवसूत्राणि प्राचीनानि प्रकल्पयेत् ॥२२१॥

एकादशेतराणि स्युरुदीचीनानि काश्यप।
एतत्क्रमेण सर्वेषां विधिवत्स्थापनं भवेत् ॥२२२॥

सर्वत्र पालिका वा स्युरन्याभावे द्विजोत्तम।
क्षालयेद्विष्णुगायत्र्या पालिकादि क्रमेण च ॥२२३॥

बिलमूलानि संपूर्य शष्पकाशतृणैर्दृढम्।
तदूर्ध्वं प्रथमं मृद्भिः पूरयित्वा ततोपरि(?) ॥२२४॥

उपाहृताभिः सरितो वालुकाभिः प्रपूरयेत्।
चूर्णितैर्गोकरीषै श्च बिलशेषं प्रपूरयेत् ॥२२५॥

कोष्ठान्यष्टशतान्यादौ प्रत्येकं शिवशालिभिः।
वृत्तं वा चतुरश्रं वा विधायोपरि विन्यसेत् ॥२२३॥

ब्रह्मादीशानपर्यन्तं प्रथमं घटिकागणम्।
स्थापयेत् परमेष्ठ्याख्यमन्त्रेण प्रथमं द्विज ॥२२७॥

विन्यसेद्वि श्वमन्त्रेण शरावांस्तदनन्तरम्।
सर्वेषां स्थापनं कुर्यात्प्राङ्मुखो वाप्युदङ्मुखः ॥२२८॥

वासोभिर्वेष्टयेत् प श्चात् प्रत्येकं मूलविद्यया।
अशक्त श्चेत् प्रतिगृहं छादयेद्वाससोपरि ॥२२९॥

धान्यराशौ शुभं कुम्भं तन्तुभिर्वेष्टितं नवम्।
वेष्टितं क्षौमयुग्मेन गन्धोदकसुपूरितम् ॥२३०॥

निक्षिप्तनवरत्नं तु स्थापयेन्मूलविद्यया।
बिम्बे च मण्डले कुम्भे पावकेषु चतुर्ष्वपि ॥२३१॥

स्थानेषु पूजयित्वाग्रे भगवनतमनन्यधीः।
अर्घ्याद्यं च निवेद्यान्तं देवदेवस्य सन्निधौ ॥२३२॥

मङ्गलाङ्कुरवापं तु कुर्याद्देशिकसत्तमः।
अथवैकत्र कुम्भे वा देवमिष्ट्वा द्विजोत्तम ॥२३३॥

शालि(लीन् ?) मुद्गां श्च नीवारान् श्यामाकान् सप्रियङ्गुकान्।
तिलान् यवान् सगोधूमानन्यानपि च याज्ञिकान् ॥२३४॥

एकपात्रे विनिक्षिप्य हैमे महति शोभने।
मूर्ध्नि विन्यस्य तत्पात्रं धाम कृत्वा प्रदक्षिणम् ॥२३५॥

कुर्यात् काहलशङ्खादिसंघोषणसमन्वितम्।
अन्तः प्रविश्य देवस्य दर्शयित्वा च मण्डपम् ॥२३६।

प्रदक्षिणमथानीय पालिकाद्यैन्द्र भूतले।
भारतण्डुलसंक्लृप्ते पद्मेऽष्टदलसञ्चिते ॥२३७॥

क्षीरेण क्षालयित्वा च प्रच्छाद्य नववाससा।
पुण्याहघोषणं कृत्वा शङ्खतूर्यादिसंयुते(तम् ?) ॥२३८॥

क्रमेण पालिकादीनामधिदेवान् यजेत च।
ब्रह्माणं घटिकानां च पालिकानां च केशवम् ॥२३९॥

शरावाणां त्रिणयनं घृतारोपणमाचरेत्।
द्वारेषु तोरणगणान् ध्वजान् कुम्भाष्टकं तथा ॥२४०॥

गणनाथान् समभ्यर्च्य कुमुदादीन् यथाविधि।
इन्द्रादीनपि चाभ्यर्च्य सोमकुम्भे सुधाकरम् ॥२४१॥

आवाह्याभ्यर्च्य सघृतं पायसं च निवेदयेत्।
घृताहुतिशतं हुत्वा चतस्त्रः समिधस्तथा ॥२४२॥

व्यूहमन्त्रै श्च जुहुयात् सूक्तेन च तथा चरुम्।
हुत्वा पूर्णां विधायाथा घृताहुतिशतं हुनेत् ॥२४३॥

संस्पृश्य स्पर्शमन्त्रेण संपाताज्येन पालिकाम्।
बीजपात्रे च संपातघृतशेषं विनिक्षिपेत् ॥२४४॥

जप्त्वा(?) चाष्टशतं वारान् सोममन्त्रमनन्यधीः।
लग्ने सुशोभने प्राप्ते ब्राह्मणानामनुज्ञया ॥२४५॥

पालिकादिषु बीजानि वापयेन्मूलविद्यया।
ब्रह्मादीशानपर्यन्तं वापयेत् सकलं गुरुः ॥२४६॥

अन्येऽप्याचार्यसंमत्या विदध्युर्बीजवापनम्।
सिक्त्वा च पुष्पपयसा साधयेच्च विधानकैः ॥२४७॥

बलिं दत्वा च सर्वासु दिक्षु रक्षणकारणात्।
कुमुदादिगणेशेभ्यो दिवानक्तं बलिं ददेत् ॥२४८॥

पायसेन प्रतिदिनं सोमराजं यजेत च।
अनिर्वाणांस्तथा दीपान् कारयेच्च समाहितः ॥२४९॥

द्विजेन्द्रान्स्तोषयेत् प्राज्यैस्ताम्बूलैः पूगिकाफलैः।
यजमानः प्रयत्नेन गुरुं समभितोषयेत् ॥२५०॥

अङ्कुराणां प्रवृद्ध्यर्थं हरिद्राभिर्निषेचयेत्।
पीतेष्वङ्कुजातेषु शुक्लेषु च शुभं भवेत् ॥२५१॥

अशुभं विपरीतेषु प्ररूढेषु परीक्षयेत्।
यत्कर्मोद्दिश्य येनैवमङ्कुरारोपणं कृतम् ॥२५२॥

आ समाप्तेः स एवास्य कर्मणः कारको भवेत्।
तस्याशक्तिर्यदि भवेन्मरणं वाथ तत्सुतः ॥२५३॥

तच्छिष्यो वा विदध्यात्तत् ऋत्विग्वा तदनुज्ञया।
प्रतिष्ठायां च दीक्षायामुत्सवे धामनिर्मितौ ॥२५४॥

विषुवे चायने चैव ग्रहणे चन्द्रसूर्ययोः।
पवित्रारोपणे चैव कह्लारदमनोत्सवे ॥२५५॥

वैशेषिकेषु चान्येषु शयनोत्थानयोरपि।
शान्तिके पौष्टिके चैव कर्मण्यारिप्सिते सति ॥२५६॥

मङ्लाङ्कुरसंवापं कुर्यादेवमतन्द्रितः।

इति पञ्चरात्रे महोपनिषदि वि श्वामित्रसंहितायां
अङ्कुरार्पणविधिर्नाम
सप्तदशोऽध्यायः॥

* * *

अष्टादशोऽध्यायः॥

वि श्वमित्र :-

उत्सवारम्भदिवसात् प्रागेव ग्रामवीथयः।
संशोधनीयाः सर्वाः स्युरुद्धृत्यावकरानपि ॥१॥

सर्वेषु चत्वरेष्वेव कल्प्यास्तोरणराजयः।
फलभारानताः कल्प्याः कदल्यः क्रमुका अपि ॥२॥

वीथीमध्येषु सिकताः प्रसार्याः समता यथा।
ध्वजै श्च दर्भमालाभिः प्रभा(पा ?)भिः शोभयेदपि ॥३॥

आप्लुत्य गोमयाम्भोभिः ककुभ श्च विशोधयेत्।
भित्तयो गेहराजीनां पञ्चवर्णविचित्रिताः ॥४॥

वेदिकाः पूर्णकुम्भै श्च साङ्कुरैः पालिकागणैः।
सर्वतो दीपिकाभि श्च गन्धतैलाक्तवर्तिभिः ॥५॥

भूषिताः कमनीयाः स्युः क्षौमशोभितनीविकाः।
उत्सवे देवदेवस्य सेवाकौतुकिनां नृणाम् ॥६॥

देशान्तरादागतानामन्नाद्यं कल्पयेदपि।
गन्धोदकैः सुसंपूर्णाः कार्याः पानीयशालिकाः ॥७॥

समागतेषु रोगार्ता भवेयुर्यदि तत्कृते।
सर्वौषधीनां संभाराः संकल्प्याः स्युर्दृढं द्विज ॥८॥

अपूर्वशयनार्थ(?) च मञ्चाः कार्या सुशीतलाः।
सर्ववस्तुषु(सु ?)संपूर्णाः कार्या विपणिवीथयः ॥९॥

कूपाः सर्वे निपानाढ्याः करणीयाः समन्ततः।
आवृतौ प्रथमायां वा द्वितीयावरणेऽथवा ॥१०॥

यथावकाशं कुर्वीत महान्तं यागमण्डपम्।
चतुर्द्वारसमायुक्तं विस्तारायामतः समम् ॥११॥

मण्डपस्य चतुर्दिक्षु प्रपां च परिकल्पयेत्।
कुर्यान्मण्डपमध्ये तु वेदिं हस्तसमुच्छ्रिताम् ॥१२॥

द्वित्रिहस्तसमायुक्तां तावद्विस्तारसंयुताम्।
तस्याः पूर्वदिशो भागे चतुरश्रं प्रकल्पयेत् ॥१३॥

कुण्डमाहवनीयाग्नेर्याम्ये च धनुराकृति।
दक्षिणाग्नेः प्रतीच्यां तु वृत्तं सभ्यं च कल्पयेत् ॥१४॥

सौम्यभागे त्रिकोणं स्यादैशान्यां चतुरश्रकम्।
आग्नेय्यां वा प्रकर्तव्यमावसथ्यं तु(त्यस्य ?)
धिष्णियम् ॥१५॥

एवं पञ्चाग्निसंयुक्तमुत्सवं विदधीत वा।
आवसथ्यविनाभूतचतुर्दिक्संस्थपावकम् ॥१६॥

सभ्यावसथ्यरहितं यद्वाग्नित्रयसंमितम्।
अथवाहवनीयाग्निमेकं वा कल्पयेद् द्विज ॥१७॥

क्षीरद्रुमै श्चतुर्द्वारि तोरणानि प्रकल्पयेत्।
स्रुक् स्रुवौ कारयेदष्टमङ्गलानि यथापुरम् ॥१८॥

तैरेव ऋत्विजां कल्प्यान्यासनानि मनीषिणा।
नानाविधानि होमार्थपात्राण्यपि च कारयेत् ॥१९॥

मण्डपां श्च प्रपा श्चैव लेपयेद्गोमयाम्भसा।
सुधाचूर्णै श्चत्रयित्वा क्षौमैरपि वितानयेत् ॥२०॥

कौशेयक्षौमवसनैः स्तम्भानपि च वेष्टयेत्।
आचार्यां श्चतुरः पूर्वान् वरयेत् षोडशर्त्विजः ॥२१॥

परिचारान् बहुविधान् स्वीकुर्यात् कर्मवानपि।
भूषयेत्तानभिनवैर्वासोभिः कटकादिभिः ॥२२॥

भूषणै श्च यथावित्तमधिकारानुरूपतः।
उत्तरीयै श्च सोष्णीषैरनुलेपनवस्तुभिः ॥२३॥

उत्सवारम्भदिवसे तथान्यैः स्नापयेदपि।
कुम्भैरष्टशतैर्देवं सर्वमङ्गलसंयुतम् ॥२४॥

उत्सवारम्भदिवसात् पूर्वस्मिन् दिवसे गुरुः।
देवस्य कौतुकं बध्वा देव्यो श्च तदनन्तरम् ॥२५॥

हेम्ना निष्कप्रमाणेन सूत्रमेकं प्रकल्पयेत्।
तदर्धसंमितं सूत्रत्रयं निर्मापयेदपि ॥२६॥

सौवर्णे राजते वापि पात्रे कलमतण्डुले।
भाराद्य(?)संमिते पूर्वं स्वर्णसूत्रचतुष्टयम् ॥२७॥

निधाय पूगजफलैरभिन्नैः शतसंमितैः।
ताम्बूलानां दलैः सार्धं चतुः शतमितैः सह ॥२८॥

कदल्यादिफलैः सार्धं साधारं न्यस्य मूर्धनि।
आच्छाद्य क्षौमवस्त्रेण छत्रचामरसंयुतम् ॥२९॥

दीपिकाशतसंयुक्तं सवितानं च मूर्तिपः।
बहुशो ब्राह्मणैः सूक्तं पठद्भिः शाकुनं पुनः ॥३०॥

धाम प्रदक्षिणं नीत्वा बहिरावरणानि च।
कुर्यान्मङ्गलदीपै श्च प्रविशेद्देवसंनिधिम् ॥३१॥

भूतले गोमयजलैरालिप्ते चतुरश्रके।
पूरिते शालिभारेण पात्रं विन्यस्य देशिकः ॥३२॥

पुण्याहवाचनं कृत्वा यथाविधि सभाज्य च।
गुरुर्गृहीत्वा सूत्राणि चन्दनक्षोदवारिणा ॥३३॥

साङ्गुष्ठेना(ष्ठया ?) नामिकया संमृज्यास्त्रेण देशिकः।
बन्धयेदुत्सवार्चाया दक्षिणे पाणिपङ्कजे ॥३४॥

देव्योर्वामकरे बध्वा गुरोः सव्येतरे करे।
एवं चतुष्टयं बध्वा प्रत्येकं शतसंमितम् ॥३५॥

स्पृष्ट्वा दक्षिणहस्तेन जपेदस्त्रमनुं बुधः।
देवमर्घ्यादिभि श्चेष्ट्वा महापूपान् निवेदयत् ॥३६॥

अपूपान् पृथुकाँल्लाजान् फलानि विविधानि च।
नृत्तगीतादिकं सर्वं देवस्याग्रे विधाय च ॥३७॥

देवं विज्ञाप्य तत्स्थानादन्यत्र विनिवेश्य च।
तित्राभिषेकप्रभृति नैवेद्यान्तं सभाज्य च ॥३८॥

प्रतिष्ठोक्तेन विधिना शयने स्वास्तृते शुभे।
शाययित्वा च देवेशं शास्त्रादिपठनान्वितम् ॥३९॥

जागरेण निशां नीत्वा श्वोभूते उदति रवौ।
उत्तिष्ठेत्यादिमन्त्रेण देवमुत्थाप्य बह्वचैः ॥४०॥

पठद्भिः शाकुनं सूक्तं सदेदं विष्णुरित्यृचम्।
सौवर्णशिबिकां देवमारोप्य प्रभया सह ॥४१॥

वाहयित्वा द्विजवरैर्गरुत्मद्ध्ययिभिः प्रभुम्।
सर्वमङ्गलसंयुक्तं सर्वावरणभूमिषु ॥४२॥

प्रदक्षिणेन संचार्य दुकूलास्तरणास्तृते।
सौवर्णे सर्वरत्नाढ्ये शाखांसचयशोभिनः ॥४३॥

अधस्तात्कल्पवृक्षस्य सिंहपादष्टकान्विते।
हैमे समस्तरत्नौघरचिते चासनोत्तमे ॥४४॥

आसयित्वा बहुविधजनसंघातमध्यतः।
उत्सवार्थं समानीतं हेमरत्नसमन्वितम् ॥४५॥

कौशेयक्षौमकार्पासवासोनिकरसंयुतम्।
पनसाम्रकदल्यादिफलसंपत्समन्वितम् ॥४६॥

बृहतीकारवल्यादिसर्वव्यञ्जनसंयुतम्।
सुपक्वनालिकेराढ्यमुद्ग भेदविचित्रितम् ॥४७॥

गुलमूलैस्तु बहुभिर्निर्मि श्चतैः कटकास्थितैः।
शर्करराशिभिस्तुङ्गैः सर्वतः समलंकृतम् ॥४८॥

सौरभ्य(?)निर्मलाकारचन्दनद्रुमसंकुलम्।
एलालवङ्गत(क ?)क्कोलजातिराशिसुशोभितम् ॥४९॥

हिमाम्बुपात्रसंपूर्णं वंशनालीषु संभृतैः।
कर्पूरनिकरौघै श्च कुङ्कुमैः पात्रसंचयैः ॥५०॥

कस्तूरीभिर्मृगमदैस्तत्तद्भोजनसंचितैः।
संपूर्णं प्राभृतगणमाहृतं सात्त्विकैर्गुणैः ॥५१॥

भूषितैः सर्वभूपालैर्नानादिग्भ्यः समाहृतम्।
दशयित्वा दर्शनीयं जनानां विस्मयास्पदम् ॥५२॥

तोषयित्वा च देवेशं विनोदैरेवमादिभिः।
गीतैर्नृत्तादिभि श्चैव तोषयित्वा जनार्दनम् ॥५३॥

स्नापयित्वा च कलशैरेकाशीतिमितैर्विभुम्।
यथाविभवविस्तारं सर्वसंभारसंभृतैः ॥५४॥

अलंकृत्य च रत्नौघसंचितैर्भूषणोत्तमैः।
सर्वव्यञ्जनसंयुक्तं निवेद्य च महाहविः ॥५५॥

कुम्भे च मण्डले देवमाराध्य पुरुषोत्तमम्।
प्राप्तेऽपराह्णसमये गृहीत्वाङ्कुरमृत्तिकाम् ॥५६॥

विधिना पूर्वदृष्टेन विधायाङ्कुरवापनम्।
यजमानेन सहितः प श्चाद्देशिकसत्तमः ॥५७॥

गत्वा च देवनिकटं साष्टाङ्ग प्रणिपत्य च।
प्रार्थयित्वौत्सवं बिम्बं बध्वा मङ्गलकौतुकम् ॥५८॥

स्नानबल्यर्थयो श्चैव बध्वा प्रतिमयोरपि।
हेतिराजस्य च तथा कृत्वा कौतुकबन्धनम् ॥५९॥

पूर्ववत्कल्पितेऽन्यत्र शयने त्वधिवास्य तान्।
सद्य उत्थाप्य चाराध्य धाम नीत्वा प्रदक्षिणम् ॥६०॥

यागमण्डपमासाद्य स्नानबिम्बं सुदर्शनम्।
आसने संनिवेश्यैव वेदिकायां विधाय च ॥६१॥

पीठं धान्यमयं पूर्वचोदितक्रमयोगतः।
घटान् प्रक्षालिताँस्तन्तुसंवृतान् नव पूरितान् ॥६२॥

गन्धोदकेन विन्यस्तरत्नान् क्षौमाभिवेष्टितान्।
सर्वगन्धद्रव्ययुक्तान् स्वर्णनिष्कसमन्वितान् ॥६३॥

एवंविधं च करकं कृत्वा तेषां मुखेष्वपि।
अ श्वत्थदलसंमिश्रान् कुशकूर्चान् निधाय च ॥६४॥

अपिधाय लतै(च तान् ?) भूमौ धान्याराशिषु निक्षिपेत्।
मध्यकुम्भं विनान्येषां वस्त्रमेकं दशान्वितम् ॥६५॥

दशहस्तायतं सूक्ष्मं सु श्लिष्टं परिकल्पयेत्।
दिक्ष्वष्टासु स्थापयित्वा कुम्भानष्टौ प्रदक्षिणम् ॥६६॥

मध्ये सकरकं कुम्भं दशभारप्रमाणके।
धान्यराशौ प्रतिष्ठाप्य मूलबेरं घटेऽर्चयेत् ॥६७॥

सुदर्शनं च करके वासुदेवादिकान यजेत्।
प्रधानदिक्संस्थे(संस्थिते ?)षु कुम्भेषु च यथाक्रमम् ॥६८॥

आग्नेयादिषु कोणेषु पुरुषं सत्यमच्युतम्।
अनन्तं च सभाज्यैव पायसादीन्(दि ?)निवेदयेत् ॥६९॥

हवि श्चतुष्कं कुम्भेषु बलिबिम्बे च नित्यशः।
मङ्गलान्यष्ट वासोभिर्वेष्टयित्वा पृथक् पथक् ॥७०॥

निवेशयेत्ततोऽधस्ताद्धान्यराशिषु च क्रमात्।
शङ्खं चक्रं च लक्ष्मीं च पूर्णकुम्भं जलेन च ॥७१॥

श्रीवत्सं दर्पणं चैव स्वस्तिकं मत्स्ययोर्युगम्।
एतानि मङ्गलान्यष्टौ विनिवेश्य यथाक्रमम् ॥७२॥

चतुर्दिक्षु चतुर्वेदघोषणं कारयेत् क्रमात्।
चतुरो वासुदेवादीन् ध्यात्वा प्राच्यादिशु क्रमात् ॥७३॥

अन्तिमे मूलबेरं च ध्यात्वा कोणेष्वनुक्रमात्।
यावत्तीर्थावसानं च संनिधिं प्रार्थ्य देशिकैः ॥७४॥

वृतै श्चतुर्भिराचार्यो जुहुयादात्मपञ्चमैः।
पञ्चस्वग्निष्वपि तथा पायसापूपपूर्वकः ॥७५॥

तिलैस्त्रिभिर्यवै श्चैव पृथगष्टोत्तरं शतम्।
तत्तन्मन्त्रैर्हुने(?)तत्र देवताध्यानपूर्वकम् ॥७६॥

अष्टाविंशतिवारान् वा कुण्डेषु प्रागुपक्रमः।
पायसं कृसरं गौल्यं हरिद्रान्नं च मौद्गकम् ॥७७॥

पृथगग्निषु होतव्यं पुंसूक्तेन च पञ्चसु।
ब्रह्मादिदेवतोद्देशात् परमान्नेन पञ्चमे ॥७८॥

नाम प्रोच्य चतुर्थ्यन्तं स्वाहान्तं जुहुयात् क्रमात्।
परिवारपदोपेतं तत्तद्ध्यानपुरस्सरम् ॥७९॥

ब्रह्मा प्रजापती रुद्राः सर्वे देवा यथाक्रमम्।
छन्दांसि वेदा ऋषयो गन्धर्वा श्च सरीसृपाः ॥८०॥

यक्षा श्चाप्सरसो मासा वत्सरा देव्य एव च।
सर्वशब्दादिका श्चाब्धिपर्वता* श्चापिहा*(?)अपि ॥८१॥

भूतानि पशवो वृक्षा ओषध्यः सवनस्पतीः(?)।
औद्भिदाः (उद्भिदः ?) स्वेदजा श्चैव
साण्डजा श्च जरायुजाः ॥८२॥

भूरादयः सप्तलोकाः पाताला(?) अतलादयः(?)।
चण्डादय श्चाप्यतेभ्यो जुहुयान्मूलविद्यया ॥८३॥

पूर्णाहुतिमिदं विष्णुरिति प्रोच्य समाचरेत्।
प्रहरेन्नैव परिधीन् न दर्भां श्चोत्सवावधि ॥८४॥

देवान् नोद्वासयेच्चैव प्रत्यहं वह्निधारणम्।
विदधीत प्रतिदिनं जुहुयाच्च यथाविधि ॥८५॥

चतुष्टये त्रयेऽग्नीनां द्वयोरेकत्र वा स्मरेत्।
यागमण्डपमारभ्य बलिदानं समाचरेत् ॥८६॥

सुदर्शनं च बल्यर्चामन्त्रमूर्तिसमन्विताम्।
आदाय च विनिष्क्रम्य तद्द्वारे कुमुदादिकान् ॥८७॥

अर्चयित्वा पुरो भूम्रा(मौ ?) शुचौ दद्याद्बलिं ततः।
बलिपात्रं पुष्पपात्रमर्घ्यपात्रं च कर्तरीम् ॥८८॥

दीपपात्रं धूपपात्रं दीपां श्च परिचारकान्(काः ?)।
एकैकशो गृहीत्वाग्रे गच्छन्त्व*न्यत्पुरः सराः*(?) ॥८९॥

अन्नमूर्तिस्ततो गच्छेत्तस्मादर्वाक् सुदर्शनः।
नित्योत्सवार्चा तदनु क्रमेणानेन देशिकः ॥९०॥

दापयेच्च बलिं कैं श्चत् तद्योग्यैः परिचारकैः।
चण्डादिप्रथमं दद्याद् द्वारेष्वावरणेष्वपि ॥९१॥

दत्वा नित्योत्सव इव बलिं दत्वा सभाज्य च।
ग्राममध्यं समारभ्य ब्रह्मादीशान्तमर्चयेत् ॥९२॥

तत्तळेशेषु सर्वेभ्यो बलिं दत्वावशेषितम्।
महापीठे पारिषदान् सर्वानुद्दिश्य निक्षिपेत् ॥९३॥

गुरुः सुलग्ने संप्राप्ते शयानं कौतुकं तथा।
उत्तिष्ठेति पठन्मन्त्रमुत्थाप्य शयनाच्छुभात् ॥९४॥

स्वस्तिसूक्तमुखैर्विप्रैः सह निष्क्रम्य धामतः।
रथन्तरं साम पठन् रथमारोपयद् बुधः ॥९५॥

कल्पद्रुमसमायुक्तं हैमशैलमिवापरम्।
गजोत्तमै श्चतुर्भिर्वा वाजिश्रैष्ठैः सुयोजितम् ॥९६॥

पुरः स्थितं(?) सारथिना नयेद्यन्त्रेण देशिकः।
अथवा वेदपठनं कुर्वद्भिर्द्विजपुंगवैः ॥९७॥

महापाशैः सुबद्धै श्च नयेदाकृष्य तं रथम्।
रथाभावे गजं वा श्वं शिबिकां वाधिरोपयेत् ॥९८॥

भद्रं कर्णेतिमन्त्रेण वाहनान्यधिरोपयेत्।
हैमया प्रभया युक्तं पुष्पस्त्रग्भिरलंकृतम् ॥९९॥

सौवर्णेन विमानेन कूटाकारेण शोभितम्।
आरोप्य यानप्रवरं तत्राभ्यर्च्य यथाविधि ॥१००॥

देवदेवं ततस्तस्मै पृथुकापूपसंचयम्।
ताम्बूलं च निवेद्याथ घृताक्तैर्दीपिकागणैः ॥१०१॥

वृतः सर्वत्र निनदं वाहयेद् द्विजपुंगवैः।
धवलाम्बरसंवीतैर्मूर्ध्नि वेष्टनसंयुतैः ॥१०२॥

सकञ्चुकैर्दधानै श्च चामरव्यजनानि च।
तालवृन्तान्यनेकानि मौक्तिकातपवारणम् ॥१०३॥

धूपपात्रणि बहुशो धारयद्भिः समन्ततः।
पुरो यन्त्राधिरूढेन रचिताञ्जलिपाणिना ॥१०४॥

आरूढेन ध्वजवरं तार्क्ष्येण च निषेवितम्।
प श्चाच्च स्वर्णशिबिकारूढेन कनकोज्ज्वलम् ॥१०५॥

वेत्रदण्डं दधानेन समुत्सरयतासुरान्।
सेव्यमानं दधानेन पादुके स्वर्णनिर्मिते ॥१०६॥

उपानद्युगले(लं ?) चैव प्रत्युप्तं रत्नराशिना।
सौवर्णपात्रनिक्षिप्तान्(प्तं ?) बिभ्राणैः शिरसा द्विजैः ॥१०७॥

गजोत्तमसमारूढैः छत्रच्छायासु संस्थितैः।
निषेव्यमाणं देवेशं नातिशीघ्रं न लम्बितम् ॥१०८॥

प्रदक्षिणं नयेद्धामसर्वाभ(व ?)रणभूमिषु।
अधीयानै श्च चतुरो वेदान् साङ्गा श्च समन्ततः ॥११०॥

इतिहासपुराणानि पठद्भिः स्तोत्रपद्धतिम्।
गायद्भि श्च हसद्भि श्च नृत्यद्भि श्च समन्ततः ॥११०॥

भिन्ना श्च बहुधा भाषा भाषमाणै श्च सर्वशः।
वावदूकैर्बहुविधैः सर्वशास्त्रेषु निष्ठितैः ॥१११॥

सांख्ययोगविभागज्ञैः शाब्दिकैस्तत्त्वचिन्तकैः।
सांवत्सरगणै श्चैव परस्परजयोद्यतेः ॥११२॥

पञ्चरात्रार्थनिपुणैः सेवितैः सात्त्विकैर्द्विजैः।
काषायवसनै श्चैव यतिभिर्जपनिष्ठितैः ॥११३॥

एकदण्डधरै श्चैव त्रिदण्डधरणैरपि।
ग्रामवीथीः समन्ताच्च परिभ्राम्य प्रदक्षिणम् ॥११४॥

प्रवेशसमये चापि धाम्नः सर्वावृतीरपि।
प्रदाक्षिणं परिक्रम्य प्रविशेन्मण्डपोत्तमम् ॥११५॥

तत्रावरोप्य देवेशं भद्रपीठे च धामनि।
यागमण्डपमध्ये च विनिवेश्य सुदर्शनम् ॥११६॥

अन्नमूर्तिं च बल्यर्थपीठे सकलमुत्सृजेत्।
द्विगुणैर्ध्रुवबेरं च समाराधनवस्तुभिः ॥११७॥

अर्चचेत् प्रत्यहं चैव सावधानेन चेतसा।
प्रभातायां तु शर्वर्यां मण्डपे सिंहविष्टरे ॥११८॥

उत्सवार्यां निवेश्यैवमर्चयेदुक्तवर्त्मना।
तद्बिम्बे स्त्रपनार्थे वा स्त्रपनं विदधीत च ॥११९॥

एकबिम्बविधौ कुर्यान्मूलबिम्बेऽभिषेचनम्।
स्त्रापयेच्च प्रतिदिनं यथाविभवविस्तरम् ॥१२०॥

निवेदयेदथ महाहविरुसवकौतुके।
गत्वा तु भूषणस्थानं भूषयेद्भूषणैः शुभैः ॥१२१॥

दिवा देवं स्थिते यागसदने देविकोत्तमः।
मण्डलादिकमभ्यर्च्य निवेद्य च यथावसु ॥१२२॥

पूर्ववद्धवनं कृत्वा बलिं दत्वा यथाविधि।
ग्रामवीथिषु बल्यर्चां नीत्वान्यत्सर्वमाचरेत् ॥१२३॥

यथापुरं चोत्सवार्चां नयेद् ग्रामादिके बहिः।
देवस्य पा र्श्वतो लक्ष्मीदेवी पृथ्वीमुभे इमे ॥१२४॥

अलंकृत्य नयेत्सार्धं बहिर्ग्रामादिवीथिषु।
देवस्यैकस्य वा कुर्यात् परिक्रमणमन्वहम् ॥१२५॥

दिवसे दिवसे भूषाविशेषं कारयेदपि।
गजा श्वादिषु यानेषु कृत्रिमेष्वधिरोहयेत् ॥१२६॥

तत्तदारोहणादीनां(णादिने ?) जलद्रोण्यवगाहनम्।
पूर्वस्मिन्नपि सायाह्ने कुर्यात् कौतुकबन्धमन् ॥१२७॥

देवस्य सविशेषार्चां विदध्याद्देशिकोत्तमः।
दिवानक्तं च सर्वत्र बलिदानं समाचरेत् ॥१२८॥

तीर्थोत्सवाद्पूर्वदिने मृगयोत्सवमाचरेत्।
तत्पूर्वदिवसे कार्यं जलद्रोण्यवगाहनम् ॥१२९॥

तत्पूर्वावसरे देवं देवीभ्यां सह विष्टरे।
हैमेऽधिरोप्य वीथीष्ट शोभयित्वा विशेषतः ॥१३०॥

परिभ्राम्य च सर्वत्र नयेदुद्यानवाटिकाम्।
तत्रापि च विशेषार्चां कारयेत्तद्विचक्षणः ॥१३१॥

गीतनृत्तादिकाः सर्वाः क्रीडाः संदर्शयेत्तथा।
एवं प्रतिदिनं कुर्यात् सविशेषमहोत्सवम् ॥१३२॥

आहृतं प्राभृतं सर्वं दर्शयेच्चनसंसदि।
देवस्यानुग्रहं चेषां स्वयमाज्ञापयेत्तथा ॥१३३॥

आलोक्य चाननाम्भोजं देवस्य सुसमाहितः।
मत्वा च देवोऽहमिति प्रसादादि समाचरेत् ॥१३४॥

एवमष्टास्वतीतेषु दिवसेषु महोत्सवे।
जाते च तीर्थनक्षत्रे नवमेऽहनि देशिकम् ॥१३५॥

आरोप्य स्यन्दनवरं भूषितं स(च ?) विशेषतः।
ग्रामादिवीथयः सर्वाः परिक्रम्य समन्ततः ॥१३६॥

प्रवेशयेदालये तं मण्डपे चावतारयेत्।
भद्रासने चोपवेश्य विधिवच्च सभाजयेत् ॥१३७॥

तीर्थबिम्बमलंकृत्य नवक्षौमयुगेन च।
कौतुकं बन्धयित्वा च यानं हेममलंकृतम् ॥१३८॥

आरोप्य चक्रानुगतं भक्तैरपि निषेवितम्।
परिक्रम्योत्सवार्चां च धाम ग्रामं प्रदक्षिणम् ॥१३९॥

नीत्वाथ सवितस्तीरं सरसस्तटमेव वा।
जलधेरथवा तीरे मण्डपे पूर्वकारिते ॥१४०॥

अवतार्यासनवरे संनिवेश्य च कौतुकम्।
चक्रादिसहितं तत्र पूजयित्वा विधानतः ॥१४१॥

तीर्थबिम्बस्य पुरतः कलशान् पञ्चविंशतिः।
संस्थाप्य सत्पदश वा स्नपनोक्तविधानतः ॥१४२॥

अभिषिञ्चेच्च कलशैर्देवं शस्त्रोक्तवर्त्मना।
शिष्टैः सुदर्शनं देवमभिषिञ्चेच्च वारिभिः ॥१४३॥

अभावे सरिदादीनां तोषामावाहनं बुधः।
कारयित्वा तीर्थबिम्बं चक्रं भक्तां श्च देशिकः ॥१४४॥

निमज्जयेच्चतुष्कृत्वा तटमुत्तार्य चासने।
निवेश्य चाप्यलंकृत्य धाम चैव प्रवेशयेत् ॥१४५॥

तत्काले सह देवेन ये निमज्जन्ति मानवाः।
तेऽनुभूय शुभं सर्वं सर्वजन्मसमार्जितम् ॥१४६॥

सुदुष्प्रापं परं यानित पदमाचन्द्रतारकम्।
देवं मण्डपमानीय सभाज्य च यथाविधि ॥१४७।

महाहविर्निवेद्याथ प्रातःकाले समाहितः।
भक्तैर्जनैर्बहुविधैः सेविते मण्डपोत्तमे ॥१४८॥

विधाय मण्डपं(लं ?) चक्रपद्ममावरणान्वितम्।
पुष्पैस्तत्कालसंभूतैः कृष्णै श्च तुलसीदलैः ॥१४९॥

वर्णैः सितादिभिः सर्वै श्चत्रयित्वा च मध्यतः।
सिंहपादाङि्कते भद्रपीठो च प्रभया युते ॥१५०॥

औत्सवं बेरमादाय क्रमादर्घ्यादिभिर्यजेत्।
द्विषट्कमनुवर्णानि द्वादशानि(?) गुरुर्द्विजः ॥१५१॥

पृथक्पृथगुदाहृत्य यजेदर्घ्यादिभिः क्रमात्।
समस्तैरपि देवेशं यजेत्पुष्पैरनन्तरम् ॥१५२॥

अङ्गानि च हृदादीनि संप्रोच्य कुसुमैर्यजेत्।
भूषणानि क्रमादिष्ट्वा चक्राद्यान्यायुधान्यपि ॥१५३॥

देवानावरणस्थां श्च समभ्यर्च्य स्वनामभिः।
मत्स्यादीनर्चयित्वाथ चतुर्विंशतिमूर्तयः ॥१५४॥

पूजाक्रमेण पुंसूक्तमुच्चार्य प्रत्यृचं तथा।
नारायणानुवाकं च विष्णुसूक्तं च काश्यप ॥१५५॥

देवपादाम्बुजद्वन्द्वे विक्षिपेत्कुसुमाञ्जलिम्।
पञ्चोपनिषदैर्मन्त्रैः क्षिपेत्कुसुमसंचयम् ॥१५६॥

चतुर्दिक्षु चतुर्वेदपठनं कारयेद् द्विज।
कोणेष्वेकायनीं शाखां तन्मयैः पाठयेदपि ॥१५७॥

गीतैर्नृत्तैर्बहुविधैस्तोषयेच्च प्रभु द्विज।
पुष्पौघैः पञ्चवर्णाढ्यैर्देवेशमभिषेचयेत् ॥१५८॥

अन्नं चतुर्विधं चैव देवाय विनिवेदयेत्।
जुहुयात् समिदाद्यै श्च चतुर्भिर्मूलविद्यया ॥१५९॥

पृथक् पृथक् चाष्टशतं देशिको मन्त्रवित्तमः।
देवं प्रदक्षिणीकृत्य दण्डवत् प्रणिपत्य च ॥१६०॥

याने च देवमारोप्य प्रथमावरणस्थितम्।
ब्रह्मादीनां च देवानां भक्तानां चापि चोत्सवम् ॥१६१॥

प्राप्तानामनुसन्धातुं गमनायालयं प्रति।
अनुज्ञां देवेदेवेन कारयित्वा प्रदक्षिणम् ॥१६२॥

परीत्य सेवकैर्नित्यैः सार्धमालयमाव्रजेत्।
तद्रात्र्याः प्रथमे यामे तीत्वा स्त्रपनमण्डपम् ॥१६३॥

कलशैः स्त्रपयित्वा तं निवेद्य च महाहविः।
आसाद्य यागसदनं कृत्वा होमं यथाविधि ॥१६४॥

शान्तिहोमं विधायाथ प्रार्या श्चत्तार्थमप्यथ।
सहस्त्रं वा शतं वारान् पञ्चोपनिषदा पृथक् ॥१६५॥

हुत्वा पूर्णाहुतिं कृत्वा प श्चादग्निं विसर्जयेत्।
तोरणादिस्थितान् देवान् विसृज्य तदनन्तरम् ॥१६६॥

गत्वा ध्वजसमीपं च सभाज्य पतगे श्वरम्।
निवेद्य च हविः कृत्वा गरुत्मन्तं प्रदक्षिणम् ॥१६७॥

उद्वासयेत् पटस्थं तं खगं संहृतियोगतः।
ध्वजावरोहणं कृत्वा मध्यरात्रे च पाठयेत् ॥१६८॥

दण्डं ध्वजपटं चैव स्वीकुर्याद्देशिकोत्तमः।

गरुडस्यातिमहति(ती ?) तृप्तिः स्यात्
ग्रहणे हि सः (तयोः ?) ॥१६९॥

पूर्वमावाहितात् देवान् तत्स्थानेषु संस्थितान्।
संप्रदाय बलिं तूर्यं घोषयित्वा पृथक् पृथक् ॥१७०॥

ब्रह्माणमपि चोद्वास्य मूकैः परिजनैः सह।
अष्टाक्षरजपं कुर्यात् गुरुः म(र्म ?)न्वादिकं
हरेः(?) ॥१७१॥

विधाय देवं यानस्थमौत्सवं गर्भमन्दिरम्।
प्रवेश्य विज्ञाप्य पुनः प्रणम्य स्वगृहं यजेत् ॥१७२॥

प्रभातायां तु शर्वर्यां यजमानस्तु देशिकम्।
वस्त्राभरणगन्धाद्यैरलंकृत्य सभाज्य च ॥१७३॥

दत्वोत्तमस्वर्णशतनिष्कयुक्तां तु दक्षिणाम्।
तदर्धं वा यथाशक्ति दत्वा च प्रणमेद्गुरुम् ॥१७४॥

आचार्याणां तथान्येषां दशनिष्कप्रमाणतः।
ऋत्विजां च तदर्धं स्यादन्येषां च तदर्धकम् ॥१७५॥

क्रमेण दक्षिणां दत्वा गायकाद्यान् जनानपि।
स्वर्णाम्बराद्यैः संतोष्य तत्तत्कर्मानुरूपतः ॥१७६॥

द्रष्टुमुत्सवमायातान् जनान् भागवतानपि।
पूजयेदीप्सितैर्द्रव्यैस्तत्तत्संतोषकारणात् ॥१७७॥

दक्षिणा चापि दातव्या सर्वेभ्यो यागकर्मणि।
कर्मभ्यो दक्षिणाहीनो (दक्षिणाहीनकर्मभ्यो ?)
यागो निष्फल एव च ॥१७८॥

कारयेदुत्सवं यस्तु देवदेवस्य शङ्गिणः।
श्रद्धया दक्षिणायुक्तं साङ्गोपाङ्गं महामनाः ॥१८०॥

कुलं तारयते सर्वं यावदाभूतसंप्लवम्।
अ श्वमेधसहस्त्रेण यो यजेत समाहितः ॥१८१॥

यजेत यो भगवतो यागेन न समं फलम्।
अतिरिच्येत भगवद्यागजं फलमुत्तमम् ॥१८२॥

पुष्पयागदिनादन्वग्दिवसे तु यथापुरम्।
नित्यार्चनं विधायाथ सायाह्ने देशिकोत्तमम् ॥१८३॥

देवं बहिर्निर्गमय्य मण्डपे विष्टरोत्तमे।
मुक्तावितानस्याधस्तान्निवेश्य च सभाज्य च ॥१८४॥

विष्वक्सेनं च देवस्य पुरतः संनिवेश्य च।
हविर्निवेदनान्तं च कारयेद्देवपूजनम् ॥१८५॥

निवेद्यान्ते (निवेदितं ?) दिने तस्मिन् यद्यत् पायसपूर्वकम्।
चतुर्विधं चान्नजातं पृथुकापूपसक्तवः ॥१८६॥

ताम्बूलं चैतदखिलं विष्वक्सेनाय दापयेत्।
तत्सर्वं पुरतो न्यस्य विष्वक्सेनस्य देशिकः ॥१८७॥

तस्मै निवेद्य सकलमगाधेऽम्भसि निक्षिपेत्।
प श्चात्सेनेशसहितं देवं स्थाने प्रवेशयेत् ॥१८८॥

एष ते भगवद्यागः संक्षिप्तोऽभिहितो मया।
अवधार्येममित्थं त्वं कृती स्याः कश्यपात्मज ॥१८९॥

EXCERPTS FROM SRI-PRASNA-SAMHITA (CHAPTERS 30-37)

श्री :-

भगवन् पद्मपत्राक्ष सर्वदेवनमस्कृत।
प्रतिष्ठानन्तरं देव नित्याराधनमीरितम् ॥१॥

तस्मिन् दैनन्दिनः प्रोक्त उत्सवो होम एव च।
महोत्सवाद्युत्सवेषु नित्ययागादिकं गुरुः ॥२॥

मखाग्रवेव कुर्वीत न तु माहानसानले।
इति प्रोक्तं त्वया नाथ संशयस्तत्र मे ह्यभूत् ॥३॥

नित्योत्सवान्महत्पूर्व उत्सवो वर्तते नु किम्।
कथं महोत्सवो नाम तत्प्रकार श्च कीदृशः ॥४॥

कस्मिन् काले च कर्तव्यो दिनसंख्या च कीदृशी।
तत्सर्वं विस्तरेणाद्य साधुसेव्य वदस्व मे ॥५॥

भगवान्–

अमृताम्भोधिसंभूते मद्वक्षःस्थलवासिनि।
महोत्सवाख्यमुद्दिश्य यद्यत्पृष्टं त्वयानघे ॥६॥

तत्सर्वं विस्तरेणाद्य वदामि शृणु वल्लभे।
आराधनादियागेभ्य एषोऽतिप्रीतिवर्धनः ॥७॥

महत्प्रीतिर्येन मम उत्सवेन भविष्यति।
उत्सूते हर्षमिति च तस्मादेष महोत्सवः ॥८॥

नित्यो नैमित्तिकः काम्यस्त्रिविधः स महोत्सवः।
तद्भेदानिह वक्ष्यामि क्षीराब्धितनये तव ॥९॥

बिम्बाविर्भावनर्क्षे वा प्रतिष्ठातारकेऽपि वा।
तत्तिथौ वा तीर्थयात्रां नि श्चत्याङ्कुरपूर्वकम् ॥१०॥

ध्वजमारोप्यते यस्मिन् स तु नित्यो महोत्सवः।
ग्रहणे ग्रहयुद्धे च महोत्पातादिसंभवे ॥११॥

जीर्णोद्धारे तु देवस्य प्रोक्षणे राजविड्वरे।
गुगै तु सिंहसंबन्धमखायाते य उत्सवः ॥१२॥

ध्वजारोहणपूर्वस्तु स हि नैमित्तिकः स्मृतः।
राज्ञो जन्मदिने वापि तत्साम्राज्याभिषेचने ॥१३॥

अर्थकामौ समुद्दिश्य मासर्क्षादिषु वै रमे।
रोहिण्यां च पुनर्वस्वोः श्रवणे सार्वमासिके ॥१४॥

ध्वजारोहणपूर्वस्तु काम्यः सोऽपि महोत्सवः।
महोत्सवः सात्त्विकः स्या(त्त)त्तीर्थस्तु नवमेऽहनि ॥१५॥

सप्तमे पञ्चमे तीर्थो राजसस्तामसः स्मृतः।
नित्यं तु सात्त्विकं प्रोक्तं नैमित्तं राजसं भवेत् ॥१६॥

काम्यः स्यात्तामसः प्रोक्त त्रिविधः संप्रकीर्तितः।
नैमित्तिकोत्सवे लक्ष्मीः स्वयंव्यक्ते च दैविके ॥१७॥

नवाहं कारयेद् विद्वान् सप्ताहोऽन्यत्र वै रमे।
स्वयं व्यक्तस्य दिव्यस्य ह्युत्सवे समुपस्थिते ॥१८॥

ग्रामालयाश्रयाणं च विष्णवादीनां च वै प्रिये।
न कर्तव्योत्सवस्तावद्यावत्तीर्थावसानकम् ॥१९॥

यदि स्यादुत्सवस्तेषां ध्वजारोहणवर्जनम्।
वीथीषु भ्रमणं तेषां स्वयंव्यक्तेन कारयेत् ॥२०॥

बलिप्रदानतीर्थादि न कुर्यात् कमलोद्भवे।
अन्यथा यदि कुर्वीत नश्येद्राष्ट्रं सराजकम् ॥२१॥

ग्रामाश्रयादिदेवानामुपक्रान्ते महोत्सवे।
ततदावरणेष्वेव कुर्यात्तच्छेषमुत्सवम् ॥२२॥

उत्सवे वर्तमाने तु तद्वीथीषु वरानने।
नरास्तु मङ्गलं कार्यं स्वगृहे नाप्रुयुस्तदा ॥२३॥

उत्सवस्य क्रमं चापि वदामि कमलासने।
उत्सवारम्भदिवसान्मासाद् द्वाविंशतेरपि ॥२४॥

अष्टादशादिनात्पूर्वं सुदिने सुमुहूर्तके।
प्रातः पूजादिकार्याणि कृत्वा देशिकसत्तमः ॥२५॥

पादप्रक्षालनं कृत्वा ह्युपस्पृश्य यथाविधि।
स्वर्णादिपात्रे गन्धं च कदल्यादिफलैर्युतम् ॥२६॥

ताम्बूलमक्षतान् पुष्पं निधाय प्रेष्य मूर्धनि।
ऋगादिवेदघोषै श्च वादित्रैश्छत्रचामरैः ॥२७॥

धाम प्रदक्षिणीकृत्य गच्छेद्भगवतोऽन्तिकम्।
मूर्तिपैः स नमस्कृत्य पात्रं पीठे निधाय च ॥२८॥

अर्घ्यपाद्याचमनीयैः क्रमात्संपूज्य वै गुरुः।
समर्प्य गन्धमाल्यं च फलादीनि निवेद्य च ॥२९॥

वासुदेव जगद्योने सर्वलोकैकपूजित।
जगतां क्षेमलाभय महोत्सवमनुत्तमम् ॥३०॥

कर्तुमिच्छामि देवेश तदर्थं वाहनादिकान्।
यागशालामालयं च शुद्धीकर्तुं तथाधुना ॥३१॥

उत्सवार्थं प्रपां चैव कारयिष्यामि वै हरे।
अनुज्ञां देहि मे देव शरणागतवत्सल ॥३२॥

इति संप्रार्थ्य देवेशं प्राप्यानुज्ञां जगद्गुरोः।
बहिरागत्य चाचार्यः वाद्यघोषपुरःसरम् ॥३३॥

प्रतिष्ठितः पुरा देवी वाहनादिषु पक्षिराट्।
तमुद्वास्य हृदि ध्यात्वा मूले तु गरुडे नयेत् ॥३४॥

शिल्पिनो रथकारां श्च रथादीं श्च यथाक्रमम्।
समीकर्तुं नियुज्याथ सुमुहूर्ते सुलग्नके ॥३५॥

प्रपास्तम्भं त्वीशकोणे सर्वालंकारसंयुतम्।
वेदवादित्रघोषै श्च स्थापयेद्बहिरालयात् ॥३६॥

ततो भगवतः शेषचन्दनादीनि वै गुरुः।
वैष्णवेभ्य श्च सर्वेभ्यः शिल्पिभ्य श्चापि दापयेत्।
रथादिवाहनान् सर्वान् सम्यक् कर्तुं नियोजयेत् ॥३७॥

इति श्री श्रीप्रश्नसंहितायां त्रिशोऽध्यायः॥

* * *

एकत्रिंशोऽध्यायः

अथोत्सवारम्भदिनात् पूर्वस्मिन्नवमेऽहनि।
षष्ठे वा स्यात्तृतीये वा पूर्वस्मिन् दिवसेऽपि वा ॥१॥

रजन्यामेव कुर्वीत बीजावापं गुरूत्तमः।
अङ्कुरार्पणकर्मार्थं मृत्संग्रहणमाचरेत् ॥२॥

मृत्संग्रहदिने प्रातः ऋत्विग्भिः सह देशिकः।
महोत्सवस्य दीक्षार्थं स्नायाद्वपनपूर्वकम् ॥३॥

शुद्धवस्त्रैर्यज्ञसूत्रैरूर्ध्वपुण्ड्रैरलंकृतः।
कटकाङ्गदकेयूरैर्गन्धमाल्यैरलंकृतः ॥४॥

भगवद्गेहमासाद्य नित्यपूजामुपक्रमन्।
चण्डादिद्वारपालांश्च भक्तबिम्बांश्च वै गुरुः ॥५॥

आलयाश्रितमूर्तीश्च सधकैः पूजयेत्ततः।
स्वर्णादिपात्रे ताम्बूलनालिकेराक्षतादिकान् ॥६॥

आदाय विष्वक्सेनस्य सन्निधिं प्राप्य देशिकः।
संपूज्य विष्वक्सेनं तं प्रार्थयेन्मृदग्रहाय च ॥७॥

देव सूत्रवतीनाथ सर्वदेवनमस्कृत।
उपक्रान्तो मया ह्यद्य वासुदेवनमस्कृत ॥८॥

निर्विघ्नसिद्धये तस्य वासुदेवाभ्यनुज्ञया।
सेनाधिप भवानद्य मृत्संग्रहणकर्मणि ॥९॥

आगच्छतु हरेर्धाम ह्यनुज्ञार्थं जगद्गुरोः।
इति विज्ञाप्य सेनान्यं यानमारोप्य देशिकः ॥१०॥

सुमुहूर्ते गर्भगेहं गत्वा देवस्य संनिधौ।
स्थापयित्वा फलादीनि नमस्कृत्य यथाविधि ॥११॥

ततो गुरुवरः सर्वान् वैष्णवान् पाञ्चरात्रिकान्।
यतीन् वेदविदो विप्रान् ज्ञानिनो ब्रह्मवादिनः ॥१२॥

महान्तो देवदेवस्य समारब्धो महोत्सवः।
निर्विघ्नेन समाप्त्यर्थं यावत्तीर्थावसानकम् ॥१३॥

कर्मकाले मया यूये स्थित्वा यागमतन्द्रिताः।
समाप्य यज्ञकार्याणि प्राप्यानुज्ञां ततो हरेः ॥१४॥

गन्तुमर्हसि सर्वज्ञा गृह्णीत प्रार्थनां मम।
इत्यभ्यर्थ्य ततस्तेभ्यः अनुज्ञां प्रतिगृह्य च ॥१५॥

ततः स्वदेहशुद्ध्यर्थमृत्विक्साधकशुद्धये।
पूजोपकरणानां च पुण्याहं वाचयेद्रमे ॥१४६॥

तज्जलैरात्मनः शुद्धिमन्येषामपि कारयेत्।
स्वयं द्रव्याणि सर्वाणि प्रोक्षयेत्पूजयेद्धरिम् ॥१७॥

निवेद्य फलताम्बूलं नीराजनमथाचरेत्।
नमस्कृत्य ततो भूमौ कृताञ्जलिपुटो गुरुः ॥१८॥

अतृप्तामृतलोकेश पूर्णकाम रमापते।
उत्सवोऽयं मयारब्धो बालिशेन हरे तव ॥१९॥

तत्पूर्तये रमाध्यक्ष सेनेशं संदिश प्रभो।
इत्यनुज्ञां हरेः प्राप्य सेनेशं प्रार्थयेत्ततः ॥२०॥

यज्ञसंरक्षणार्थाय हरिणा ज्ञापितो भवान्।
मृत्संग्रहणमारभ्य ह्युत्सवावभृथावधि ॥२१॥

सेनापते मया सार्धं सर्वकार्याणि साधय।
आगच्छ मृदमानेतुमुत्सवाङ्कुरकर्मणे ॥२२॥

इति संप्रार्थ्य विघ्नेशं मालां भगवतो गुरुः।
विष्वक्सेनस्य शिरसि पादुकामपि धारयेत् ॥२३॥

सर्वोपकरणैः सार्धं सर्ववादित्रनिःस्वनैः।
ऋग्गादिवेदघोषै श्च प्राचीं सोमस्या वा दिशम् ॥२४॥

विष्वक्सेनं प्रापयित्वा प्रापायां तत्र वै रमे।
पुण्याहवारिणा प्रोक्ष्य स्थापयेत्सैन्यनायकम् ॥२५॥

पुरतस्तस्य वै भूमावीशाने न्यस्तमौलिकाम्।
नैर्ऋते न्यस्तपादान्तामूर्ध्ववक्त्रां कृताञ्जलिम् ॥२६॥

एवं विलिख्य वसुधां धान्यपीठं ततो गुरुः।
शिरः प्रदेशे तस्यास्तु दक्षिणे वा प्रकल्पयेत् ॥२७॥

शुद्धं खनित्रं तस्मिस्तु दर्भाद्यैः समलंकृतम्।
स्थापयित्वा परिस्तीर्य धान्यपीठं भुवं तथा ॥२८॥

वस्त्रादिभिरलंकृत्य भूषणै श्चापि भूषयेत्।
सप्तदर्भकृतं कूर्चं तालमानसमन्वितम् ॥२९॥

धराया हृदि विन्यस्य खनित्रेऽपि च कूर्चकम्।
पुण्याहवारिणा प्रोक्ष्य भूमिर्भूम्नेति मन्त्रतः ॥३०॥

अभिमन्त्र्य ततस्तस्याः खनित्रस्य च वै गुरुः।
पीठं प्रकल्पयेद्देवि प्रार्थयेत्तत्र वै धराम् ॥३१॥

वासुदेवप्रिये देवि तन्महोत्सवसिद्धये।
मृत्स्नायां संनिधत्स्वात्र तदुत्सर्वार्हिते शुभे ॥३२॥

इत्यावाह्यार्घ्यपाद्याद्यैरभ्यर्च्य तदनन्तरम्।
क्रोडावतार भूम्याप्तहिरण्याक्षवधोद्य[illegible] ॥३३॥

उत्सवार्थं भगवतो मृत्संग्रहणकर्मणि।
सन्निधत्स्वाचिराद्देव लोकानां क्षेमहेतवे ॥३४॥

इत्यावाह्यर्घ्यपाद्याद्यैरर्चयेत् क्रोडरूपिणम्।
माषापूपं निवेद्याथ तयोर्नीराजनं चरेत् ॥३५॥

गुरुः खनित्रमादाय गायत्रीं क्रोडरूपिणः।
उच्चरन् वसुधायास्तु मुखबाहुस्तनाङ्घ्रिषु ॥३६॥

खनित्रान्मृदमादाय गायत्र्या विष्णुपूर्वया।
लोहजे वेत्रजे वाथ निक्षिपेत् तां मृदं रमे ॥३७॥

वालुकां गोकरीषं च तस्मात् संपादयेद् गुरुः।
पात्रत्रयं नूतनेन वस्त्रेण पिदधात् पृथक् ॥३८॥

स्यन्दने वा गजस्कन्धे परिचारकमूर्धनि।
निधाय स च वाद्यानां वेदानां ध्वनिभिर्युतः ॥३९॥

धाम प्रदक्षिणीकृत्य नयेन्मण्डपमब्जजे।
तां मृदं मण्डपे न्यस्य वीथीः सर्वाः परिक्रियात् ॥४०॥

नियोजयेत् कर्मकरान् शुद्धीकर्तुं च वीथिकाः।
ते तु निम्नोन्नताः पद्याः समीकृत्य च पांसुभिः ॥४१॥

शोधयेद्ग ोमयाम्भोभिर्गन्धयेद् गन्धवारिणा।
चन्दनागरुधूपै श्च धूपयेत् सर्ववीथिकाः ॥४२॥

प्रपायां सर्वतो भद्रे वितानाद्यैरलंक्रियात्।
विविधैश्चित्रितैर्वस्त्रैर्मालाभि श्चापि वन्दनैः ॥४३॥

दीपस्तम्भान् सदीपां श्च सर्वतः स्थापयेत्ततः।
शोभार्थं सर्ववीथीषु पा र्श्वयोरुभयोरपि ॥४४॥

पाषेषु पालिका(:)स्थाप्याः प्रतिस्तम्भं च वै रमे।
रम्भास्तम्भान् फलैर्युक्तान् वस्त्रमाल्यै श्च वेष्टितान् ॥४५॥

नालिकेराणि पूगीनि फलानि पनसान्यपि।
लम्बयेन्मण्डपस्योर्ध्वे पानीयानि च दापयेत् ॥४६॥

वीथिकासु च सर्वासु तथा सद्मसु सर्वतः।
गोपुराणां च कुम्भेषु मण्डपेषु पताकिकाः ॥४७॥

बन्धयेच्चित्रवर्णा श्च पक्षिराजविचित्रिताः।
देशाद्देशादागतानां मद्भक्तानां वरानने ॥४८॥

तृतीयावरणे वापि चतुर्थावरणेऽपि वा।
शयनार्थं भोजनाय पानीयार्थं सुखार्थकम् ॥४९॥

पचनार्थं च विविधाः शालाः स्युः सुमनोहराः।
वैद्यशाला श्च कर्तव्याः समर्थैः सचिकित्सकैः ॥५०॥

यजमानः प्रतिदिनं पश्यन् सर्वां श्च तोषयेत्।
प्रथमावरणे वापि द्वितीयरवरणेऽपि वा ॥५१॥

विस्तारं तु द्वादशभिरायामं दशभिः करैः।
सप्तभिर्वा पालिकानां मण्डपं परिकल्पयेत् ॥५२॥

चतुर्दिक्षु चतुर्द्वारं गवाक्षैः समलंकृतम्।
तन्मध्ये पालिकादीनां स्थापने वीथिवर्जिता ॥५३॥

हस्तोन्नता वेदिभूमिः शोधयेत्पुण्यवारिणा।
पञ्चगव्यै श्च तदनु सुधाचूर्णैरलंक्रियात् ॥५४॥

वेदिकासु च सर्वासु व्रीहिभिः स्थण्डिलानि च।
पद्मानि विलिखेत्तेषु मन्त्रोच्चारणपूर्वकम् ॥५५॥

पालिका घटिका श्चैव शरावाः स्थापयेत् गुरुः।
प्रतीच्यां सोमकुम्भं च करकं चापि वै रमे ॥५६॥

सोमकुम्भस्य परितः उपकुम्भाष्टकं न्यसेत्।
द्वारतोरणकुम्भादीनर्घ्याद्यैः पूजयेत् पुरा ॥५७॥

पालिकादिषु सर्वासु सोमकुम्भे तथैव च।
उपकुम्भेषु पद्मान्तं पीठमाकल्प्य चाक्षतैः ॥५८॥

संकर्षणांशजं विष्णुं पूजयेत् पालिकासु वै।
अनिरुद्धांशसंभूतं ब्रह्माणं घटिकासु च ॥५९॥

प्रद्युम्नांशजं शर्वं शरावेषु च वै स्मरेत्।
प्रद्युम्नांशात्समुद्भूतं सोमकुम्भे निशाकरम् ॥६०॥

इन्द्रादीनुपकुम्भेषु पूजयेत् कमलासने।
एतेषां रक्षणार्थाय करके च सुदर्शनम् ॥६१॥

नीवारादिषु धान्येषु केशवादीन् समर्चयेत्।
सर्वार्थपालिकानां तु क्रमात् षोड(श)के गुरुः ॥६२॥

वासुदेवादि चतुरो दश द्वौ केशवादिकान्।
विष्णवादीनष्टके देवि जनार्दनपुरोगमान् ॥६३॥

पूजनं चतुर्षु प्रोक्तं पायसान्नं निवेदयेत्।
प्रत्येकं नववस्त्रेण विधाय च गुरूत्तमः ॥६४॥

घटिकानां पूर्वभागे कुण्डे वा स्थण्डिलेऽपि वा।
पीठमाकल्प्य पाद्यान्तं लक्ष्मीशं तत्र पूजयेत् ॥६५॥

भगवन् पुण्डरीकाक्ष यात्रोत्सवनिमित्ततः।
ध्वजार्थाङ्कुरसिद्ध्यर्थमग्निमुत्पादयामि भोः ॥६६॥

इति विज्ञाप्य तत्राग्निमुत्पाद्य जुहुयात्ततः।
भगवन्तं ततः सोमं हुत्वा देशिकसत्तमः ॥६७॥

बीजावापं ततः कुर्यात् संपाताज्यं च निक्षिपेत्।
उत्सवार्थं यागगेहं द्वितीयावरणादिषु ॥६८॥

अवकाशो यत्र वा स्यात्तत्र स्थानं प्रकल्पयेत्।
तन्मण्डपस्य विस्तारमायामं वेदिकल्पनम् ॥६९॥

कुण्डानि शृणु मानेन वदामि कमलेक्षणे।
चतुर्दशकरैर्मानैर्विस्तारायामसंमिताम् ॥७०॥

पञ्चहस्तसमां वेदिं हस्तोच्छ्रायां तु मध्यतः।
कुर्यात् समेखलां तस्याः परितः कुण्डकल्पनम् ॥७१॥

चतुरश्रं पौरहूत्यां दक्षिणस्यां धनू रमे।
चक्रकुण्डं तु वारुण्यां चान्द्रमस्यां त्रिकोणकम् ॥७२॥

इत्थं कुण्डानि शिल्पज्ञैः कल्पयित्वा ततः परम्।
यागोपकरणार्थं च हस्तद्वयसमायताम् ॥७३॥

वेदिं प्रकल्पयेद् धीमान् वह्निकोणेऽथ नैर्ऋते।
यागबिम्बस्थापनाय वायव्ये मण्डलाय च ॥७४॥

ईशकोणे पालिकादिस्थापने कल्पयेच्च ताम्।
एककुण्डविधाने तु वेद्याः प्राचीनभूतले ॥७५॥

चतुरश्रं भवेत् कुण्डं पात्रवेदिं तु दक्षिणे।
प्रतीच्यां मखबिम्बस्य कौबेर्यां मण्डलस्य च ॥७६॥

ऐशान्यां पालिकार्थाय कल्पयेद् वेदिकां गुरुः॥
शिलादिमण्डपे देवि यदि कुण्डानि कल्पयेत् ॥७७॥

यथायोगं प्रकुर्वीत निम्नमन्तस्तु तत्र वै।
एवं वेदी श्च कुण्डानि शास्त्रोक्तेनैव वर्त्मना ॥७८॥

ततो देवालयं सर्वं सलिलैः शोधयेत् पुरा।
सुधालेपध्वजोच्छ्रायांस्तोरणान् दर्भमालिकाः ॥७९॥

कुर्यात् सर्वत्र सत्कारान् कदलीस्तम्भसंयुतान्।
अलंकृतासु वीथीषु प्रासादे च तथा कृते ॥८०॥

ततो यात्रोपकरणैर्यानमारोप्य सेनपम्।
वादित्रवेदघोषैश्य प्रादक्षिण्येन वै गुरुः ॥८१॥

वीथीः प्रदर्शयेत्तस्मै प्रासादं चापि सर्वतः।
अर्घ्यादिभिस्ततोऽभ्यर्च्य निनयेत्तस्य तं गृहम् ॥८२॥

इति श्री श्रीप्रश्नसंहितायां महोत्सवे कर्मणि एकत्रिंशोऽध्यायः॥

* * *

द्वात्रिंशोऽध्यायः

ततः परस्मिन् दिवसे नित्यकर्म समाप्य च।
ॠत्विग्भिः साधकाचार्यैर्बोधकै श्च समन्वितः ॥१॥

प्रविशेदालयं श्रीमद्देवं संपूजयेत्ततः।
गरुत्मन्तं सेनपं च द्वाःस्थानप्यालयाश्रितान् ॥२॥

पालिकाद्वारपूजां च पालिकादिसमर्चनम्।
ॠत्विग्भिः साधयेत् सर्वं ततो गुरुरतन्द्रितः ॥३॥

दुकूलं पट्टजं वापि कार्पासजमथापि वा।
ध्वजारोहाय सुदृढं स्निग्धं लक्षणसंयुतम् ॥४॥

नीलरोमादिरहितं श्वेतं वस्त्रमथापि वा।
आयतं पञ्चदशभिर्दशभिः सप्तभिस्तु वा ॥५॥

मूलबेरसमं वापि गर्भद्वारयतं तु वा।
विस्तारं पञ्चभिर्हस्तैस्त्रिभिर्वापि वरानने ॥६॥

पक्षिराट्-लेखयोग्यस्य पटस्य परिमाणकम्।
आदाय पूर्वं तन्मध्याच्चन्दनक्षोदवारिणा ॥७॥

सूत्रेण मध्यरेखायाः कोणात्कोणं च मध्यमे।
आस्फालयेन्मध्यदेशाद्यावन्मस्तकपादयोः ॥८॥

पक्षयोरवशिष्टं यत् परिहार्यं तु शिल्पिना।
गरुडं गमनोद्युक्तं हेमाङ्ग कुटिलेक्षणम् ॥९॥

नीलनासाग्रसंयुक्तं सर्वावयवसुन्दरम्।
बद्धाञ्जलिपुटं सौम्यं शङ्खचक्रधरं विभुम् ॥१०॥

ललाटे न्यस्ततिलकं पक्षविक्षेपणान्वितम्।
सर्वाभरणसंयुक्त श्वेतवर्णं चतुर्भुजम् ॥११॥

करण्डिकामकुटिनं श्वेतवस्त्रेपशोभितम्।
आकुञ्चितं सव्यपादमपरं पृष्टतः स्थितम् ॥१२॥

मौलौ मालायितं नागं शङ्खं तु तुहिनप्रभम्।
मद्मं च दक्षिणे कर्णे शोणाभं कुण्डलाकृतिम् ॥१३॥

महापद्मं पिङ्गलाभं वामकर्णस्य कुण्डलम्।
मेघाभं गुलिकं कण्ठे कण्ठाभरणरूपिणम् ॥१५॥

रक्ताभं वासुकिं भीमं ब्रह्मसूत्रोपशोभितम्।
कार्कोटकं धूम्रनिभं हाररूपिणमब्जजे ॥१५॥

तक्षकं पीतवर्णाभं कटिसूत्रोपशोभितम्।
अनन्तं क्षौमसदृशं कटकं दक्षिणे करे ॥१६॥

वामे करे महा श्वेतं विलिखेत् कटकायितम्।
परितः शङ्खचक्रं च गदाखड्गौ तथा धनुः ॥१७॥

तार्क्ष्यस्य शिरसि छत्रं पा श्वंयो श्चामरावपि।
दीपस्तम्भौ पादपा श्वं पालिकाः साङ्कुरास्तथा ॥१८॥

एवं लिखेत् पञ्चवर्णैर्देशिकः शिल्पिनोऽपि वा।
शिल्पिनं तोषयेत्तस्मात् पटमादाय देशिकः ॥१९॥

शिबिकायां समारोप्य वाद्यघोषपुरःसरम्।
धाम प्रदक्षिणीकृत्य प्रतिष्ठामण्डपं नयेत् ॥२०॥

वास्तुशान्तिं ततः कुर्यात् ग्रामादीनां विशुद्धये।
धान्यादिकल्पिते पीठे पटं तत्र प्रसारयेत् ॥२१॥

पटं पुण्याहसलिलैः प्रोक्षयेन्मण्डपादिकान्।
द्वारादि देवान् संपूज्य कुण्डे वा स्थण्डिलेऽपि वा ॥२२॥

भ्रदासनं कल्पयित्वा लक्ष्मीनारायणं विभुम्।
संपूज्य विधिवद्देवं प्रार्थयेज्जलजोद्भवे ॥२३॥

लक्ष्मीपते जगन्नाथ महोत्सवसमृद्धये।
ध्वजारोहणकार्याय पटेऽस्मिन् पञ्चवर्णकैः ॥२४॥

लिखितं गरुडं देव सर्वदोषप्रशान्तये।
सीतलाभ्यां च नेत्राभ्यां पश्य त्वं परमे श्वर ॥२५॥

तार्क्ष्यप्रतिष्ठाकर्माङ्गमग्निमुत्पादयामि भोः।
इति विज्ञाप्य वै कुण्डं तयोः सङ्ग विचिन्तयेत् ॥२६॥

तज्जातं वैष्णवाग्निं तं ध्यायेद्देशिकसत्तमः।
वासुदेवाज्ञया मूलात् पटे तार्क्ष्यं विचिन्तयेत् ॥२७॥

तार्क्ष्यस्य कौतुकं चैव छायायामधिवासनम्।
पञ्चभिः कलशै श्चैव स्नपनं दर्पणे भवेत् ॥२८॥

तार्क्ष्यस्य पन्नगानां च नयनोन्मीलनं चरेत्।
धान्यादीन् दर्शयित्वाथ शय्यायां शाययेत् पटम् ॥२९॥

स्वदेहे तार्क्ष्यमन्त्रेण न्यासं कुर्याद्विचक्षणः।
क्षिपेदष्टोत्तरशतं प्रणवाद्यन्तसंयुतम् ॥३०॥

जप्त्वा गन्धजलैः पञ्च कलशान् पूरयेद्रमे।
धान्यपीठे स्थापयित्वा स्वलंकृत्य यथाविधि ॥३१॥

पीठमाकल्प्य कुम्भेषु विहगांस्तेषु पूजयेत्।
पुष्पाञ्जलिधरो भूत्वा प्रार्थयेद्विहगाधिपम् ॥३२॥

वासुदेवात्समुत्पन्न पक्षीन्द्र कनकप्रभ।
उत्सवार्थं भगवतः कुम्भेऽस्मिन् सन्निधिं कुरु ॥३३॥

इति संप्रार्थ्य हृदयात् कुम्भे तार्क्ष्यं विचिन्तयेत्।
आवाहनादिषण्मुद्रां प्रदर्श्यार्घ्यादिभिर्यजेत् ॥३४॥

वासुदेवांशसंभूत सत्यमूर्ते तटित्प्रभ।
अपमृत्युजयाय त्वं कुम्भेऽस्मिन् सन्निधिं कुरु ॥३५॥

संकर्षणांशज स्वास्मिन् द्विजानां ज्ञानवृद्धये।
सुपर्णागच्छ कुम्भेऽस्मिन् सन्निधिं स्फटिकप्रभ ॥३६॥

प्रद्युम्नस्यांशसंभूत नृपाणां बलवृद्धये।
कुम्भेऽस्मिन् कुरु सान्निध्यं गरुड त्वं तटित्प्रभ ॥३७॥

अनिरुद्धात् समुत्पन्न वैश्यानामर्थसिद्धये।
तार्क्ष्य तारानिभ स्वामिन् कुम्भेऽस्मिन् सन्निधिं कुरु ॥३८॥

आग्नेयादिषु कोणेषु कुम्भेष्वावाह्य यत्नतः।
आवाहनादिषण्मुद्राः सपर्यां च तत श्चरेत् ॥३९॥

भोज्यासनं ततो दत्वा मोदकादीन् निवेदयेत्।
अग्नि संतर्प्य विधिवत् तत्त्वहोमं समाचरेत् ॥४०॥

संपाताज्यं समादाय पटे कूर्चेन विन्यसेत्।
वह्निमध्ये योगपीठं संकल्प्य विधिवद् गुरुः ॥४१॥

विहगेन्द्रस्य मन्त्रेण हृदयादवतारयेत्।
आवाहनादिषण्मुद्रां दर्शयेत् कमलासने ॥४२॥

मन्त्रासनादिभोज्यान्तमाज्येन जुहुयात्ततः।
चरुं पुरुषसूक्तेन जुहुयात् षोडशाहुतीः ॥४३॥

विहगाधिपगायत्र्या घृतेनाष्टोत्तरं शतम्।
तत्संख्यया समिद्भि श्च पलाशा श्वत्थखादिरैः ॥४४॥

बिल्वै श्च जुहुयादाज्यैः पुनरष्टोत्तरं शतम्।
संपाताज्यं गृहीत्वा तु तार्क्ष्यगायत्रिया ततः ॥४५॥

न्यसेत् सर्वेषु कुम्भेषु पटे च गुरुसत्तमः।
ततः पूर्णाहुतिं हुत्वा कुण्डाद् विष्णुरथं रमे ॥४६॥

उद्वास्य कुम्भात्तदनु सत्यादीन् विसृजेत्ततः।
न्यूनाधिक्योपशान्त्यर्थं शान्तिहोमं समाचरेत् ॥४७॥

कुण्डादग्निं समुद्वास्य शर्करान्नं निवेदयेत्।
कुमुदादिबलिं दद्यात् वैनतेयस्य वै मनुम्।
जपन् रात्रिं जागरेण नयेन्नियममास्थितः ॥४८॥

इति श्री श्रीप्रश्नसंहितायां (उत्सवकर्मणि) द्वात्रिंशोऽध्यायः॥

त्रयस्त्रिंशोऽध्यायः

ततः प्रभाते विमले साधकैः सह देशिकः।
स्नानादिनित्यकर्माणि कृत्वा धाम विशेद्रमे ॥१॥

चन्दन श्चागरुर्जातिः ककुभ श्चम्पकः शमी।
खादिरः सारबिल्व श्च केसरः सप्तपर्णकः ॥२॥

वरुणस्तिलक श्चैव निम्बार्जुनशमीरूहः।
अन्तर्बहि श्च साराः स्युरेते वृक्षा जलोद्भवे ॥३॥

क्रमुको नालिकेर श्च तालहिन्तालकौ तथा।
वेणु श्चैते बहिः सारास्तादात्वे कल्पयेद् गुरुः ॥४॥

उक्तेषु चान्तःसारेषु स्फुटितादिविवर्जितम्।
एकं वृक्षं मन्त्रवच्च शा श्वतस्तम्भकल्पने ॥५॥

गृहीयाच्छततालं स्यात् मुख्यं मध्यमकल्पने।
आशीतितालमधमं षष्टितालं प्रकीर्तितम् ॥६॥

सर्वं मानाङ्गुलेनापि मानान्तरवशेन वा।
विमानोच्छायमथवा तत्कण्ठोच्छायमेव वा ॥७॥

गोपुरद्वारमाने वा यथाशक्ति प्रकल्पयेत्।
षोडशाश्रं ध्वजस्तम्भमष्टाश्रं चतुरश्रकम् ॥८॥

वृत्ते वा कल्पयेद्धीमान् शास्त्रोक्तेनैव वर्त्मना।
चतुर्धा विभजेत् स्तम्भं भागमाद्यं विसृज्य च ॥९॥

त्रिभागं पञ्चधा कृत्वा गृह्णीयादन्तिमं ततः।
तं चापि पञ्चधा भङ्क्त्वा तेष्वाद्यं कमलं भवेत् ॥१०॥

अन्तिमं स्तूपिकां कुर्यान्मध्यमत्रितयेषु वै।
अन्त्यभागसमायामं सार्धतालं सुविस्तृतम् ॥११॥

ध्वजकीलसमोपेतं क्षुद्रघण्टाविराजितम्।
फलकत्रयमेतेषु भागेषु प्रोथयेद्रमे ॥१२॥

फलकानां मध्यभागे चान्त्यभागे च कीलकम्।
सीसेन कवचीकृत्य स्तम्भस्याद्यं वरानने ॥१३॥

अवशिष्टत्रिभागं तु स्वर्णैर्वा रजतेन वा।
ताम्रैर्वा पैत्तलैर्वापि छादयेत् कवचैर्यथा ॥१४॥

एवं कृत्वा ध्वजस्तम्भं बलिपीठस्य वै रमे।
प श्चाद्वा पुरतो वापि स्तम्भार्थं खातयेद् भुवम् ॥१५॥

सप्त वा पञ्च वा हस्तानथवा त्रीन् सविस्तरम्।
इष्टकाभिः शिलाभिर्वा यावद्भूमेस्तु साम्यता ॥१६॥

ध्वजावटं परित्यज्य परितो बन्धयेद्रमे।
ततस्तु परितो भूमेरुपपीठं प्रकल्पयेत् ॥१७॥

तालमानं तु परितो हस्तमानसमुच्छ्रिताम्।
चतुरश्रां ततो वेदिं कल्पयेच्च ततः परम् ॥१८॥

चतुर्हस्तां द्विहस्तां वा चित्रबिम्बादिभिर्युताम्।
वेदिमायामतोच्छ्रायामन्ते पद्मसमन्विताम् ॥१९॥

अलंकृतामुपानाद्यैः सोपानै श्चापि शोभिताम्।
शिल्पिभिः कारयित्वेत्थं ध्वजस्तम्भस्य पीठिकाम् ॥२०॥

पुण्याहसलिलैः प्रोक्ष्य पीठगर्तेषु वै पुरा।
रत्नादिसर्ववस्तूनि गायत्र्या विष्णुपूर्वया ॥२१॥

निक्षिप्य साधकैः सार्धमृत्विग्भिर्वैष्णवैः सह।
समुच्चरंस्तार्क्ष्यमन्त्रमुच्चरद्भि श्च साधकैः ॥२२॥

वेदघोषैर्वाद्यघोषैः स्तम्भमुन्नम्य देशिकः।
मूलार्चाभिमुखं स्तम्भं स्थापयित्वा च वालुकैः ॥२३॥

पूरयित्वा शिल्पिवरैः सम्यक् कुर्यात्सुधादिभिः।
दर्भमालादिभिर्वस्त्रैः प्रादक्षिण्येन वेष्टयेत् ॥२४॥

गर्भमन्दिरमासाद्य नित्यपूजां यथाविधि।
होमान्तं च ततः कृत्वा मूहूर्ते शोभने गुरुः ॥२५॥

ताम्बूलफलपुष्पाद्यैर्हेमसूत्रसमन्वितम्।
स्वर्णादिपटलं गृह्य ॠत्विग्भिर्दीक्षितैः सह ॥२६॥

धाम प्रदक्षिणीकृत्य वाद्यघोषादिभिः सह।
गर्भमन्दिरमासाद्य धान्यपीठे निधाय च ॥२७॥

पूजाद्रव्याणि सर्वाणि प्रोक्षयेत् पुण्यवारिणा।
महारजतसूत्राणि शोधयेच्छोषणादिभिः ॥२८॥

रजनीचूर्णसंयुक्तकुङ्कुमस्य च कर्दमैः।
चन्दनस्य रसेनापि अनुलिम्पेत्तथा रमे ॥२९॥

तन्तूत्थान्यपि सूत्राणि तथाकृत्वा गुरूत्तमः।
स्वर्णादिपात्रे निक्षिप्य दक्षिणेन करेण वै ॥३०॥

अपराजितमन्त्रेण रक्षासूत्राणि वै स्पृशन्।
सौदर्शिन्या च गायत्र्या सप्तवारं जपेत्सुधीः ॥३१॥

सूत्रेषु तेषु शुद्धेषु श्रियं संप्रार्थयेद् गुरुः।
नित्यनिर्दोषनिःसीमकल्याणगुणशालिनि ॥३२॥

भगवद्वासुदेवस्य भवत्या श्रोत्सवाय वै।
सूत्रेषु प्रार्थयामि त्वां सन्निधत्स्व जगद्धिते ॥३३॥

इति संप्रार्थ्य वै लक्ष्मीं ध्रुवबेरोरसि स्थितात्।
श्रीवत्साच्छ्रियमावाह्य रक्षासूत्रेषु पूजयेत् ॥३४॥

ततः पुष्पाञ्जलिर्भूत्वा प्रार्थयेन्मूलकौतुकम्।
वासुदेव जगद्योने महोत्सवमनुत्तमम् ॥३५॥

तवाज्ञया करोम्यद्य करे मङ्गलकौतुकम्।
बन्धयामि मयि प्रीत्या गृहाण कमलापते ॥३६॥

कर्मोत्सवादिबिम्बानां सान्निध्यं कर्तुमर्हसि।
इति विज्ञाप्य मूलार्चां देवमध्यादिना यजेत् ॥३७॥

आवाहनक्रमं वक्ष्ये शृणु पङ्कजमालिनि।
ब्रह्मादिदेवताध्यक्षसर्गस्थित्यन्तकारक ॥३८॥

सान्निध्यंकुरु बिम्बेऽस्मिन्नुत्सवावभृथावधि।
आवाह्यैवं कर्मबिम्बे सपर्यां परिकल्पयेत् ॥३९॥

ततो बिम्बादुत्सवार्थे बिम्बे संप्रार्थयेद्धरिम्।
चतुःस्थानार्चनार्थय बिम्बेऽस्मिन् सन्निधिं कुरु ॥४०॥

इति संप्रार्थ्य लक्ष्मीशमर्घ्यादीनि च कल्पयेत्।
पूर्णस्तिमितषाड्गुण्यपुण्डरीकनिभेक्षण ॥४१॥

बल्यर्चायां सन्निधत्स्व बलिकर्मप्रक्लृप्तये।
एवं बिम्बेषु चावाह्य क्रमात्पूजां च कल्पयेत् ॥४२॥

निवेद्य पायसान्नानि भक्ष्याणि विविधानि च।
भगवन् पुण्डरीकाक्ष शरणागतवत्सल ॥४३॥

रक्षासूत्रं गृहाण त्वं मखाराधनपूर्तये।
इति संप्रार्थ्य वै सूत्रं पात्रादादाय देशिकः ॥४४॥

अङ्गुष्ठानामिकाभ्यां च गृहीत्वा हस्तयोर्द्वयोः।
वि श्वेत्तातेति मन्त्रेण मूलबेरस्य दक्षिणे ॥४५॥

हस्ते बद्ध्वा जपेन्मन्त्रमस्त्रं तु दश संख्यया।
एवं कर्मादिबिम्बानां रक्षासूत्रं च बन्धयेत् ॥४६॥

(श्रियादीनां 'च देवीनां) वामहस्ते तु बन्धयेत्।
कौतुकं हेमसूत्राद्यं दक्षिणे स्वस्य वै करे ॥४७॥

बध्नीयान्मूलमन्त्रेण ऋत्विजामपि वै ततः।
आचार्यो मूर्तिपैः साकं विहगेन्द्रप्रतिष्ठतम् ॥४८॥

अभ्येत्य मण्डपं देवि द्वारकुम्भादिपूजनम्।
गरुडं च महाकुम्भमुपकुम्भचतुष्टयम् ॥४९॥

करकं चार्चयित्वाथ निवेद्यान्तं ततः परम्।
द्वारादिदेवताः सर्वा उद्वास्य च ततो गुरुः ॥५०॥

पक्षीन्द्रं यानमारोप्य कुम्भानानाय्य साधकैः।
वाद्यघोषादिभिः सार्धं प्रादक्षिण्येन मन्दिरम् ॥५१॥

ध्वजस्तम्भसमीपस्थपीठिकायां निवेशयेत्।
(ध्वजस्तम्भस्य परितो द्वारतोरणकुम्भगान्) ॥५२॥

देवानभ्यर्च्य देवेशं त्रयो भगवता रमे।
भद्रपीठे समारोप्य श्रीपुष्टिसहितं विभुम् ॥५३॥

चतुर्णामपि वेदानां वाद्यै श्च विविधैः स्वनैः।
शङ्खभेरीनिनादै श्च स्तोत्रै श्च विविधैरपि ॥५४॥

चामरैर्व्यजनैः श्वेतच्छत्रै श्च ध्वजपङ्क्तिभिः।
शनैः शनैर्देवदेवं ध्वजस्तम्भसमीपगे ॥५५॥

मण्डपे भद्रपीठे तु भगवन्तं निवेशयेत्।
पूजयित्वा यथाशास्त्रं मुद्ग ान्नं मोदकं तथा ॥५६॥

गुडान्नं भक्ष्यसहितं पानकादि निवेदयेत्।
अनिरुद्धं ध्वजस्तम्भे हृदयादवतार्य वै ॥५७॥

आवाह्य पौरुषैः सूक्तैः पूजयेद् ध्वजरूपिणम्।
गुणे मायां समावाह्य नैवेद्यान्तं च पूजयेत् ॥५८॥

वैराजेन च साम्ना वै ध्वजं संयोजयेद् गुणे।
ततः पटस्थं गरुडं कुम्भस्थान्विहगानपि ॥५९॥

अभ्यचर्य धूपदीपान्तं कुम्भाद्विहगसत्तमम्।
ध्यायेत्पटस्थे विहगे प्रविष्टं ब्रह्मरन्ध्रतः ॥६०॥

प्रणवेन पिधायाथ गायत्र्या तार्क्ष्यपूर्वया।
महाकुम्भजलेनैव प्रोक्ष्य सत्यादिकान् गुरुः ॥६१॥

महापटे समावाह्य प्रार्थयेद्विहगाधिपम्।
महाबल महाबाहो वैनतेय वयोऽधिप ॥६२॥

सन्निधत्स्व पटे पक्षिन्नुत्सवावभृथान्तिमम्।
आहूतस्त्वं सर्वविघ्नान् जहि कर्म प्रवर्तय ॥६३॥

इति संप्रार्थ्य पक्षीन्द्रं मोदकादीन् निवेदयेत्।
ताम्बूलं तर्पणजलं पानीयं च निवेदयेत् ॥६४॥

नीराजनं समर्प्याथ प्रार्थयेत् पक्षिपार्थिवम्।
वाहनाय महाविष्णोस्तार्क्ष्यायामिततेजसे ॥६५॥

गरुडाय नमस्तुभ्यं सर्वसर्पेन्द्रमृत्यवे।
आहृतामृतकुम्भाय जननीदास्यमोचिने ॥६६॥

सुरासुरेन्द्रजयिने नागेन्द्राभरणाय ते।
यदाधारमिदं सर्वं तदाधाराय वै नमः ॥६७॥

गरुत्मन् ते त्रिवृत्साम शिरोगायत्रमक्षिणी।
स्तोम आत्मा तथा साम वामदेव्यं तनुः स्मृतः ॥६८॥

पक्षौ बृहद्रथन्तरे स्यातां सामनी पुच्छमीरितम्।
यज्ञायज्ञियं साम छन्दांस्यङ्गानि धिष्णियाः ॥६९॥

शफानि ते यजूँषि छन्दोरूपाय ते नमः।
इति संस्तूय पक्षीन्द्रं गरुडप्रीतये ततः ॥७०॥

र्ताक्ष्यस्य तालं त्रिपुटं स्वरो मध्यम ईरितः।
गौडाख्यरागो नृत्तं च विष्णुक्रान्तमुदाहृतम् ॥७१॥

एवं तालादिभिस्तोष्य सुमुहूर्ते गुरूत्तमः।
समन्ततस्तूर्यघोषैर्वेदघोषै श्च नादिते ॥७२॥

शङ्खघण्टादिभि श्चैव पटमालयसंमुखम्।
सुपर्णोऽसीति मन्त्रेण ध्वजमारोपयेद्रमे ॥७३॥

रज्जुं च बन्धयेत्स्तम्भे प्रादक्षिण्येन वै गुरुः।
पूर्वाह्णे वाथ मध्याह्ने ध्वजस्यारोहणं शुभम् ॥७४॥

अपराह्णे तथा रात्रौ राजराष्ट्रविनाशनम्।
प्रार्थयेत् सन्निधिं चापि गरुडस्य ध्वजोदरे ॥७५॥

पक्षीन्द्र जगदानन्द विनतानन्द सुन्दर।
अस्माद्दिनात्समारभ्य यावत्तीर्थावसानकम् ॥७३॥

सन्निधत्स्व ध्वजे देव राज्ञो जनपदस्य च।
ग्रामाणां यजमानस्य वैष्णवानां विशेषतः ॥७७॥

तुष्टये पुष्टये चैव सर्वशत्रुजयाय च।
अपमृत्युजयार्थाय वैनतेय प्रसीद ओम् ॥७८॥

इति संप्रार्थ्य पक्षीन्द्रं विकिरेत् कुसुमाञ्जलिम्।
तन्मुद्रां च प्रदर्श्याथ कुर्यान्नीराजनं गुरुः ॥७९॥

ततो देवसमीपं च गत्वा देशिकसत्तमः।
ध्वजं दर्शयितुं देवं प्रार्थयेद्धरिमव्ययम् ॥८०॥

ज्ञानतोऽज्ञानतो वापि ध्वजारोहणकर्मणि।
शास्त्रोक्तं स्खलितं यद्यत्तत्सर्वं कृपया हरे ॥८१॥

पूर्णमेव भवेद्देव क्षन्तुमर्हसि सुव्रत।
ओमच्युत जगन्नाथ मन्त्रमूर्ते जनार्दन ॥८२॥

मया कृतो ध्वजारोह उत्सवाय तवेप्सितः।
तमीक्षस्व महाबाहो दोषानपनय प्रभो ॥८३॥

इति विज्ञाप्य देवेशं यानमारोप्य देशिकः।
ध्वजस्तम्भसमीपं तु नीत्वा चादर्शयेद् ध्वजम् ॥८४॥

आह्वानार्थमशेषाणां भक्तानां पतगे श्वरम्।
नियुङ्क्ष्व देवदेवेश भक्तरक्षणदीक्षित ॥८५॥

एवं सप्रार्थ्य तदनु प्रादक्षिण्येन मन्दिरम्।
बहिर्मण्डपमानीय घटदीपं प्रदर्शयेत् ॥८६॥

स्थापयेद् देवताह्वानमण्डपे सिंहविष्टरे।
निवेदतान्नभक्ष्यादीन् भक्तेभ्यो दापयेद् गुरुः ॥८७॥

इति श्री श्रीप्रश्नसंहितायां महोत्सवे त्रयस्त्रिंशोऽध्यायः॥

चतुस्त्रिंशोऽध्यायः

ततो भागवताचार्यो यागं कर्तुं समुद्यतः।
यागमण्डपमासाद्य सर्वालंकारसंयुतान् ॥१॥

कुम्भान् संस्थाप्य विधिवद् द्वारादीनर्चयेत्ततः।
गर्भमन्दिरमासाद्य उत्सवार्चां समर्च्य च ॥२॥

यानमारोप्य तद्देवं यागमण्डपमानयेत्।
वेदिकायां निवेश्याथ ह्यग्निमुत्पादयेद्रमे ॥३॥

चतुष्कुण्डविधाने तु वृत्तकुण्डाद् गुरूत्तमः।
अग्निमुत्पाद्य निनयेदन्यकुण्डेषु पावकम् ॥४।

एककुण्डविधाने तु चतुरश्रेऽग्निमर्चयेत्।
चतुर्दिक्षु चतुर्वेदान् घोषयेयुर्द्विजोत्तमाः ॥५॥

कुण्डमध्ये योगपीठं संकल्प्य विधिवत्ततः।
चक्रशङ्खगदापद्मवनमालाविराजितम् ॥६॥

वासुदेवं समभ्यर्च्य प्रार्थयेद् गाथयानया।
त्वत्प्रीतये जगन्नाथ समारब्धो महोत्सवः ॥७॥

क्रियते हि मया तस्मिन् चतुःस्थानार्चनं हरे।
तत्र यागमहं कर्तुं त्वन्मुखाज्जातवेदसम् ॥८॥

संप्रार्थयामि देवेश तदनुज्ञातुमर्हसि।
तन्मुखादुत्थितं ध्यायेत् जटामकुटमण्डितम् ॥९॥

त्रिनेत्रं पञ्चवक्त्राढ्यं सप्तजिह्वासमन्वितम्।
(त्रिमेखलं त्रिपादं च सप्तजिह्वासमन्वितम् ॥१०॥)

बद्धाञ्जलिपुटं वह्निं शङ्खचक्रधरं विभुम्।
अग्रे त्वं गार्हपत्यादिकुण्डे स्थित्वा हरेः प्रियम् ॥११॥

उत्सवावभृथं यावत् तावत् पूजां गृहाण भो।
इति संप्रार्थ्य वै वह्निं देवमुद्वासयेत् ततः ॥१२॥

अग्निं संतर्प्य विधिवत् पीठं कुम्भेषु कल्पयेत्।
महाकुम्भे वासुदेवं मूलादावाह्य पूजयेत् ॥१३॥

आग्नेयादिषु कोणेषु पुरुषादीन् यजेद्रमे।
प्राक् कुम्भे चसुदेवं च याम्ये संकर्षण तथा ॥१४॥

प्रद्युम्नं प श्चिमे कुम्भे त्वनिरुद्धं तथोत्तरे।
आग्नेये पुरुषं कुम्भे नैर्ऋते सत्यसंज्ञितम् ॥१५॥

अच्युतं वायवीये च घटे शार्वे ह्यनन्तकम्।
आवाह्य पूजयेद्देवान् प्राच्यादिषु यथाक्रमम् ॥१६॥

तण्डुलैर्निर्मिते पीठे चक्राब्जं विलिखेत् पुरा।
कर्णिकायां वासुदेवं दलेषु द्वादशस्वपि ॥१७॥

केशवादीन् समावाह्य पूजयेद् देशिकोत्तमः।
संपूज्य बिम्बं विधिवत् पीठमग्निषु कल्पयेत् ॥१८॥

चतुरश्रे वासुदेवं चापे संकर्षणं तथा।
वृत्ते प्रद्युम्ननामानं कमले त्वनिरुद्धकम् ॥१९॥

आवसथ्ये मूलमूर्तिं गार्हपत्येऽथवार्चयेत्।
सान्निध्ययाचनं तेषां गार्हपत्यादिषु क्रमात् ॥२०॥

उत्सवावभृथं यावत् कालयो श्चापि पूजयेत्।
वह्निस्थान् वासुदेवादीन् सपर्यासनमादितः ॥२१॥

भोज्यसनान्तमाज्येन स्वाहान्तैर्जुहुयात्ततः।
चतुर्विधान्नं नैवेद्यं स्थितानां च चतुःस्थले ॥२२॥

निवेद्य च ततः पूर्णामाहुतिं जुहुयाद्धविः।
पौरुषेण च मन्त्रेण संपाताज्येन वै रमे ॥२३॥

कुम्भं बिम्बं मण्डलं च न्यसेद्राष्टहिताय वै।
कुमुदादिबलिं दत्वा स्वगृहं प्रविशेद् गुरूः ॥२४॥

ततः सायाह्नसमये नित्यपूजापं विधाय च।
देवस्य पुरतो भूमौ धान्यपीठं प्रकल्पयेत् ॥२५॥

कालचक्रं तत्र लिख्य न्यसेद्दीपान् समन्ततः।
मड्डुकं ब्रह्मणः स्थाने पा र्श्वयोस्तस्य वै रमे ॥२६॥

शङ्ख कोणं च विन्यस्य ततादीन् परितो न्यसेत्।
ऐन्द्रे वीणादि याम्ये तु सुषिरादीनि पद्मजे ॥२७॥

वारुण्यां चर्मवाद्यानि सौम्ये कांस्यं तु विन्यसेत्।
पिधाय नववस्त्रेण प्रोक्ष्य पुण्याहवारिणा ॥२८॥

गन्धपुष्पाणि संकीर्य तेषु देवान् समर्चयेत्।
संकर्षणं मड्डुके च शङ्खे विष्णुं च कोणके ॥२९॥

वायोरधिपमावाह्य फलादीनि निवेदयेत्।
सुषिरेऽप्यनिरुद्धं च वीणादिषु मधुद्विषम् ॥३०॥

नरोत्तमं चर्मजेषु कांस्यजेषु ह्यधोक्षजम्।
एवमावाह्य चाभ्यर्च्य नीराजनमथाचरेत् ॥३१॥

गुरुर्मड्डुकमादाय त्रिर्गाथामुच्चरन् रमे।
वेदाः सर्वे विवर्धन्तां देवाः सर्वे सवेधसः ॥३२॥

वर्धन्तां वैष्णवाः सर्वे वर्धन्तां ब्राह्मणोत्तमाः।
एवं त्रिवारमुच्चार्य मड्डुकं ताडयेद् गुरुः ॥३३॥

भुजवीर्यजितारातिवन्द्यमानपदद्वयः।
वर्धतां भूपतिर्नित्यं सामात्यः सपुरोहितः ॥३४॥

इमं श्लोकं त्रिरुच्चार्य मड्डुकं ताडयेत्ततः।
वाणिज्येन च संप्राप्तमहाधनविवर्धनाः ॥३५॥

वर्धन्तामूरुजाः सर्वे धान्यरत्नसमेधिताः।
इत्येवं त्रिःपठन् धीमांस्ताडयेन्मड्डुकं गुरुः ॥३६॥

लक्ष्मीशोत्सवसेवार्थमागता मुखबाहुजाः।
ऊरुपादसमुद्भूता अनुलोमा श्च धार्मिकाः ॥३७॥

स्वकर्मनिरताः सर्वे दातारः सत्यवादिनः।
इतरे मानवाः सर्वे पुत्रपौत्रधनादिभिः ॥३८॥

शतायुष श्च वर्धन्तां नीरोगा निरुपद्रवाः।
वर्णानां क्षेममुद्दिश्य मड्डुकं ताडयेत् पुनः ॥३९॥

आचार्य इत्थं संताड्य स्नातं पारशवं शुचिम्।
कृतोर्ध्वपुण्ड्रमाहूय करे दत्वा च मड्डुकम् ॥४०॥

देववस्त्रादिपुष्पै श्च संमान्य च यथाक्रमम्।
तं ताडयेत् तदितरान् वाद्यान्यपि च वादयेत् ॥४१॥

गुरोरनुज्ञया ते च दास्यो वाद्यानि वादकाः।
गायेयुर्नृत्तयेयु श्च देवस्य पुरतो भुवि ॥४२॥

ततो वैकुण्ठनिलयान् विष्वक्सेनपुरःसरान्।
आयुधान् मूर्तिरूपां श्च तथा द्वाराधिपान् रमे ॥४३॥

चण्डादिद्वारपालां श्च गुरुः प्रथममाहयेत्।
आदित्या वसवो रुद्रा मरुत श्च महर्षयः ॥४४॥

गङ्गाद्याः सरित श्चैव निधये नव वै रमे।
नवग्रहाणि चैतां श्च ब्राह्मणादीन् समाह्वयेत् ॥४५॥

उच्चार्य नामान्येतेषां तद्ग णोच्चारणान्तिमे।
मड्डुकं ताडयेद्धीमान् पारशव्येन वै गुरुः ॥४६॥

चक्रिन् मुसलिन् खड्गिन् शङ्खिन् कौमोदकीभरिन्।
शाङ्गिन पद्मिन् तथा वज्रिन् यूयं वैकुण्ठवासिनः ॥४७॥

लक्ष्मीशोत्सवसेवार्थमागच्छन्त्वायुधे श्वराः।
अनिरुद्धपदोद्भूतास्तार्क्ष्यचण्डप्रचण्डकाः ॥४८॥

धातर्विधातर्विजय जय भद्र सुभद्रक।
कृतान्तसुरविध्वंस कुबेराक्ष कुबेरक ॥४९॥

भो दुर्जय प्रबल हे वि श्वभावन पुष्कर।
संभव प्रभव स्वामिन् सुशोभन सुभद्र भो ॥५०॥

तत्कैंकर्यनिरताश्छत्रचामरपाणयः।
द्वारपालगणाः सर्वे परिचारगणैः सह ॥५१॥

लक्ष्मीशोत्सवसेवार्थमागच्छन्तु हरेः प्रियाः।
भो धर ध्रुव हे सोम आप हे अनिलानल ॥५२॥

प्रत्यूषप्रभवावष्टौ वसवो देवता गणाः।
लक्ष्मीशोत्सवसेवार्थं यूयमागच्छतामराः ॥५३॥

मृगव्याध महाशर्व निर्ऋते त्वज एकपात्।
अहिर्बुध्न्य पिनाकिन् हे स्थाणो भव कपालिक ॥५४॥

त्रिनेत्रा रुद्रसदृशा जटामण्डलधारिणः।
रुद्रा एकादशा यूयमागच्छत महोत्सवम् ॥५५॥

धात्रर्यमौ विधातर्हे मित्र भो वरुणाह्वय।
सवितर्भग विवस्वन् हे त्वष्टरिन्द्र रवे विभो ॥५६॥

पूषन् द्वादश आदित्या आगच्छत महोत्सवम्।
बृहस्पते देवगुरो लोहिताङ्ग शनै श्चर ॥५७॥

राहो गृहपते सूर्य सोम हे बुध केतवः।
यूयं नवग्रहाः सर्व आगच्छत महोत्सवम् ॥५८॥

महापद्मनिधे पद्मशङ्खकच्छपमानक।
निधे मकरकुन्दाख्यनीलवारमुकुन्दक ॥५९॥

यूयं लक्ष्मीमतेः प्रीत्यै समाहूता महोत्सवे।
आगच्छत हरेः प्रीतिं कुरुध्वं निधयो नव ॥६०॥

हे मरीचे भरद्वाज मार्कण्डेय कहोलक।
वसिष्ठ काश्यप भृगो वि श्वामित्र महामुने ॥६१॥

वेदव्यासमुने वत्स गौतमागस्त्य मुद्ग ल।
जामदग्न्यमुने गार्ग्य याज्ञवल्क्य तपोधन ॥६२॥

कौण्डिन्य मुनिशार्दूल दुर्वासा रोमशाङ्गिराः।
लक्ष्मीशोत्सवसेवार्थमायान्तु मुनिपुङ्गवाः ॥६३॥

परब्रह्ममुखोद्भुताः पञ्चकालपरायणः।
वेदवेदाङ्गनिपुणाः पञ्चरात्रविशारदाः ॥६४॥

इतिहासपुराणज्ञाः धर्मशास्त्रार्थकोविदाः।
लक्ष्मीशोत्सवसेवार्थमायान्तु ब्राह्मणोत्तमाः ॥६५॥

विराड्बाहुसमुद्भूता भुजवीर्यार्जितश्रियः।
युद्धोद्धतकृतोत्साहाः क्षत्रिया लोकविश्रुताः ॥६६॥

यूयं मन्त्र्यादिभिः सार्धं समायात महोत्सवम्।
विष्णोरूरुसमुद्भूता दानधर्मपरायणाः ॥६७॥

वाणिज्यवृत्तयो नित्यं शमादिगुणसंयुताः।
लक्ष्मीशोत्सवसेवार्थमागच्छन्तु वणिक्प्रियाः ॥६८॥

विराट्चरणसंभूता वर्णानां दास्यवृत्तिनः।
विष्णुकैङ्कर्यनिरता आगच्छन्तु महोत्सवम् ॥६९॥

आहूयैवं भक्तजनान् परिवारानथो रमे।
स्वयं व्यक्तादिबिम्बानामुत्सवे समुपस्थिते ॥७०॥

आह्वानं देवपरतो वीथीषु च बलिं क्षिपेत्।
मानुषादिप्रतिष्ठानां बिम्बानामुत्सवे रमे ॥७१॥

आह्वानं बलिदानं च वीथ्यामेव तु कल्पयेत्।
रक्तवस्त्रं गजारूढं श्वेतवर्णं चतुर्भुजम् ॥७२॥

त्रिनेत्रममराधीशं वज्रचक्रधरं तथा।
मुख्याभ्यामपि हस्ताभ्यां प्राञ्जलिं विबुधैर्युतम् ॥७३॥

ऐशवासवयोर्मध्ये कुमुदं गणनायकम्।
ध्यात्वैवं पायसान्नेन बलिं दद्याद् गुरूत्तमः ॥७४॥

गजारूढ चतुर्बाहो सर्वदेवगणाधिप।
लक्ष्मीशोत्सवसेवार्थमागच्छ कुमुद प्रभो ॥७५॥

आहूयैवं बलिं दत्वा तद्रागाद्यै श्च तोषयेत्।
स्वरः षड्जः समं तालं रागो गान्धार ईरितः ॥७६॥

नृत्तं विलासमेतैस्तं कुमुदं मोदयेद् रमे।
महिषस्थं काञ्चनाभं चतुर्बाहुं त्रिलोचनम् ॥७७॥

दातवानामधिपतिं खड्गमुद्ग रधारिणम्।
मुख्यहस्ताञ्जलियुतं शोणवस्त्रैरलंकृतम् ॥७८॥

ऐन्द्रज्वलनयोर्मध्ये कुमुदाक्षं गणाधिपम्।
ध्यात्वा तस्मै बलिं दद्यात् माषान्नेन गुरूत्तमः ॥७९॥

कुमुदाक्षा सुराधीश दैत्यदानवसेवित।
लक्ष्मीशोत्सवसेवार्थमायाहि त्वं महाबल ॥८०॥

कुमुदाक्षप्रियो रागः कौलवो वृषभः स्वरः।
तालं तु मध्यमो नृत्तं विष्णुक्रान्तमिहोच्यते ॥८१॥

अ श्वारूढं रक्तवर्णं नीलवस्त्रं चतुर्भुजम्।
त्रिणेत्रं चक्रमुसलं हस्ताभ्यामपि धारिणम् ॥८२॥

पूर्वाभ्यामञ्जलियुतं पितृणां गणनायकम्
अग्न्यन्तकदिशार्मध्ये पुण्डरीकाभिधं रमे ॥८३॥

तं ध्वात्वा तु तिलान्नेन बलिं दद्याद् गुरूत्तमः।
तालो भृङ्गिगणिसंज्ञं स्यात् स्वरो गान्धारनामकः ॥८४॥

मध्यमावतिरागस्तु नृत्तं केतकमुच्यते।
अ श्वारूढ महाबाहो पुण्डरीक महाबल ॥८५॥

लक्ष्मीशोत्सवसेवार्थमागच्छ पितृवल्लभ।
रथारूढं चतुर्बाहुं त्रिनेत्रं पाण्डवप्रभम् ॥८६॥

वज्रशूलधरं नीलवासोभिः समलंकृतम्।
साञ्जलिं वामनं देवं राक्षसानां गणाधिपम् ॥८७॥

यमयातुदिशोर्मध्ये तिन्त्रिण्यन्नं बलिं क्षिपेत्।
चतुर्भुज रथारूढ यातुधानगणे श्वर ॥८८॥

लक्ष्मीशोत्सवसेवार्थं त्वं समागच्छ वामन।
स्वर श्च पञ्चमस्तालो मल्लः श्रीराग ईरितः ॥८९॥

नृत्तं तु भद्रमाली च वामनस्य प्रियं भवेत्।
व्याघ्रारूढं शङ्कुकर्णं पाशाङ्कुशधरं विभुम् ॥९०॥

चतुर्भुजं पीतवर्णं श्वेतवस्त्रैर्विराजितम्।
बद्धाञ्जलिपुटं भीमं पन्नगानां गणाधिपम् ॥९१॥

यातुवारुणयोर्मध्ये क्षीरान्नेन बलिं क्षिपेत्।
व्याघ्रारूढ महाबाहो शङ्कुकर्ण चतुर्भुज ॥९२॥

लक्ष्मीशोत्सवसेवार्थमागच्छोरगसेवित।
स्वरो धैवतनामा स्यान्मङ्गलं तालमीरितम् ॥९३॥

भूपालो राग इत्युक्तो नृत्तं कान्तारकुट्टिमम्।
एतै रागादिभिर्भद्रे शङ्कुकर्णं तु तोषयेत् ॥९४॥

मृगारूढं धूम्रवर्णं त्रिनेत्रं श्वेतवाससम्।
दधानं पाशपरशुं बद्धाञ्जलिपुटं विभुम् ॥९५॥

चतुर्भुजं सर्वनेत्रं गन्धर्वगणनायकम्।
पाशिवायुदिशोर्मध्ये ध्यात्वैवं लक्षणान्वितम् ॥९६॥

चणकान्नबलिं दद्यात् तत्प्रियं मन्त्रमुच्चरन्।
सर्वनेत्र मृगारूढ गन्धर्वगणनायक ॥९७॥

लक्ष्मीशोत्सवसेवार्थमागच्छ त्वं महामते।
जयतालो धैवतः स्यात् स्वरः केदारसंज्ञितः ॥९८॥

वृत्तकुट्टिमनृत्तं च सर्वनेत्रप्रियङ्करम्।
सिंहारूढं धूम्रनिभं पीतवस्त्रं चतुर्भुजम् ॥९९॥

त्रिनेत्रं प्राञ्जलिं सौम्यं चक्रशक्तिधरं विभुम्।
सुमुखं यक्षकोटीनां नायकं भगवत्प्रियम् ॥१००॥

वायुसोमान्तरे ध्यात्वा मुद्गान्नेन बलिं क्षिपेत्।
सिंहारूढ महाबाहो चक्रशक्तिधनुर्धर ॥१०१॥

लक्ष्मीशोत्सवसेवार्थमागच्छ त्वं महाबल।
स्वरो निषादस्तालं तु भद्रो हंसध्वनिस्तु सः ॥१०२॥

रागो नृत्तं पारिभद्रं सुमुखस्य प्रियं भवेत्।
नागारूढं हेमवर्णं त्रिनेत्रं पीतवाससम् ॥१०३॥

खड्गं चक्रधरं दैवं बद्धाञ्जलिसमन्वितम्।
पिशाचानामधिपतिं सुप्रतिष्ठं महाबलम् ॥१०४॥

सोमेशानदिशोर्मध्ये ध्यात्वा देशिकसत्तमः।
गुडान्नेन बलिं दद्यात् सुप्रतिष्ठाय वै रमे ॥१०५॥

नागारूढ महाबाहो पिशाचानां गणाधिप।
लक्ष्मीशोत्सवसेवार्थं सुप्रतिष्ठैहि सेनम ॥१०६॥

तालस्तु ककरी प्रोक्तः स्वरो गान्धारनामकः।
पूर्णचन्द्रस्तु रागः स्यान्नृत्तं तु कटिबन्धनम् ॥१०७॥

एतैस्तु सुप्रतिष्ठस्य प्रियमुत्पादयेद् गुरुः।
हंसारूढं पृश्निगर्भं धनुर्बाणधरं विभुम् ॥१०८॥

द्विनेत्रं शुक्लवसनं प्राञ्जलिं सिद्धनायकम्।
एवं सिद्धपदे ध्यात्वा मरीच्यन्नं बलिं क्षिपेत् ॥१०९॥

पृश्निगर्भ सुराधीश सिद्धादिगणसेवित।
लक्ष्मीशोत्सवसेवार्थमायाहि व्योमवल्लभ ॥११०॥

तालस्तु झिङ्गिणी प्रोक्तो निषादस्वर उच्यते।
रागो मेघाभिधो भद्रे नृत्तं मण्डलमीरितम् ॥१११॥

अनन्तं कमठारूढं पाण्डराभं चतुर्भुजम्।
साञ्जलिं नीलवसनं हलतोमरधारिणम् ॥११२॥

द्विनेत्रं पन्नगाधीशं किरीटफणमण्डितम्।
अनन्तमेवमाराध्य शर्करान्नं बलिं क्षिपेत् ॥११३॥

कूर्मस्थ नागभूपाल सहस्त्रफणमण्डित।
लक्ष्मीशोत्सवसेवार्थमागच्छ त्वं सहानुगैः ॥११४॥

अनन्ततालो गान्धारस्वरो रागो वरालिका।
नृत्तं केतकमित्युक्तमनन्तप्रीतिदं भवेत् ॥११५॥

ब्रह्माणं राजहंसस्थमष्टनेत्रं चतुर्मुखम्।
अक्षसूत्रं च करकं दधानं प्राञ्जलिं विभुम् ॥११६॥

ध्वजस्तम्भेन्द्रककुभोर्ध्यात्वा ब्रह्माणमब्जजम्।
गोधूमान्नं बलिं दद्यात् ब्रह्मणः प्रीतिमब्जजे ॥११७॥

विष्णोर्नाभिसमुत्पन्न जगत्स्त्रष्टः पितामह।
लक्ष्मीशोत्सवसेवार्थमायाहि कमलासन ॥११८॥

घण्टा रागो निषाद श्च स्वरस्तालस्तु वै ध्रुवः।
नृत्तं कमलमित्याहुर्ब्रह्मणः प्रीतिकारकम् ॥११९॥

ऐरावतगजारूढं पीतकौशेयवाससम्।
चतुर्भुजं सहस्त्राक्षं शचीदेवीसमन्वितम् ॥१२०॥

वज्राङ्कुशधरं सोम्यं नीरदप्रभम्।
ध्यात्वैवं वासवं प्राच्यां गुडान्नेन बलिं क्षिपेत् ॥१२१॥

शचीपते जिताराते वज्रपाणे पुरंदर।
लक्ष्मीशोत्सवसेवार्थमागच्छामरवल्लभ ॥१२२॥

समतालो नाटरागः स्वरः पञ्चमनामकः।
नृत्तं विलासमित्युक्तं पुरन्दरमनः प्रियम् ॥१२३॥

मेषारूढं हव्यवाहं त्रिनेत्रं स्वर्णवाससम्।
स्वाहास्वधाभ्यां सहितं चतुर्हस्तं महाप्रभम् ॥१२४॥

प्राञ्जलिं चापराभ्यां च हस्ताभ्यां स्रुक्स्रुवंधरम्।
ध्यात्वेत्थं वह्निकोणस्थं घृतान्नं बलिमुत्क्षिपेत् ॥१२५॥

स्वाहास्वधापते वह्ने गार्हपत्यादिनामक।
लक्ष्मीशोत्सवसेवार्थमागच्छ मखपूजित ॥१२६॥

अटतालो गौलिरागः स्वरो वृषभसंज्ञिकः।
नृत्तं तु सर्वतोभद्रं जातवेदप्रियं भवेत् ॥१२७॥

कृतान्तं महिषारूढं दण्डपाशधरं विभुम्।
बद्धाञ्जलिपुटं कृष्णं चतुर्बाहुं त्रिलोचनम् ॥१२८॥

श्वेतवस्त्रधरं देवं पितृणां गणनायकम्।
एवं ध्यात्वा यमदिशि तिलान्नेन बलिं क्षिपेत् ॥१२९॥

लुलायवाहनारूढ कालसंहरिणीपते।
लक्ष्मीशोत्सवसेवार्थमायाहि पितृभिः सह ॥१३०॥

तालस्तु मङ्गलः प्रोक्तः स्वरो गान्धार ईरितः।
रागस्तु दैशिकी नृत्तं सर्वतोभद्रनामकम् ॥१३१॥

पिशाचस्थं क्रूरमूर्तिं निर्ऋतिं श्वेतवाससम्।
द्विनेत्रं पिङ्गलनिभं खड्गखेटं विराजितम् ॥१३२॥

चतुर्भुजं प्राञ्जलिं च ध्यात्वैवं निर्ऋतेर्दिशि।
माषान्नेन बलिं दद्यान्निर्ऋतेः प्रीतिकृत्तमम् ॥१३३॥

कृष्णाङ्गनापुराधीश राक्षसानां गणे श्वर।
लक्ष्मीशोत्सवसेवार्थं निर्ऋते त्वत्र याहि भो ॥१३४॥

जयतालः स्वरः षड्जो रागो देशाक्षिनामकः।
नृत्तं कमलवद्वृत्तं निर्ऋतेः प्रियदं भवेत् ॥१३५॥

मकरं यानमारूढं श्वेतवर्णं चतुर्भुजम्।
पाशाङ्कुशधरं देवं वरुणं सन्नताञ्जलिम् ॥१३६॥

द्विनेत्रं शीतलानाथं यादोभिः परिवेष्टितम्।
ध्यात्वैवं प श्चिमदिशि दध्यन्नेन बलिं क्षिपेत् ॥१३७॥

श्रद्धावतिपुरीनात प श्चिमाशापते विभो।
लक्ष्मीशोत्सवसेवार्थमागच्छ जलजे श्वर ॥१३८॥

भद्रतालो नाटरागः स्वरो धैवतमुच्यते।
नृत्तं कमलमित्युक्तं वरुणस्य प्रियं भवेत् ॥१३९॥

आरूढहरिणीनाथं द्विनेत्रं विशदाम्बरम्।
सदागत्या च नायक्या समेतं धूम्रवर्णकम् ॥१४०॥

वै श्वनरसखं देवं चतुर्बाहुसमन्वितम्।
बद्धाञ्जलिपुटं धीरं ध्वजतोमरधारिणम् ॥१४१॥

एवं वायोर्दिशि ध्यात्वा कुलुत्थान्नं बलिं क्षिपेत्।
श्रीगन्धपत्तनाधीश सदागत्या समन्वित ॥१४२॥

लक्ष्मीशोत्सवसेवार्थमायाहि त्वं सदागते।
झम्पतालः समाख्यातो रागः श्रीरागसंज्ञिकः ॥१४३॥

स्वरः षड्जो नृत्तमुक्तं पृष्ठकुट्टिमसंज्ञितम्।
नरारूढं पाण्डराभं धनदं चालकाधिपम् ॥१४४॥

शङ्खपद्मनिधेरीशं चतुर्बाहुं दिशांबरम्।
बद्धाञ्जलिपुटं सौम्यं संपद्देवीसमन्वितम् ॥१४५॥

एवं सोमदिशि ध्यात्वा पायसान्नं बलिं क्षिपेत्।
नरवाहन यक्षेश संपद्देवीसमन्वित ॥१४६॥

शङ्खादिनिधिप स्वामिन्नलकापुरनायक।
लक्ष्मीशोत्सवसेवार्थमायाहि धनदे श्वर ॥१४७॥

अनन्ततालो रागस्तु मोहनं वृषभः स्वरः।
नृत्तं मण्डलनृत्तं स्यात् कुबेरं तै श्च तोषयेत् ॥१४८॥

वृषायढं पाण्डुराभं त्रिनेत्रं गजचर्मिणम्।
मृत्युंजयं चतुर्बाहुं बद्धाञ्जलिपुटं हरम् ॥१४९॥

कपालशूलहस्तं च शैलराजसुताधिपम्।
ध्यात्वैवमीशकोणे तु मरीच्यन्नं बलिं क्षिपेत् ॥१५०॥

कैलासाधिप देवेश जटाचन्द्रविभूषित।
श्रीकण्ठमृत्युजिद्देव पिनाकिन् भूतनायक ॥१५१॥

लक्ष्मीशोत्सवसेवार्थमागच्छ त्वं स्मरान्तक।
इति देवान् समाहूय नृत्ताद्यैस्तोषयेद् गुरुः ॥१५२॥

देवताह्वानवेलायां भेरीं शृण्वन्ति ये जनाः।
यावद्धरेरुत्सवान्तं ग्रामं नगरमेव वा ॥१५३॥

न गच्छेयुर्भद्रकामस्तिष्ठेयुस्तावदेव हि।
अनादृत्योत्सवं मोहाद् दूरं यायाज्जनो यदि ॥१५४॥

स याति निरयं स्थानं प्रेत्य दुःखमिहापि च।
तस्मादवभृथं यावद्वसेत्तत्रैव नो व्रजेत् ॥१५५॥

ततो गर्भगृहं गत्वा मूलबेरं समर्चयेत्।
महाहविर्निवेद्याथ नीराजनमत श्चरेत् ॥१५६॥

इति श्री श्रीप्र श्नसंहितायां महोत्सवे बलिप्रदानं नाम चतुस्त्रिंशोऽध्यायः॥

* * *

पञ्चत्रिंशोऽध्यायः

बलिबिम्बं समभ्यर्च्य बल्यन्नानि निवेदयेत्।
नीराजनं समर्प्याथ शिबिकायां नयेद् विभुम् ॥१॥

पात्रस्थं तद्बलिद्रव्यं घण्टां कुसुमभाजनम्।
तोयपूर्णं च करकं धूपपात्रं सदीपकम् ॥२॥

प्रदीपां श्च गृहीत्वाथ वाद्यघोषपुरःसरम्।
मड्डुकं च गृहीत्वाग्रे वेदघोषसमन्वितम् ॥३॥

बलिबिम्बस्य पुरतो गच्छेयुः परिचारकाः।
ततो गुरूत्तमो वापि साधको वापि दीक्षितः ॥४॥

वक्ष्यमाणक्रमेणैव तत्तत्स्थानेषु मन्त्रवित्।
महोत्सवे मया दत्तं सोदकं वैष्णवं बलिम् ॥५॥

गृहीत्वा तृप्तिमासाद्य स्थानं रक्ष सुरोत्तम।
इति मन्त्रं समुच्चार्य बीजाक्षरसमन्वितम् ॥६॥

नामधेयं चतुर्थ्यन्तमुच्चार्य तदनन्तरम्।
सोदकं च बलिं दद्यात् चण्डादीनां गुरूत्तमः ॥७॥

तद्विधानं प्रवक्ष्यामि कमले शास्त्रसंमतम्।
प्रथमावरणद्वारे बलिं चण्डप्रचण्डयोः ॥८॥

द्वितीयगोपुरद्वारे जयस्य विजयस्य च।
तृतीयद्वारि धातु श्च विधातु श्च बलिं क्षिपेत् ॥९॥

चतुर्थे दुर्जयस्यापि प्रबलस्य तथैव च।
पञ्चमे द्वारि शङ्खस्य पद्मस्य च निधेर्बलिम् ॥१०॥

तत श्चतुर्मुखस्यापि बलिं दद्याद् यथाविधि।
ततो वीथीषु निर्गत्य कुमुदादिबलिं क्षिपेत् ॥११॥

तत इन्द्रादिदेवेभ्यो दिक्पालेभ्यो यथाविधि।
अथवा कुमुदायादाविन्द्राय तदनन्तरम् ॥१२॥

कुमुदाक्षाय तदन्वग्रये वा बलिं क्षिपेत्।
अशून्यासु च वीथीषु प्रतिलोमैः स्थितासु च ॥१३॥

न दद्याद् बलिदानं तु ह्यालयेष्वेव कारयेत्।
एवं वीथीषु सर्वत्र तत्तत्स्थानेषु देशिकः ॥१४॥

क्षिप्त्वा बलिं देवगृहमासाद्य बलिपीठकम्।
दक्षिणादिद्वारपालान् पार्षदान् सायुधानपि ॥१५॥

आवाह्य पीठं परितो बलिं तेभ्यः क्षिपेद् गुरुः।
बलिबिम्बं महापीठं प्रादक्षिण्येन वै नयेत् ॥१६॥

ततो नीराजनं कृत्वा स्वस्थाने तं निवेशयेत्।
उत्सवे देवदेवस्य वाहनानि शृणुष्व मे ॥१७॥

विमानो भास्करः शेषः सिंहो गरुड एव च।
गजो रथो हय श्चापि द्रुमः कल्पकसंज्ञिकः ॥१८॥

हंस श्चन्द्रः सुमेरु श्च शिबिका भद्रपीठिका।
एवंविधानि दिव्यानि वाहनानि मनस्विनि ॥१९॥

स्वर्णादिरत्नविकृतैर्दारुणिर्वापि शिल्पिभिः।
कारयित्वा तेषु ताक्षर्यं प्रतिष्ठाप्य गुरूत्तमः ॥२०॥

प्रथमाद्युत्सवदिने तेषु कस्मिंस्तु वाहने।
आरोप्य वीथीभ्रमणं कारयेद्देवसत्तमम् ॥२१॥

देवस्य वीथीभ्रमणक्रमं वक्ष्यामि शोभने।
श्रीभूमीसहितं देवं देशिको मन्त्रवित्तमः ॥२२॥

उत्तिष्ठ ब्रह्ममन्त्रेण देवमुत्थापयेद् रमे।
दीक्षिताभ्यामपि द्वाभ्यां भद्रं कर्णेति मन्त्रतः ॥२३॥

यानमारोपयेद् देवं वस्त्रमाल्यविभूषणैः।
अलंकृत्य रमानाथं दर्पणं च प्रदर्शयेत् ॥२४॥

अर्घ्यादिभिस्तमभ्यर्च्य ताम्बूलं च निवेदयेत्।
ततो नीराजनं कृत्वा वाद्यघोषपुरः सरम् ॥२५॥

देवमुत्थापयेद्देवि प्रदीपानां शतैः समम्।
कैङ्कर्यनिरताः सर्वे वैष्णवा धवलाम्बराः ॥२६॥

कञ्चुकोष्णीषवाहनाः पुष्पभूषणभूषिताः।
वहेयुर्वैष्णवा यानं ध्यायन्तो विहगे श्वरम् ॥२७॥

अथवा वैष्णवाः शूद्राः वहेयुर्भक्तिसंयुताः।
विष्णोर्यानस्य परितो भगवद्डिम्बरक्षकाः ॥२८॥

शरचापधराः केचिच्छाक्तिका याष्टिकाः परे।
नैस्त्रिशिका श्च काण्डीरास्तथा फलकपाणयः ॥२९॥

कौन्तिका द्रुघणाः केचित् कञ्चुकोष्णीषधारिणः।
पुरतो देवदेवस्य चतुरङ्गं बलं व्रजेत् ॥३०॥

केचिद्रथे समासीना धनुर्बाणसमन्विताः।
औपवाह्यगजारूढा गरुडध्वजधारिणः ॥३१॥

केचिन्नृत्यत्तुरङ्गस्थाः केतुदण्डधराः परे।
तालवृन्तधराः केचिद् धूपपात्रवहास्तथा ॥३२॥

हेमानि चातपत्राणि रत्नवन्ति महान्ति च।
श्वेतातपत्रं देवार्हं हेमदण्डविभूषितम् ॥३३॥

मायूराण्यातपत्राणि रत्नदण्डानि वै रमे।
मुक्ताफलैर्निर्मितानि राजतानि शुभानि च ॥३४॥

चित्राणि हेमदण्डानि रत्नदण्डानि चापरे।
तोरणानि विचित्राणि पुत्रिका श्च सहस्रशः ॥३५॥

ध्वजान् रक्तान् सितांस्ताम्रां श्चक्रादिलिखितानपि।
शङ्खभेरीमृदङ्गाद्यैर्झल्लरीकाहली तथा ॥३६॥

बृहद्भेरी नागवाद्यं मल्लवाद्यं महास्वनम्।
तूर्याणि विविधानि स्युर्वीणावेणुसकांस्यकम् ॥३७॥

एतान् पारशवा देवि वादयेयुः पुरो हरेः।
नवयौवनसंपन्ना रत्नभूषणभूषिताः ॥३८॥

नर्तक्योऽभिनयन्त्यो वै शृङ्गारादिरसान् बहून्।
गायन्त्यः सुस्वराः सर्वा वाद्यै श्च विविधैरपि ॥३९॥

वेदवेदाङ्गनिपुणा ब्राह्मणाः शुक्लवाससः।
ऊर्ध्वपुण्ड्रैर्द्विषड्भि श्च शोभमानशरीरिणः ॥४०॥

हारोपवीतकटककेयूराङ्गदभूषणाः।
हरिचन्दनलिप्ताङ्गा रत्नकुण्डलधारिणः ॥४१॥

पाञ्चरात्रार्थतत्त्वज्ञाः सपवित्रकरास्तथा।
वैष्णवा भक्तिनिरतास्तुलसीदामभूषणाः ॥४२॥

नानाभाषाविरचिता विष्णुपारम्यसूचकाः।
देवात्यन्तसमीपे तु आचार्यः साधकोऽपि वा ॥४३॥

दीक्षितः पादुकायुक्तं रत्नपात्रं दधद् व्रजेत्।
हरेः पुरो बन्दिनसतु गायेयुर्गानमुत्तमम् ॥४४॥

देवस्य दक्षिणे पा र्श्वे पञ्चरात्रपरायणः।
वासुदेवस्य माहात्म्यं कथयन्तस्तथापरे ॥४५॥

देवस्य पृष्ठभागे तु वैष्णवा वेदपाठकाः।
ॠग्गादिभि श्चतुर्वेदैस्तोषयेयुर्जनार्दनम् ॥४६॥

वामभागे वेदविदो वेदान्तार्थप्रदशकाः।
इतिहासपुराणज्ञाः शाब्दिकास्तार्किकास्तथा ॥४७॥

सांख्यका याज्ञिका श्चैव मीमांसान्यायशोधकाः।
तत्तच्छास्त्रोक्तमार्गेण परस्परजिगीषवः ॥४८॥

शास्त्रेषु नैपुणं सर्वं प्रदर्शयितुमुद्यताः।
भट्टचायः साधका श्च हरेर्वाहनदक्षिणे ॥४९॥

स्वर्णयज्ञोपवीतानि कटिसूत्राणि रत्नवत्।
कुण्डलानि विचित्राणि कङ्कणानि बहूनि च ॥५०॥

अङ्गुलीयानि रत्नै श्च शोभितानि शुचीनि च।
उष्णीषाणि च वस्त्राणि रक्तचन्दनकर्दमम् ॥५१॥

धारयन्तो वाहनस्य गच्छेयुर्देवदर्शकाः।
भट्टाचार्यः पीठभागे साधको वामपा र्श्वगः ॥५२॥

आगतेभ्य श्च भक्तेभ्यो दद्याच्छिरसि पादुकाम्।
तन्मयत्वाद्देशिकेन्द्रो देवोऽहमिति भावयन् ॥५३॥

कुर्यादनुग्रहं सर्वं देवस्यालोक्य चाननम्।
अभिप्रायं यथा राज्ञो ज्ञात्वा तेन प्रदर्शितम् ॥५४॥

ब्रुवन्ति तत्समीपस्था राज्ञां तत्तदनुग्रहम्।
एवं भक्ताननुग्राह्याननुगृह्णणन् गुरूत्तमः ॥५५॥

नयेद्वीथीषु देवेशं शनै श्चतसृषु क्रमात्।
महापीठस्य पुरतो मूलार्चाभिमुखं हरिम् ॥५६॥

स्थापयित्वा दृष्टिदोषान् परिहर्तुं गुरूत्तमः।
दासीन्नियोजयेत् कुम्भदीपमानेतुमञ्जसा ॥५७॥

सुस्नाता धौतवसना स्वच्छमृत्स्त्रोर्ध्वपुण्ड्रकाः।
तरुणी नम्रवदना सर्वाभरणभूषिताः ॥५८॥

संप्राप्तच्चसंस्कारा वैष्णवी भाविता स्वयम्।
नीराजनार्थं देवस्य तालोत्सेधं सलक्षणम् ॥५९॥

हेमादिनिर्मितं कुम्भं शोधयेत् गानपूर्वकम्।
सिद्धार्थवारिणापूर्य स्वर्णाब्जेन पिधाय च ॥६०॥

अ श्वत्थपल्लवैः स्त्रग्भि श्चन्दनैरक्षतैरपि।
घटं तु समलंकृत्य पद्मगर्ते सुनिर्मलम् ॥६१॥

आज्यावसिक्तवर्तिञ्च स्थापयेच्चतुरङ्गुलाम्।
पाकशालाग्निनादीप्य वाद्यघोषपुरःसरम् ॥६२॥

देवस्य पुरः पीठे स्थापयेद् घटदीपिकाम्।
दीपिकामस्त्रमन्त्रेण संप्रोक्ष्य गुरुसत्तमः ॥६३॥

जले तु वरुणं देवं ज्वालायां जातवेदसम्।
आवाह्य गन्धपुष्पाद्यैरर्घ्याद्यैरभिपूजयेत् ॥६४॥

अर्घ्यादिना देवदेवमभ्यर्च्य तदनन्तरम्।
दीपमुद्रां प्रदर्श्याथ दीपमादाय देशिकः ॥६५॥

देवस्य दक्षिणं पादामारभ्येतरपा श्चमम्।
भ्रामयेत् सर्वतोऽङ्गानि द्विवारं वा त्रिवारकम् ॥६६॥

नित्रमन्त्रं जपन्नेव ततः पीठे निवेशयेत्।
सौवर्णादीनि पात्राणि विततानि यथारुचि ॥६७॥

आज्यवर्तिसमेतानि पञ्चषट्सप्तवाष्ट वा।
दास्यो गृहीत्वा पुरतो घटदीपस्य वै रमे ॥६८॥

एवं सर्वविधैर्वाद्यैस्त्रिर्देवं वाहने स्थितम्।
कृत्वा प्रदक्षिणं सर्वा बलिपीठपुरो भुवि ॥६९॥

क्षिपेयुर्दीपिकाः सर्वा यद्वा नीराजनं चरेत्।
सशर्करं मुद्ग दलं पृथुकं च निवेद्य च ॥७०॥

ततो नीराजनं कृत्वा मण्डपे स्थापयेद्धरिम्।
वाहनाद् भद्रपीठे तमवतार्य गुरूत्तमः ॥७१॥

यागमन्दिरमानाय्य वेदैस्तं परितोषयेत्।
चतुःस्थानं प्रदर्श्याथ पुनर्नीराजनं चरेत् ॥७२॥

मूलार्चाभिमुखं तीत्वा तयोर्नीराजनं चरेत्।
बहिः प्रक्लृप्ते शय्याया गृहे पुष्पविभूषिते ॥७३॥

वितानक्षौमसंवीते प्रदीपैः समलंकृते।
निवेश्य मण्डपे देवं श्रमशान्त्यर्थमच्युतम् ॥७४॥

नवभिः कलशैर्देवि स्नापयेद्गन्धवारिभिः।
पुष्पादिभिरलंकृत्य वीणावेणुमृदङ्गकैः ॥७५॥

तोषयित्वा गुलान्नाद्यैर्भक्ष्याणि विनिवेदयेत्।
हंसतूलै श्च पुष्पै श्च कृतायामधिमञ्चकम् ॥७६॥

शय्यां प्रतिदिनं कुर्याच्छ्रीभूमीसहितं तु वा।
दर्शयेच्च चतुःस्थानं मूलबिम्बं च कालयोः ॥७८॥

तत्तत्कर्मावसाने तु चरेन्नीराजनं रमे।
इति श्री श्रीप्र श्नसंहितायां पञ्चत्रिंशोऽध्यायः॥

* * *

षट्त्रिंशोऽध्यायः

आचार्यः प्रातरुत्थाय नित्यकर्म समाप्य च।
गत्वा देवालयं देवि शय्यायां शायितं विभुम् ॥१॥

स्तोत्रैरुपनिषद्भि श्च स्तुत्वा संबोधयेद्धरिम्।
राजोपचारवत् सर्वमुपचारं प्रदर्शयेत् ॥२॥

देवमर्घ्यादिनाभ्यर्च्य क्षीरादीनि निवेदयेत्।
बहिर्मण्डपमासाद्य शयनस्थं जगत्प्रभुम् ॥३॥

उत्थाप्य पूर्ववत्सर्वं देवाय विनिवेदयेत्।
नित्यपूजां समाप्याथ चतुःस्थानार्चनं चरेत् ॥४॥

शङ्खचक्राद्यायुधानि परिवाराणि यस्य वै।
ब्रह्मादीनां च सर्वेषां योऽन्तर्यामी च तिष्ठति ॥५॥

तस्मै जगत्स्वरूपाय वासुदेवाय होमयेत्।
ब्रह्मरूपी श्यामवर्णः पद्मनाभ श्च सानुगः ॥६॥

सङ्कर्षणो रक्तवर्णः सानुगो रुद्ररूपधृत्।
त्रिविक्रमस्त्विन्द्ररूपः सदेवः सपरिच्छदः ॥७॥

प्रणवप्रतिपाद्य श्च वासुदेवः सनातनः।
शुद्धस्फटिकसंकाशो देवः षड्गुणसंयुतः ॥८॥

ऋग्वेदाधिपतिः श्यामवर्णो नारायणः परः।
संकर्षणो रक्तवर्णो यजुर्वेदाधिपः प्रभुः ॥९॥

सामवेदाधिपो हैमः प्रद्युम्नः परिवारवान्।
अथर्वाधिपतिर्देवो नीलोत्पलदलद्युतिः ॥१०॥

शा श्वतस्त्वनिरुद्ध श्च परिवारसमन्वितः।
मुनीनामधिपो विष्णुः पद्मकिंजल्कसंनिभः ॥११॥

गन्धर्वरूपी भगवान् वामनो हेमसंनिभः।
सर्वान्तर्यामिको देवः प्रद्युम्नः कनकप्रभः ॥१२॥

पाण्डराभो यक्षनाथः श्रीधरः श्रीविवर्धनः।
(मासानामधिपो देवः केशवः कनकप्रभः) ॥१३॥

अच्युतः पीतवर्णाभो वत्सराधिपतिर्महान्।
समुद्राणामधिपती रक्तवर्णो जनार्दनः ॥१४॥

शैलानामधिपः पीतो हरिः सपरिचारकः।
शुद्धस्फटिकसंकाशः प्रजाधीशो नरोत्तमः ॥१५॥

भूताधिपः पद्मनाभो बन्धूकसदृशप्रभः।
प श्चाधीशो नीलवर्णः कृष्णः सपरिवारकः ॥१६॥

वृक्षाधिपस्त्वच्युतः स्याच्छ्यामोऽनुचरसंयुतः।
ओषधीशः पद्मनाभः कालमेघनिभाकृतिः ॥१७॥

वनस्पत्यधिपो देवो माधवः स्फटिकाकृतिः।
जरायुजानामधिपो वासुदेवः सितप्रभः ॥१८॥

सङ्कर्षणास्त्वण्डजानामधिपो रक्तवर्णकः।
प्रद्युम्नो हेमसङ्काशः स्वेदजानामधीर श्वरः ॥१९॥

उद्भिजा(ज्जा)धिपतिर्देव अनिरुद्धो जगद्गुरुः।
अनिरुद्धः श्यामवर्णो भुवनानमधी श्वरः ॥२०॥

चतुर्थ्यन्तेभ्य एतेभ्यो जुहुयात्सानुगैरपि।
इत्थं प्राचीनकुण्डे तु हुत्वा पूर्णाहुतिं चरेत् ॥२१॥

कुमुदादिबलिं दद्याच्छास्त्रदृष्टेन वर्त्मना।
हरेः समीपमागत्य कृतं होमं निवेदयेत् ॥२२॥

ध्वजपीठं समासाद्य द्वारार्चनपुरःसरम्।
विहगेन्द्रं समभ्यर्च्य तत्तद्द्वारबलिं क्षिपेत् ॥२३॥

गर्भगेहं समासाद्य बलिबिम्बं समर्च्य च।
तद्बिम्बं यानमारोप्य तच्छिष्यो वाथ तत्सुतः ॥२४॥

सर्वास्वपि च वीथीषु वाद्यघोषपुरःसरम्।
सर्वान् देवान् समुद्दिश्य बलिदानं समुत्क्षिपेत् ॥२५॥

एवं कालद्वये कुर्याद् बलिं तीर्थदिनान्तिमम्।
आरम्भदिवसे रात्रौ प्रातस्तु नवमेऽहनि ॥२६॥

उद्वासनदिने रात्रौ प्रातस्तु कालेष्वेतेषु वै बलिम्।
दद्यादनुक्तकालेषु न दद्यात् कमलासने ॥२७॥

एवं दिवा राजन्यां च नित्यपूजापुरःसरम्।
विशेषयजनं कुर्याद् बल्यन्तं देशिकोत्तमः ॥२८॥

बलिप्रदानात् परतो देवदेवं रमापतिम्।
शिबिकायां रत्नमय्यां नयेन्मन्त्रं समुच्चरन् ॥२९॥

विविधैर्भूषणै श्चापि विचित्रवसनैस्तथा।
सुगन्धपुष्पमाल्याद्यैरलङ्कुर्याद्धरिं प्रभुम् ॥३०॥

अर्घ्यादिभिः समभ्यर्च्य ताम्बूलं च निवेदयेत्।
दर्पणं च प्रदर्श्याथ नीराजनपुरःसरम् ॥३१॥

गीतै श्च विविधैर्नृत्तैस्तन्त्रीवाद्यसमन्वितैः।
राजोचितैः परिजनैरन्यैर्वाद्यगणैः सह ॥३२॥

देवं चतुर्षु वीथीषु भ्रामयेच्च प्रदक्षिणम्।
वीथीषु याति देवेशे भक्ष्याणि न निवेदयेत् ॥३३॥

भक्त्या दत्तानि वस्त्राणि माल्यानि विविधानि च।
अभिमन्त्र्यास्त्रमन्त्रेण सप्तवारं गुरूत्तमः ॥३४॥

देवाङ्गे योजयेत् तानि फलादीनि निवेदयेत्।
महापीठपुरोभागे नीत्वा देवं जनार्दनम् ॥३५॥

देवस्य श्रमशान्त्यर्थं यजेदर्घ्यादिभिस्ततः।
घटदीपं प्रदर्श्याथ पृथुकादीन् निवेदयेत् ॥३६॥

अर्हणं तर्पणं चैव ततो नीराजनं चरेत्।
एवं वीथीष्वहरहर्भ्रामयित्वा रमापतिम् ॥३७॥

भक्तप्रार्थनया देवं तत्कृतं मण्डपं चरेत्।
तत्र स्नानासने देवं स्नापयेद् गन्धवारिधिः ॥३८॥

तत्र सौवर्णपीठे तु स्थापयेज्जगतां पतिम्।
वस्त्राभरणमाल्याद्यैरलंकृत्य यथाविधि ॥३९॥

निवेदयेच्च शाल्यन्नं सघृतं सोपदंशकम्।
माषान्नं च गुडान्नं च मुद्गान्नं घृतुमिश्रितम् ॥४०॥

पायसं च गुडापूपं माषापूपं च लड्डुकम्।
अन्यानि भक्ष्यभोज्यानि लेह्यानि विविधानि च ॥४१॥

स्वादूनि सात्विकान्नानि ह्यार्घ्यदानादिपूर्वकम्।
ततो नीराजनं कृत्वा भक्तेभ्यस्तानि दापयेत् ॥४२॥

अपराह्णे तु समये श्रमशान्त्यै मधुद्विषः।
चन्दनं वासनायुक्तं कर्पूराद्यैः सुभावितम् ॥४३॥

देवस्योरसि चालिप्य मालाभिः समलंक्रियात्।
शीतलं तर्पणजलं नालिकेरोदकान्वितम् ॥४४॥

मुखवासं च ताम्बूलमेलाकर्पूरमिश्रितम्।
श्रमशान्तिनिमित्तानि चान्यानि च निवेदयेत् ॥४५॥

ततो वीणादिवाद्यै श्च गायकास्तोषयेत् प्रभुम्।
सायाह्ने नित्यपूजां च कुर्याद्देवस्य पद्मजे ॥४६॥

शिबिकायामथारोप्य नयेद्वाहनमण्डपम्।
चतुःस्थानार्चनं कुर्याद् बलिदानपुरःसरम् ॥४७॥

याने देवं समरोप्य वीथीभ्रमणमाचरेत्।
एवं पञ्चदिनं सायं प्रात श्चोत्सवमाचरेत् ॥४८॥

षष्ठेऽहनि गजारोहात् पूर्वं देशिकसत्तमः।
उद्याने मण्डपे वापि देवस्य पुरतो भुवि ॥४९॥

धान्यपीठे जलद्रोणीं सौवर्णीं वाथ राजतीम्।
ताम्रजां वा दारुमयीं त्रिहस्तायामनिर्मिताम् ॥५०॥

एकार्धहस्तविस्तीर्णां बिम्बनाभिसमुन्नताम्।
स्थापयित्वा परिस्तीर्य पूरयेद् गन्धवारिभिः ॥५१॥

पुण्याहवारिणा प्रोक्ष्य तस्मिन् वरुणदैवतम्।
अभ्यर्च्य गन्धपुष्पाद्यैर्योगपीठं प्रकल्पयेत् ॥५२॥

श्रिया समेतं देवेशमभ्यर्च्यार्घ्यादिना गुरुः।
पुष्पाञ्जलिधरो भूत्वा प्रार्थयेद् विष्णुमव्ययम् ॥५३॥

उत्सवे श्रमशान्त्यर्थं श्रिया युक्तस्य ते विभो।
अभिषेकं कर्तुमीष्टे जलद्रोण्यां रमापते ॥५४॥

अवातर यथेष्टं त्वं विहरास्यां श्रिया सह।
ॠग्गादि चतुरो वेदान् पठेयुः परितो द्विजाः ॥५५॥

चतुर्विधानि वाद्यानि वादेयुस्तै श्च जीविनः।
देवमर्घ्यादिनाभ्यर्च्य स्नापयेद् गन्धवारिभिः ॥५६॥

कूर्चेन प्रोक्षयेद्वापि मन्त्रानुच्चार्य देशिकः।
गन्धपुष्पैरलंकृत्य मरीच्यन्नं निवेदयेत् ॥५७॥

एवं तस्यां तु यामं वा यामार्धं वा वरानने।
उपचर्य ततो देवं मण्डपे विनिवेशयेत् ॥५८॥

स्नानकाले तु ये विप्राः स्त्रियो वा पादजा अपि।
पश्यन्ति ते हीनपापाः प्राप्नुवन्ति सुखान्यपि ॥५९॥

ऐहिकामुष्मिकान् भोगान् भुञ्जते नात्र संशयः।
आर्द्रवस्त्राणि सर्वाणि भट्टाचार्यः समाहरेत् ॥६०॥

पीताम्बरैर्दुकूलैर्वा वस्त्रैर्वा हरिमव्ययम्।
परिधाय च कर्पूरकुंकुमादिविमिश्रितैः ॥६१॥

चन्दनैर्विविधैः स्रग्भिरलंकुर्याद् गुरूत्तमः।
ततो यथावद्देवेशं पूजयेद् भूतशुद्धिमत् ॥६२॥

गुडान्नादि निवेद्याथ भद्रपीठे नियोज्य च।
धाम प्रदक्षिणीकृत्य मण्डपे स्थापयेद्धरिम् ॥६३॥

सायाह्नसमये प्राप्ते श्रिया सार्धं जगत्पतिम्।
वाहनं गजमारोप्य भ्रामयेद् वीथिषु क्रमात् ॥६४॥

सप्तमे देवि दिवसे प्रातर्नास्त्युत्सवं हरेः।
बलिदानं न कुर्वीत चतुःस्थानं तु पूजयेत् ॥६५॥

श्रीभूमिभ्यां तु देवेशं स्नानमण्डपमानयेत्।
स्नानपीठे स्थितं देवं यजेदर्घ्यादिभिर्गुरुः ॥६६॥

वासनावस्तुभिस्तैलमग्नौ संपच्य देशिकः।
देवस्य श्रमशान्त्यर्थं हरिमभ्यञ्जयेद्रमे ॥६७॥

कङ्कतेन मृजेत् कैशानङ्गानि परिमर्दयेत्।
एकाशीतिघटैः स्नाप्य विधिवत् कमलोद्भवे ॥६८॥

मण्डनासनमानीय श्रीभूमिसहितं विभुम्।
अभ्यर्च्यान्नादिकं सर्वं देवाय विनिवेदयेत् ॥६९॥

अपराह्णे तु संप्राप्ते ध्वजपीठपुरोभुवि।
गोमयाम्भोभिरालिप्य सुधाचूर्णैरलंक्रियात् ॥७०॥

कल्पयित्वा धान्यपीठं क्षालितं हेमनिर्मितम्।
उलूखलं च मुसलान् मण्डयेच्चन्दनादिभिः ॥७१॥

दूर्वाकाण्डैराम्रदलैर्दर्भैर श्वत्थपल्लवैः।
विन्यसेत्तान् धान्यपीठे प्रोक्ष्य पुण्याहवारिणा ॥७२॥

उलूखले श्रियं ध्यायेन्मुसलेष्वनिरुद्धकम्।
हैमाभं रजनीखण्डं द्रोणं कस्तूरिसंज्ञकम् ॥७३॥

उलूखले विनिक्षिप्य चतस्रो गणिकोत्तमाः।
वदनं नासिकारन्ध्रं स्थगयित्वाम्बरेण तु ॥७४॥

अवधातं तु ताः कुर्युर्यथा चूर्णं भवेत्तथा।
गायन्त्यो नृत्यमाना वै तत्रान्या देवदासिकाः ॥७५॥

श्रीसूक्तं भूमिसुक्तं च पठेयुर्वेदपाठकाः।
सप्त वा पञ्च वा कुम्भानेकं वा शुद्धयेत् ततः ॥७६॥

चूर्णैः संचूर्णितं कुम्भं देवस्य पुरतो रमे।
धान्यपीठे विनिक्षिप्य शोषयेच्छोषणादिभिः ॥७७॥

पुण्याहवारिणा प्रोक्ष्य देवमर्घ्यादिभिर्यजेत्।
गुडान्नं वापि मुद्गान्नं देवाय विनिवेदयेत् ॥७८॥

नीराजनं ततः कृत्वा श्रियं चूर्णे समर्चयेत्।
चूर्णकुम्भं समादाय वाद्यघोषपुरः सरम् ॥७९॥

प्रादक्षिण्येन धामान्तः प्रविश्य गुरुसत्तमः।
चूर्णैः श्रीसूक्तमुच्चार्य मूलार्चामभिषेचयेत् ॥८०॥

ततः श्रीपुष्टिसहितं कर्मार्चां स्नापयेद्रमे।
तथैव यानमारोप्य बलिदानपुरःसरम् ॥८१॥

प्रदक्षिणं च वीथीषु वाद्यघोषादिभिः सह।
कारयित्वा देवदेवं मण्डपं पुनरानयेत् ॥८२॥

चूर्णाभिषेकमित्थं च कृत्वा देशिकसत्तमः।
शुद्धवस्त्रैस्ततो देवं शोधयेच्चूर्णरञ्जितम् ॥८३॥

सायाह्ने देवदेवस्य पूजां कृत्वा यथाविधि।
यानमारोप्य च पुनर्वीथीभ्रमणमाचरेत् ॥८४॥

अष्टमे दिवसे प्रातः सायं चोत्सवमाचरेत्।
नवमे दिवसे देवि प्रातर्बल्यन्तमर्चयेत् ॥८५॥

देशिकेन्द्रो यथाशास्त्रं कृत्वा रथवरोत्सवम्।
कुर्यात् ते तत्प्रकारं तु वदामि कमलेक्षणे ॥८६॥

लोहजं दारुजं वापि सर्वलक्षणसंयुतम्।
महारथमलंकुर्याद्धेमघण्टादिभिस्तथा ॥८७॥

मुक्तादामवितानाद्यैः सौवर्णैर्मञ्जरीगणैः।
तपतहाटकतन्तूत्थै श्चैलै श्चत्रविचित्रितैः ॥८८॥

कदलीनारिकेलादिफलैः पूगफलैरपि।
रम्भास्तम्भैरिक्षुदण्डैर श्वत्थाप्रादितोरणैः ॥८९॥

सौवर्णकुम्भशिखरं गरुडध्वजमण्डितम्।
रथं पुण्याहसलिलैः प्रोक्षयेद्रथशुद्धये ॥९०॥

अभ्यर्च्य विहगाधीशं रथरूपिणमब्जजे।
रथद्वारार्चनं कृत्वा तद्देवानां बलिं क्षिपेत् ॥९१॥

नूतनं चेद्रथं देवि प्रतिष्ठा विधिवद् गुरुः।
कृत्वा रथे वरे देवं निनयेन्मूर्तिपैः सह ॥९२॥

तत्प्रकारं प्रवक्ष्यामि शृणु पङ्कजमालिनि।
महारथमलंकृत्य शोधयेन्मार्जनादिभिः ॥९३॥

रथस्य पुरतो वापि ऐशान्यां वा गुरूत्तमः।
यज्ञागारं कल्पयित्वा कुण्डेनैकेन संयुतम् ॥९४॥

रम्भास्तम्भैरलंकृत्य सुधाचूर्णै श्च शोभयेत्।
पुण्याहसलिलैः प्रोक्ष्य यागाशालां रथं तथा ॥९५॥

वेदिकायां धान्यपीठे नवकुम्भानलंकृतान्।
संस्थाप्याग्निं समुत्पाद्य जातकर्मादिकाः क्रियाः ॥९६॥

कृत्वा सोमं प्रकुर्वीत मानोन्मानविशुद्धये।
तत्त्वन्यासादिहोमा श्च कुर्यान्मन्त्रै श्च देशिकः ॥९७॥

रथस्थवासुदेवस्य रक्षाबन्धनमाचरेत्।
जलाधिवासं कूर्चे स्यात् स्नपनं तु तत श्चरेत् ॥९८॥

कुम्भेष्वपि च सर्वेषु योगपीठं प्रकल्पयेत्।
रथे ह्यावाहितान् देवान् मध्यकुम्भेषु पूजयेत् ॥९९॥

इन्द्रादीनपकुम्भेषु समाराध्य ततो गुरुः।
वह्नौ पीठं पुरा कृत्वा रथदेवांस्तु तत्र वै ॥१००॥

अनिरुद्धात् समुद्भूतानावाह्य क्रमयोगतः।
अर्घ्यदानादिभोज्यान्तं तत्तन्मन्त्रं समुच्चरन् ॥१०१॥

स्वाहान्तेन यजेत् पूर्वं नृसूक्तेन चरुं ततः।
तत्तद्देवान् समुद्दिश्य अष्टाविंशतिसंख्यया ॥१०२॥

समिद्भिर्जुहुयात्पूर्वं गोघृतेन ततः परम्।
हुत्वा पूर्णाहुतिं कुम्भे नृसूक्तेन न्यसेद् गुरुः ॥१०३॥

निषद्भिः पञ्चभि श्चैव शान्तिहोमं समाचरेत्।
कुमुदादिबलिं दद्यात् ब्राह्मणान् भोजयेत् ततः ॥१०४॥

एवं कालत्रये वापि कालयोर्वा यजेद्रमं।
शुभे मुहूर्ते त्वाचार्यो महाकुम्भलजेन वै ॥१०५॥

रथस्य शिखरं प्राप्य प्रोक्षयेद् गुरुसत्तमः।
वासुदेवं तु शिखरो देवानङ्गेषु वै स्मरेत् ॥१०६॥

प्रणवेन पिधायाथ ब्रह्मरन्ध्रं गुरूत्तमः।
उपकुम्भाष्टकजलैरिन्द्रादीन् प्रोक्षयेद्रमे ॥१०७॥

तत्र तत्र स्थितान् देवान् रथस्थान् क्रमशोऽर्चयेत्।
ब्रह्मासनस्य परितः शङ्खादीनर्चयेद् रमे ॥१०८॥

देवासनस्य परितो यजेत कुमुदादिकान्।
मानुषस्यासने देवि पुरुहूतादिकान् यजेत् ॥१०९॥

रथस्तम्भेषु धर्मादीनधर्मादीन् विदिक्षु च।
अधोक्षजाद्यष्टमूर्तीस्तृतीयापङ्क्तिषु स्मरेत् ॥११०॥

द्वितीयापङ्क्तिषु रमे मत्स्यादीनर्चयेत् क्रमात्।
आधारपङ्क्तिषु तथा केशवादीन् समर्चयेत् ॥१११॥

आधारपीठकोणेषु सत्यादीनर्चयेद् गुरुः।
आधारे पन्नगाधीशं तथाधारे तु कूर्मकम् ॥११२॥

रथाक्षेषु च मायां च चक्रेषु शशिभास्करौ।
तुरगेषू च वेदां श्च सारथौ विधिमर्चयेत् ॥११३॥

ध्वजे तु गरुडं ध्यायेदातपत्रे त्वहीपतिम्।
एवमभ्यर्च्य विधिवत् डोलां संपूजयेत् ततः ॥११४॥

शयनागारमासाद्य देवं दीक्षितो मूर्तिपैः सह।
श्रीभूमिसहितं देवं निनयेद् भद्रविष्टरे ॥११५॥

भूषाद्यैः समलंकृत्य दर्पणं तु प्रदर्शयेत्।
मुखवाससमोपेतं ताम्बूलं च निवेदयेत् ॥११६॥

यात्राविघ्नप्रशान्त्यर्थं बीजदानादिकं चरेत्।
वेदघोषैर्वाद्यघोषैः शङ्खघण्टारवैरपि ॥११७॥

यात्रोपकरणैः सार्धं चामरैर्वीजितं रमे।
मन्दं मन्दं वहेयुस्ते भक्ता यानं हरिस्थितम् ॥११८॥

ततः सोपानमार्गेण रथमारोपयेद् विभुम्।
डोलायां च निवेश्याथ देवमर्घ्यादिना यजेत् ॥११९॥

गुलान्नं घृतसंयुक्तं एलाकर्पूरमिश्रितम्।
निवेद्य तर्पणं दत्वा नीराजनमथाचरेत् ॥१२०॥

ततस्तद्रथयानं तु वीथीषु चतुर्षु क्रमात्।
प्रादक्षिण्येन सदनं भ्रामयेत् सुप्रयत्नतः ॥१२१॥

प्राप्ते रथे यथास्थानं नीराजनमत श्चरेत्।
गर्भगेहं प्रविश्याथ देशिकः साधकैः सह ॥१२२॥

प्रणम्य दण्डवन्मूलं प्रार्थयेद् गाथयानया।
यज्ञमूर्ते जगन्नाथ पुण्यतीर्थ दयानिधे ॥१२३॥

उत्सवावभृथार्थाय बिम्बेऽस्मिन् सन्निधिं कुरु।
इति मूलात् तीर्थबिम्बे शक्तिमावाह्य मन्त्रवित् ॥१२४॥

रक्षाबन्धं च विधिवत् कृत्वा संपूजयेत् ततः।
शिबिकायां तीर्थमूर्तिमारोप्यालंक्रियाद् गुरुः ॥१२५॥

रथस्थमपि देवेशं यानमारोपयेद् रमे।
तीर्थबिम्बेन सहितं तीर्थस्नानं नयेद्धरिम् ॥१२६॥

तत्र स्थितं मण्डपं तु पुण्याहैः प्रोक्षयेत् पुरा।
तत्र सिंहासने देवमवतार्य गुरूत्तमाः ॥१२७॥

कर्मबिम्बस्य पुरतः स्नानपीठं निवेशयेत्।
तस्मिन्निधाय तीर्थार्चां पुण्याहमपि वाचयेत् ॥१२८॥

द्रव्याणि स्नानयोग्यानि तीर्थं च प्रोक्षयेत् पुरा।
तीर्थे तु विरजां ध्यात्वा यजेदर्घ्यादिना क्रमात् ॥१२९॥

मन्त्रासनादिस्नानान्तमर्चयित्वा गुरूत्तमः।
अभिषिञ्चेत् तीर्थबेरं नवभिः कलशैस्ततः ॥१३०॥

पृथुकादीन् निवेद्याथ दर्शयेद् दीपमादरात्।
तीर्थबिम्बं समादाय शिरसा धारयन् गुरुः ॥१३१॥

जलमध्यं संप्रविश्य नाभिदघ्नजले स्थितः।
निमज्जेत् तीर्थबिम्बेन त्रिवारं मूर्तिपैः सह ॥१३२॥

देवेन सह तत्काले निमज्जन्ति च ये जनाः।
विमुक्तकल्मषाः सर्वे प्राप्नुयुः परमां गतिम् ॥१३३॥

तीरमासाद्य तद्बिम्बं विष्टरे स्थापयेद्रमे।
स्नानवस्त्रं विसृज्याथ वस्त्रेऽन्ये परिधापयेत् ॥१३४॥

कर्मबिम्बेन वै सार्धं तीर्थबिम्बं च देशिकः।
प्रादक्षिण्येन धामान्तः प्रावेश्य तदनन्तरम् ॥१३५॥

प्रदर्श्य घटदीपं च कर्मार्चां मण्डपं नयेत्।
मूलबेरसमीपं च तीर्थबेरं नयेत् ततः ॥१३६॥

तीर्थबिम्बगतां शक्तिं मूलबेरे नियोजयेत्।
त्वत्प्रीतये रमानाथ तीर्थोत्सवमनुत्तमम् ॥१३७॥

मया कृतं बालिशेन तत्क्षमस्व जगद्गुरो।
विज्ञाप्यैवं तीर्थबिम्बात् कौतुकं विसृजेत् रमे ॥१३८॥

अभावे तीर्थबिम्बस्य स्नानबिम्बेन तत्क्रियाम्।
बल्यर्चया तद्विहीने पादुकाभ्यां वा चरेद् गुरुः ॥१३९॥

मण्डपे देवदेवस्य हविरादिनिवेदयेत्।
सायाह्नसमये देवं शय्यान्तं पूजयेत् क्रमात् ॥१४०॥

इति श्री श्रीप्रश्नसंहितायां षट्त्रिंशोऽध्यायः॥

* * *

सप्तत्रिंशोऽध्यायः

परस्मिन्नहनि प्रातः कृतकर्मा गुरूत्तमः।
साधकैर्मूर्तिपैः साकं प्रविश्य भगवद्गृहम् ॥१॥

अग्न्यागारं प्रविश्याथ द्वारतोरणपूर्वकम्।
अङ्कुराणां च पूजां च चतुःस्थानार्चनं तथा ॥२॥

मूलबेरादिबिम्बानां नित्यपूजां समाचरेत्।
मध्याह्नसमये देवं श्रीभूमिभ्यां समन्वितम् ॥३॥

कलशैः पञ्चविंशद्भिः स्नापयेन्मखपूर्तये।
महाहविर्निवेद्याथ वैष्णवानां प्रदापयेत् ॥४॥

सायाह्ने पुष्पयागं तु कुर्यात् तस्य विधिं शृणु।
प्रथमावरणे वापि द्वितीयावरणेऽपि वा ॥५॥

देवस्य पुष्पयागार्थं द्वारतोरणकुम्भवत्।
दर्भतोरणमालाद्यै रम्भास्तम्भैरलंकृतम् ॥६॥

घृतदीपै श्च बहुशः कल्पयेन्मण्डपं पुरा।
तस्मिन्नीत्वा देवदेवं स्थापयेत् सिंहविष्टरे ॥७॥

मण्डनासनभोगै श्च पूजयेद्धरिमव्ययम्।
देवस्य पुरतो वेद्यां धान्यपीठं प्रकल्पयेत् ॥८॥

पुण्याहवारिभिः प्रोक्ष्य यागद्रव्याणि वै रमे।
तस्मिन् वस्त्रं परिस्तीर्य प्रसूनैः पञ्चवर्णकैः ॥९॥

यद्वा तत्कालजैः पुष्पैः सात्त्विकैः सुमनोहरैः।
तुलसीपल्लवैः श्यामैः कृष्णै श्चक्राब्जमण्डलम् ॥१०॥

कल्पयित्वोक्तमार्गेण मण्डलस्य बहिर्गुरुम्।
ईशानकोणे हेमादिनिर्मितं घटमुत्तमम् ॥११॥

स्थापयेत् पालिकादीं श्च क्षालयेन्मन्त्रपूर्वकम्।
सुगन्धिचन्दनैस्तेषां बिम्बमूलानि पूरयेत् ॥१२॥

बिलानि पूरयेत् तेषां निशाचूर्णाक्षतैस्ततः।
मण्डलस्योत्तरे पा र्श्वे धान्यपीठे नियोजयेत् ॥१३॥

द्वारपूजादिकान् सर्वान् विधिवत् कारयेद् गुरुः।
सोमकुम्भं च तद्धोमं वर्जयेदत्र कर्मणि ॥१४॥

प्रोक्ष्य पुण्याहतोयेन कुम्भमण्डलपालिकाः।
वेद्याः प्राचीनभूभागे कुण्डे वा स्थण्डिलेऽपि वा ॥१५॥

वासुदेवस्य पूजार्थमग्निमुत्पादयेद् रमे।
पूर्वोक्तवर्त्मना देवान् पालिकास्वर्चयेत् क्रमात् ॥१६॥

श्रियं प्रसूनेष्वावाह्य तेषु पुष्पाणि वापयेत्।
द्वादशस्वब्जपत्रेषु कर्णिकायां तथैव च ॥१७॥

कुम्भे च पीठं संकल्प्य परतत्त्वस्वरूपिणम्।
वासुदेवं कुम्भमध्ये ध्यात्वा संपूजयेत् ततः ॥१८॥

सुदर्शनं समाराध्य करके तु चतुर्भुजम्।
देवान् संपूजयेद् विद्वान् मण्डलावरणस्थितान् ॥१९॥

चक्राब्जकर्णिकामध्ये प्रणवाधिपमव्ययम्।
शङ्खचक्रगदाशाङ्र्गनन्दकाद्यैरलंकृतम् ॥२०॥

वासुदेवं चतुर्बाहुं ध्यात्वा दीपान्तमर्चयेत्।
प्रागादिदलमूलेषु द्वादशार्णानि पूजयेत् ॥२१॥

दलमध्येषु कूर्चेषु केशवादीन् विचिन्तयेत्।
दलाग्रेष्वर्चयेन्मन्त्री प्रणवं स्फटिकप्रभम् ॥२२॥

देवमभ्यचर्य तदनु ध्यायेद् वह्नौ तु मण्डलम्।
मण्डलस्थान् यजेद् देवान् सर्वानाज्येन पूर्ववत् ॥२३॥

नृसूक्तेन चरुं हुत्वा समिद्भिः षोडशाहुतीः।
केशवादीन् समुद्दिश्य यजेदाज्येन देशिकः ॥२४॥

हुत्वा पूर्णाहुतिं प श्चात् यजेत्कुम्भादिषु क्रमात्।
शान्तिहोमं ततः कृत्वा वह्निमण्डलसंस्थितान् ॥२५॥

प्रसूनमण्डले ध्यात्वा पायसान्नं निवेदयेत्।
ततः पुष्पाञ्जलिर्भूत्वा प्रार्थयेद्धरिमव्ययम् ॥२६॥

श्रियः पते वासुदेव सर्वलोकैकरक्षक।
महोत्सवक्रियामन्त्रद्रव्यलोपादिशान्तये ॥२७॥

मया कृतं पुष्पयागं गृहाण परमे श्वर।
इति विज्ञाप्य देवेशमारभेद् द्वादशार्चनम् ॥२८॥

प्राक्पत्रमूलाद्वर्णं च केशवं प्राणवं तथा।
प्रसूनपात्रे चावाह्य बिम्बनाभौ गुरूत्तमः ॥२९॥

कूर्चेन विन्यसेत् पूर्वं देवं संपूजयेत् ततः।
अर्घ्यं पाद्यं तथा चामं ब्रह्मसूत्रं च चन्दनम् ॥३०॥

माल्यं धूपं दीपिकां च फलं नीराजनं ततः।
एलाकर्पूरसंमिश्रताम्बूलं च निवेदयेत् ॥३१॥

देवाङ्गेषु स्थितिन्यासं न्यसेद् देशिकसत्तमः।
एवं प्रत्यक्षरन्यासं न्यसेत् पूजां च वै चरेत् ॥३२॥

पालिकासु स्थितान् देवां श्चक्राब्जे तु विचिन्तयेत्।
चक्राब्जाद् वासुदेवं च कुम्भं संप्रार्थयेद्धरिम् ॥३३॥

कुम्भस्थं देवबिम्बे तु प्रार्थयेत् कमलेक्षणे।
ततो मण्डलपुष्पाणि समादाय गुरुः स्वयम् ॥३४॥

सूक्तेन पौरुषेणैव ह्यभिषिञ्चेज्जनार्दनम्।
कुम्भतोयेन संप्रोक्ष्य नीराजनमथाचरेत् ॥३५॥

निवेद्य सात्त्विकान्नानि भक्ष्याणि विविधानि च।
भक्तेभ्यस्तानि दत्वाथ देवस्योत्सवमाचरेत् ॥३६॥

श्रीभूमिसहितं वापि देवेशं भद्र विष्टरे।
संस्थाप्य समलंकृत्य पुष्पाद्यैर्देशिकोत्तमः ॥३७॥

घृतावसिक्तैर्बहुभिर्दीपैर्बहुमुखैस्तथा।
यात्रोपकरणै श्चैव नृत्तगीतपुरःसरम् ॥३८॥

वीथीषु निनयेद् देवं वेदघोषसमन्वितम्।
धामान्तर्देवमानीय बलिपीठपुरो भुवि ॥३९॥

स्थापयेद् विष्टरे देवं मूलार्चाभिमुखं हरिम्।
तदोपनिषदा देवं भट्टाचार्यः कृताञ्जलिः ॥४०॥

(तोषयित्वा स्तवैर्विष्णुं प्रार्थयेद् गाथयानया।)
सहस्रशीर्षदेवेश सहस्रनयनोज्ज्वल ॥४१॥

सहस्रभुजसंयुक्त सहस्रचरणाम्बुज।
अनिरुद्धस्वरूप त्वं ब्रह्मादीनां दिवौकसाम् ॥४२॥

महोत्सवस्य सेवार्थमागतानां नृणामपि।
स्वस्थानगमनार्थाय देह्यनुज्ञां जगत्प्रभो ॥४३॥

इति विज्ञाप्य देवेशंताननुज्ञापयेद्धरे।
त्वन्नाभिकमलोद्भूतं वाग्गायत्रीसमन्वितम् ॥४४॥

ब्रह्माणं सत्यलोकेशं राजहंसस्थितं विभुम्।
त्वनमहोत्सवसेवार्थमागतं वैष्णवोत्तमम् ॥४५॥

एनं स्वस्थानयानार्थमाज्ञापय जगत्प्रभो।
त्वन्मुखाम्बुजसंभूतं शचीनाथं पुरंदरम् ॥४६॥

ऐरावणगजारूढममरावत्यधी श्वर्।
त्वन्महोत्सवसेवार्थमागतं वैष्णवोत्तमम् ॥४७॥

त्वद्वक्त्राम्बुजसंभूतं तेजोप(व)ति पुरी श्वरम्।
स्वधास्वाहापतिं वह्नि मेषस्थं शक्तिपाणिनम् ॥४८॥

त्वन्महोत्सवसेवार्थमागतं वैष्णवोत्तमम्।
त्वद्वामबाहुजं कालं श्यामलानायकं विभुम् ॥४९॥

संयमीनगराधीशं महिषस्थं त्रिलोचनम्।
त्वन्महोत्सवसेवार्थमागतं वैष्णवोत्तमम् ॥५०॥

त्वत्पादपङ्कजोद्भूत निर्ऋतं भूतवाहनम्।
कृष्णाङ्गनाधिपं क्रूरं दीर्घिकानायिकान्वितम् ॥५१॥

त्वन्महोत्सवसेवार्थमागतं वैष्णवोत्तमम्।
त्वद्गुह्यजं पाशधरं श्रद्धावत्यधिनायकम् ॥५२॥

वरुणं शीतलानाथं महामकरवाहनम्।
त्वन्महोत्सवसेवार्थमागतं वैष्णवोत्तमम् ॥५३॥

त्वत्प्राणजं मृगारूढं गन्धवत्यधिनायकम्।
वायुं सदागतीनाथं ध्वजहस्तं महाबलम् ॥५४॥

त्वन्महोत्सवसेवार्थमागतं वैष्णवोत्तमम्।
त्वदूरुजं निधिधरं शिवमित्रं धनाधिपम् ॥५५॥

नरवाहसमारूढं संपद्देव्यलंकाधिपम्।
त्वन्महोत्सवसेवार्थमागतं वैष्णवोत्तमम् ॥५६॥

त्वद्दक्षिणभुजोद्भूतं यशोवत्यधिपं हरम्।
उमापति शूलधरं त्रिनेत्र वृषवाहनम् ॥५७॥

त्वन्महोत्सवसेवार्थमागतं वैष्णवोत्तमम्।
देशाद् देशात्सहायाता ब्राह्मणाः क्षत्रिया विशः ॥५८॥

शूद्र श्च वैष्णवाः सर्वे देवसेवार्थमागताः।
तेषां स्वदेशगमनमनुजानीहि माधव ॥५९॥

हरेर्वदनमालोक्य प्राप्यानुज्ञां जगद्गुरोः।
तेभ्यः स्वदेशगमनं दद्याद् देशिकसत्तमः ॥६०॥

ततो यागालयं देवमानीयाभिप्रदर्शयेत्।
चतुःस्थानार्चयं वेदसमाप्तिं कारयेद्गुरुः ॥६१॥

पालिकासु स्थितान् देवां श्चक्राब्जे तु नियोजयेत्।
सांकुरं पात्रमानीय प्रार्थयेद्धरिमव्ययम् ॥६२॥

भगवन् पुण्डरीकाक्ष शरणागतवत्सल।
अङ्कुरार्पणमारभ्य उत्सवावभृथान्तिमम् ॥६३॥

यन्मयानुष्ठितं कर्म तव संप्रीतये विभो।
तथान्यैर्मदनुज्ञातै ऋत्विग्भि श्चापि यत्कृतम् ॥६४॥

साधकै श्च तथान्यै श्च विविधैः परिचारकैः।
तत्तत्संपूरणार्थाय न्यूनाधिक्योपशान्तये ॥६५॥

मङ्गलाङ्कुरपूजां त्वं गृहण कमलापते।
इति विज्ञाप्य तदनु श्रीसूक्तेनार्चयेद् विभुम् ॥६६॥

नीराजनं ततः कृत्वा घटदीपं प्रदर्शयेत्।
ततः सोपानमार्गेण भगवन्तं गुरूत्तमः ॥६७॥

मन्दं मन्दं च निनयेद् गर्भगेहं रमापतिम्।
मूलार्चाभिमुखे स्थाप्य तयोर्नीराजनं चरेत् ॥६८॥

आचार्यस्य नियोगेन बहिर्गत्वा तु साधकः।
देवानुद्वासयेत्सर्वान् ब्रह्मादीन् कमलोद्भवे ॥६९॥

बलिबिम्बं तु शिबिकां यानमारोप्य साधकः।
चण्डादिसुप्रतिष्ठान्तं बलि दत्वा यथाविधि ॥७०॥

कुमुदादीन् समुद्वास्य महापीठे नियोजयेत्।
ब्रह्मादीशानपर्यन्तं प्रक्षिपेत् सोदकं बलिम् ॥७१॥

समाहूताः पुरा यैस्ते ब्रह्माद्याः सुरसत्तमाः।
श्लोकैस्तैरेव संबोध्य स्वस्वदेशं नयेद् सुधीः ॥७२॥

महापीठे बलिं क्षिप्त्वा प्रदक्षिणपुरःसरम्।
ध्वजपीठं समासाद्य विहगेन्द्रं समर्चयेत् ॥७३॥

सात्त्विकान्नं निवेद्याथ ध्वजस्थं विहगाधिपम्।
उद्वास्य मूलपाक्षीन्द्रे कुर्यान्नीराजनं ततः ॥७४॥

अवरोप्य ध्वजं प श्चाच्छिरसा धारयन् गुरुः।
गर्भगेहं समासाद्य मूलार्चापादपङ्कजे ॥७५॥

ध्वजवस्त्रं समर्प्याथ चतुःस्थानस्य पूजनम्।
कृत्वा मण्डलवह्निस्थं देवं बिम्बे नियोजयेत् ॥७६॥

द्वारतोरणकुम्भस्थान् महापीठे नियोजयेत्।
मखार्चा यानमारोप्य वहेयुर्मूर्तिपास्ततः ॥७७॥

महाकुम्भोषकुम्भां श्च यात्रोपकरणैः सह।
वेदघोषैर्वाद्यघोषैर्गच्छेयुर्देवमन्दिरम् ॥७८॥

करकं च समादाय धारयाच्छिन्नया सह।
भट्टाचार्यः पुरस्तेषां व्रजेदस्त्रं समुच्चरन् ॥७९॥

देवस्य पुरतो धान्यपीठे कुम्भान् निवेशयेत्।
कर्मादिबिम्बान् स्वस्थाने विष्टरे स्थापयेद्रमे ॥८०॥

मूलादिबलिबिम्बान्तमध्यदानादिभिर्यजेत्।
पायसान्नं निवेद्याथ पुष्पाञ्जलिधरो गुरुः ॥८१॥

ततो यवनिकाकाण्डपटेनाच्छादयेत्तिरः।
महोत्सवार्थं यथाशक्तिर्मूलवेराच्च कर्मणि ॥८२॥

कौतुके यज्ञबल्यो श्च बेरे कुम्भे विचिन्तिता।
करपुष्पाञ्जलौ शक्ति संप्रार्थ्य पुरतो रमे ॥८३॥

तत्पुष्पाणि हरेर्मूर्ध्नि ह्यर्पयेद्ध्यानमास्थितः।
अपनीते यवनिकां घटदीपं प्रदर्शयेत् ॥८४॥

प्रोक्षयेत् कुम्भतोयेन देवं पुंसूक्तमुच्चरन्।
ततः संप्रार्थयेद् देवं नमस्कृत्य कृताञ्जलिः ॥८५॥

देवदेव जगन्नाथ सर्वलोकनमस्कृत।
आदिमध्यान्तरहित सर्वभूतहृदिस्थित ॥८६॥

भगवन् वासुदेवस्त्वं त्वद्वक्षःस्थलवासिनी।
कमला च युवां सर्वलोकानामादिकारणौ ॥८७॥

त्वं विष्णुः कमला लक्ष्मीस्त्वं रुद्रः कमला शिवा।
त्वं ब्रह्मा कमला वाणी त्वं शक्रः कमला षची ॥८८॥

त्वमग्निः श्रीः स्वधा स्वाहा त्वं यमो हरिणी तु मा।
नैर्ऋतिस्त्वं दीर्घिका श्रीः पाशी त्वंन शीतला रमा ॥८९॥

सदागतिः श्रीस्त्वं वायुस्त्वं श्रीदः संपदिन्दिरा।
ज्योत्स्ना लक्ष्मीस्तथेन्दुस्त्वं सूर्यस्त्वं तु प्रभा च मा ॥९०॥

इत्थं युवां लोकरक्षादीक्षितौ पितरौ हरे।
एवं लोकहितार्थाय तत्तत्काले भविष्यतः ॥९१॥

सदानपायिनीयुक्तचिन्मयानन्दविग्रह।
एवंविधस्य भवतः सर्वज्ञस्य तव प्रभो ॥९२॥

प्रियाप्रियमविज्ञात्रा बालिशेन मया कृतम्।
शास्त्रीयं वाप्यशास्त्रीयं त्वमेव ज्ञातुमर्हसि ॥९३॥

अपचारं मया यद्यदुत्सवे भक्तवत्सल।
शरणागतभक्तस्य गृहाण श्रीसमन्वित ॥९४॥

इति विज्ञाप्य देवस्य रक्षासूत्रस्थितां श्रियम्।
श्रीवत्से चिन्तयेद् देवि रक्षासूत्राणि मोचयेत् ॥९५॥

आचार्यादीनां च सर्वेषां कौतुकं मोचयेद् रमे।
शय्यान्तं पूजयेद् देवं विधिवद् देशिकोत्तमः ॥९६॥

तदन्येद्युः प्रभाते तु यजमानो गुरूत्तमम्।
वस्त्रभूषणगोभि श्च धनैर्भूमिभिरादरात् ॥९७॥

संमान्य चामराभ्यां च छत्राभ्यां च ध्वजादिभिः।
शङ्खतुर्यादिघोषै श्च देवोपकरणैरपि ॥९८॥

आचार्यं प्रापयेद्धीमान् गृहं तस्य सहानुगैः।
यजमानोऽप्यालयस्थपरिचारगणैर्व्रजेत् ॥९९॥

आचार्यः स्वगृहं गत्वा सर्वान् संपूजयेत् क्रमात्।
तदात्वध्वजदण्डं च तद्वस्त्राणि गुरूत्तमः ॥१००॥

यागावशिष्टद्रव्याणि स्वकीयानि स्वयं हरेत्।
उत्सवानन्तरं देवि देवस्य श्रमशान्तये ॥१०१॥

नित्यपूजां समाप्याथ प्रथमावरणादिषु।
मण्डपे देवमानाय्य पूजयेच्छैत्यवस्तुभिः ॥१०२॥

उद्यानादिषु क्लृप्तेषु मण्डपेषु च भक्तितः।
संप्रार्थितो भक्तजनैस्तत्राप्यानाय्य देशिकः ॥१०३॥

गन्धतोयादिभिः पूर्वं स्नापयित्वा यथाविधि।
गन्धैः संलिप्य देवेशं मल्लिकाकुसुमादिभिः ॥१०४॥

भूषणै श्चाप्यलंकृत्य तालवृन्तैरुशीरजैः।
हिमवत्सलिलासिक्तैर्झणज्झणितकङ्कणाः ॥१०५॥

सर्वालंकारसंयुक्ताः शोभिताः पुष्पभूषणैः।
शुभ्रवस्त्रा गन्धवत्यो दास्यस्तु परितो रमे ॥१०६॥

वीजयेयु श्च देवेशं नृत्येयुः का श्च दासिकाः।
गायेयुरपराः कां श्चद् वीणावेणुमृदङ्गकैः ॥१०७॥

तोषयेयुर्हृषीकेशमित्थं शैत्योपचारतः।
ततः सायाह्नसमये देवमर्घ्यादिना यजेत् ॥१०८॥

शर्करान्नादिभक्ष्याणि निवेद्य तदनन्तरम्।
मन्दं मन्दं देवदेवमालयं प्रापयेद् गुरुः ॥१०९॥

यथाक्रमं रात्रिपूजां कुर्याद् देशिकसत्तमः।
शैत्योत्सवस्य चैतस्य दिनसंख्या न विद्यते ॥११०॥

चतुःस्थानार्चनं चापि नास्त्येतस्य वरानने।
इत्थमेवं वसन्तेऽपि देवस्योत्सवमाचरेत् ॥१११॥

EXCERPTS FROM AJITAGAMA
(KRIYAPADA 27)

(उत्सवशब्दार्थः)

अथोत्सवविधिं वक्ष्ये सर्वलोकहितावहम्।
सवः कल्याणमित्युक्तं सर्वजन्तुसुखावहम् ॥१॥

उद्भूतस्तु सवो यस्मात्तस्मादुत्सव उच्यते।
नवप्रकारस्तस्यायं क्रमाद्भेदो विधीयते ॥२॥

(उत्सवभेदाः)

शैवो गौणोऽथ भौत श्च प्रथमत्रितयं भवेत्।
भौवन श्च चतुर्थ श्च शाक्तः पञ्चम एव च ॥३॥

रौद्रः षष्ठस्तथा सौरः सप्तमः परिकीर्तितः।
अष्टमो मानवः प्रोक्तों नावमः पक्ष एव हि ॥४॥

एकाहस्तु भवेच्छैवस्त्रियहो गौण उच्यते।
पञ्चाहो भौत उद्दिष्टः सप्ताहो भौवनः स्मृतः ॥५॥

नवाहः शाक्त इत्युक्तो रौद्र एकादशाहकः।
द्वादशाहस्तु सौरः स्यान्मानवः स्याच्चतुर्दश ॥६॥

पक्षः पञ्चदशाहस्तु नामान्येतानि योगतः।
तीर्थार्थमुत्सवारम्भस्तस्मात्तीर्थर्क्षमुच्यते ॥७॥

चैत्रे त्वाष्ट्रभमुद्दिष्टं वैशाखे शूर्पमुच्यते।
ज्येष्ठे मूलमथाषाढे वै श्वदेवमिति स्मृतम् ॥८॥

श्रावणे तु श्रविष्ठा स्यात्प्रोष्ठपदे त्वजैकपाद्।
अ श्विनी चा श्वयुङ्मासे कार्तिके मासि कृत्तिका ॥९॥

मार्गशीर्षे तथा मासे रौद्रनक्षत्रमुच्यते।
बार्हस्पत्यं भवेत्पुष्ये माघे पैत्रमिति स्मृतम् ॥१०॥

फाल्गुने मासि चार्यम्णो नक्षत्रं तीर्थभं भवेत्।
मासर्क्षाण्येवमुक्तानि तीर्थार्थं तु जनार्दन ॥११॥

पूर्णमासीयुतान्येव नक्षत्राणि भवन्ति हि।
वियुक्तेष्वपि भेष्वेषु नद्यादौ तीर्थमुच्यते ॥१२॥

युक्ते वाथ वियुक्ते वा मासर्क्षेण तु पर्वणि।
समुद्रतीर्थमुद्दिष्टं सर्वपापप्रणाशनम् ॥१३॥

चैत्रादि सर्वमासेषु रौद्रर्क्षं तीर्थभं भवेत्।
षष्ठी माघे तथा ज्येष्ठे चाष्टमी कृष्णपक्षके ॥१४॥

तीर्थार्थे तु तिथी प्रोक्ते सर्वकामफलप्रदे।
उभयोः पक्षयो श्चापि पर्वं तद्वच्चतुर्दशीम् ॥१५॥

सर्वमासेषु तीर्थार्थं कल्पयेत्कल्पवित्तमः।
यजमानस्य जन्मर्क्षं ग्रामादीनां तथैव च ॥१६॥

लिङ्गस्थापननक्षत्रं तथा चैवायनद्वयम्।
विषुवद्वयं जनमर्क्षं भूपतीनां विशेषतः ॥१७॥

नक्षत्रतीर्थं संकल्प्य तिथ्यादिषु न कारयेत्।
नक्षत्रं मुख्यमेवं स्यात्तिथ्यादि गौणमेव च ॥१८॥

तस्मान्नक्षत्रसंकल्पे तिथ्यादितीर्थकं न हि।
यदि मोहाच्च कुर्वीत तत्कर्तुः सर्वदोषकृत् ॥१९॥

तीर्थर्क्षद्वयसंप्राप्तौ चैकमासे परस्परम्।
ध्वजारोहादितीर्थान्तमेकमासे प्रशस्यते ॥२०॥

यागारम्भादि मध्यं स्यादन्यतीर्थाच्च केवलात्।

(नवविधोत्सवस्वरूपम्)

उत्सवेषु नवस्वेषु शैवाद्यैस्तु भवेत्त्रिभिः ॥२१॥

अधमत्रितयं प श्चाद्भौवनाद्यैस्त्रिभिस्तथा।
मध्यमत्रितयं प्रोक्तमथ सौरादिभिस्त्रिभिः ॥२२॥

उत्तमत्रितयं तेषु प्रथमत्रितयस्य तु।
न ध्वजारोहणं प्रोक्तमन्ययोरेव कल्प्यते ॥२३॥

प्रथमत्रितयस्यापि पञ्चाहत्रियहोत्सवम्।
मध्यमत्रितयस्यापि सप्ताहं वा नवाहकम् ॥२४॥

अङ्कुरानर्पयित्वादौ भेरी संताड्य चारभेत्।
एकाहमारभेद्धीमान्भेरीताडनपूर्वकम् ॥२५॥

(पुनरुत्सवानां त्रिधा विभागः)

भौवनात्पक्षपर्यन्तं ये स्युरत्र महोत्सवाः।
ध्वजारोहणपूर्वा श्च भेरीताडनपूर्वकाः ॥२६॥

अङ्कुरार्पणपूर्वा श्च त्रिविधास्ते भवन्ति हि।
त्रैविध्यं तेषु यत्प्रोक्तं तदिदानी विविच्यते ॥२७॥

(ध्वजारोहणपूर्वधिधिः)

षण्णामप्युत्सवानां तु प्रोक्तानां तीर्थभं तु यत्।
विगण्यय ततः पूर्वे त्रिगुणेऽहनि निर्श्चिते ॥२८॥

ध्वजमारोप्य तद्रात्रौ कृत्वा भेर्यादिताडनम्।
ततः प्राप्तदिने रात्रावुत्सवारम्भ उच्यते ॥२९॥

(भेरीताडनपूर्वविधिः)

ध्वजारोहणपूर्वोऽयं प्रोक्तोऽथ विधिरुच्यते।
भेरीताडनपूर्वस्य पूर्ववन्निर्श्चिते सति ॥३०॥

द्विगुणीकृत्य दिवसं तद्रात्रौ ताडनं पुरा।
भेर्याः कृत्वा ध्वजारोहं कारयेत्तदनन्तरम् ॥३१॥

ततः प्राप्तदिने रात्र्यामुत्सवारम्भ उच्यते।
भेरीताडनपूर्वश्च प्रोक्त एवं जनार्दन ॥३२॥

(अङ्कुरर्पणपूर्वविधिः)

अङ्कुरार्पणपूर्वे तु प्रोक्ताहस्यादिमे निशि।
अङ्कुरानर्पयित्वाथ ध्वजमारोप्य ताड्य च ॥३३॥

भेरीं सदेवताह्वानमार भेदुत्सवं ततः।
अङ्कुरार्पणपूर्वश्च प्रोक्त एव विधिर्मया ॥३४॥

ध्वजस्योत्थापनं भेर्यास्ताडनं चाङ्कुरार्पणम्।
सर्वेषामुत्सवानां स्याद्व्यत्यासोऽत्र विविक्षितः ॥३५॥

(उत्सवारम्भकालः)

एकाहस्यादिमे रात्रौ त्रियहस्य चतुर्थके।
पञ्चाहस्योत्सवस्यापि निशि षष्ठे जनार्दन ॥३६॥

भौवनस्याष्टमे रात्रौ शाक्तस्य दशमे निशि।
रौद्रस्य द्वादशाहे तु सौरस्यापि त्रयोदशे ॥३७॥

चतुर्दशस्य तत्पूर्वे निशि पञ्चदशे भवेत्।
पक्षस्य षोडशाहे तु निश्यारम्भ उदाहृतः ॥३८॥

रात्रावेवोत्सवारम्भो दिवावभृथ उच्यते।

(बलिसंख्या)

पक्षे त्रिंशद्बलिः प्रोक्तो मानवे चाष्टविंशतिः ॥३९॥

सौरे बलि श्चतुर्विंशो रौद्रे द्वाविंश एव हि।
शाक्तेऽष्टादश उद्दिष्टा भौवने स्यु श्चतुर्दश ॥४०॥

भौते दशबलिं विद्धि गौणे षड्बलिरुच्यते।
शैवे बलिद्वयं चैव निशि चाह्नि प्रकल्पयेत् ॥४१॥

(ध्वजवस्त्रम्)

एवं त्रैविध्यमत्रोक्तम्; ध्वजादिविधिरुच्यते।
उत्तमं दशहस्तं स्यान्मध्यमं नवहस्तकम् ॥४२॥

अधमं चाष्टहस्तं स्याद्वस्त्रं प्रोक्तं ध्वजाय वै।
चतुःपञ्चषडंशैकविस्तारं स्यात्सुदैर्घ्यकात् ॥४३॥

श्रेष्ठमध्यकनिष्ठं तद्विस्तारार्धं शिरो भवेत्।
पा र्श्वयोस्तु शिरोमानात्कल्पयेत भुजद्वयम् ॥४४॥

विस्तारेण समं पादं त्रिपादं चार्धमेव वा।
जयदं शान्तिदं चैव पुष्टिदं च क्रमाद्भवेत ॥४५॥

पादयोर्द्वितयं कुर्यात्त्रितयं वा यथेच्छया।
कार्पाससूत्रनिष्पन्नं सु श्लक्षणं सुदृढं सितम् ॥४६॥

नातिस्थूलं नातिसूक्ष्मं केशवैवर्ण्य वर्जितम्।
एवं निष्पाद्य वस्त्रं तन्मध्ये च विलिखेद् वृषम् ॥४७॥

(ध्वजवस्त्रे वृषलेखनम्)

कलाङ्गुलसमुत्सेधमुत्तमोत्तममुच्यते।
अङ्गुलत्रितयह्रासाद्यावन्मन्वङ्गुले कृते ॥४८॥

अधमाधममुक्तं स्यादुत्सेधं नवधा वृषे।
ककुद्मन्तमति श्वेतं विधिना कारयेत्ततः ॥४९॥

आस्यं शृङ्गे खुराः कर्णौ सास्ना च वृषणावपि।
ओष्ठौ च सर्वे रक्ता स्युः श्वेतकृष्णे च लोचने ॥५०॥

बालः पीतनिभः प्रोक्तो रक्तपीतनिभं गुदम्।
क्षुद्रघण्टामयीं मालां पीतामस्य प्रकल्पयेत् ॥५१॥

छत्रचामरसंयुक्तं पद्मविष्टरमास्थितम्।
शान्त्यै शयानं पुष्ट्यर्थं स्थितं दीपद्वयान्वितम् ॥५२॥

पूर्णकुम्भसमायुक्तं मालदिभिरलंकृतम्।
कृताक्षिमीलनं चापि विधिना वृषभे श्वरम् ॥५३॥

(ध्वजाधिवासः)

तमानीय शिवस्याग्रे दक्षिणे चोत्तरेऽपि वा।
मण्टपेऽलंकृते रम्ये विधिना स्थण्डिले कृते ॥५४॥

तन्मध्ये विन्यसेत्कुम्भं वृषदैवतमुत्तमम्
षोडशप्रस्थसंपूर्णं पक्वबिम्बफलप्रभम् ॥५५॥

शोधितं क्षालितं चैव सितसूत्रविचित्रितम्।
गन्धोदपूरितं सम्यक् सहिरण्यं सवस्त्रकम् ॥५६॥

सकूर्चं सापिधानं च तदर्धपरिमाणकान्।
तादृशान्कलशानष्ट दलाग्रेष्वभितो न्यसेत् ॥५७॥

तदग्रे स्थण्डिलं कृत्वा ध्वजं तत्रैव विन्यसेत्।
तदग्रे सैकतं कृत्वा स्थण्डिलं मुष्टिमात्रकम् ॥५८॥

तत्र वह्निं समाधाय शास्त्रंदृष्टेन कर्मणा।
पुण्याहं वाचयित्वादौ वृषकुम्भे वृषं यजेत् ॥५९॥

परितो लोकपालां श्च यथास्थानं समर्चयेत्।
मुद्ग ान्नं तु वृषेन्द्राय दत्त्वा कुम्भस्थिताय तु ॥६०॥

वृषमूलेन मन्त्रेण सर्वं तस्य प्रकलपयेत्।
वृषगायत्रिमन्त्रेण ध्वजं चाथ समर्चयेत् ॥६१॥

होमयेत्तु ततो मन्त्री विधिना तत्र पावके।
समिदाज्यचरूँल्लाजान्मुद्ग माषकुलत्थकान् ॥६२॥

तिलां श्च सर्षपान्मन्त्री प्रत्येकं जुहुयाच्छतम्।
तदर्धं वा तदर्धं वा वृषमूलेन देशिकः ॥६३॥

समिदाज्य चरून्वापि होमयेत्तानथापि वा।
सर्पिषा च ततो मन्त्री वृषगायत्रिमन्त्रतः ॥६४॥

होमं कृत्वाथ मूलेन दद्यात्पूर्णाहुतिं सुधीः।
ततो वृषेन्द्रमग्रस्थमचलं चलमेव च ॥६५॥

संस्त्राप्यभ्यर्च्य गन्धाद्यैर्हविस्तस्यापि दापयेत्।
ततः प्रतिसरं बेरे शूले वापि प्रयोजयेत् ॥६६॥

विशेषादर्चनं चाथ तयोर्लिङ्गे च कारयेत्।
ध्वजाधिवासनं कृत्वा रात्रौ तस्योत्सवं ततः ॥६७॥

(परेद्युः प्रातरुत्सवः)

प्रभाते विमले धीमन् विधिरेवं प्रदृश्यते।
मालाभरणवस्त्राद्यैरलंकृत्य ध्वजं ततः ॥६८॥

अर्चयित्वाथ गन्धाद्यैरुत्सवार्थमतन्द्रितः।
रथे वा शिबिकायां वा समारोप्यानयेत्सुधीः ॥६९॥

अथवानयनं प्रोक्तं केवलं परिचारकैः।
शूलमग्रे नयेत्तत्र सर्वालङ्कारसंयुतम् ॥७०॥

बलिदानयुतं वाथ तस्यानु ध्वजमानयेत्।
ध्वजस्यानूत्सवेशं च सर्वालङ्कारसंयुतम् ॥७१॥

आनयेद्वाथ चण्डेशं ग्रामादिषु यथाक्रमम्।
गीतनृत्तसमायुक्तं सर्वातोद्यसमन्वितम् ॥७२॥

संप्रविश्यालयं प श्चाद् ध्वजमारोपयेत्ततः।
आरोहणविधिं श्चापि वक्ष्यते क्रमशोऽधुना ॥७३॥

(ध्वजदण्डार्हवृक्षाः)

सालस्तमालः क्रमुको मधूकः सचम्पक श्चैव सवेणुक श्च।
अशोकपुन्नागशिरीषबिल्वा दशाप्यमी स्युर्ध्वजदण्डगोख्क्कः॥

(तत्र वर्ज्या वृक्षाः)

वक्रा श्च दुष्टा कृमिकोटराद्यैर्दुःस्थानजाता स्वयमेव शुष्काः।
वज्रादिभग्नाः प्रविदारिता श्च वृक्षास्तु सर्वे परिवर्जनीया
॥७५॥

(ध्वजदण्डलक्षणम्)

प्रासादसमदैर्घ्यं वा शिखरावधिकं तु वा।
नासिकावधिकं चापि गोपुरावधिकं तु वा।
प्रस्तरान्तं गलान्तं वा ध्वजदण्डं प्रकल्पयेत् ॥७६॥

दिग्रुद्रसूर्यैर्ध्वजदण्डमानं .हस्तैः क्रमात्कन्यसपूर्वमुक्तम्।
द्वाविंशदङ्गुल्यममुष्य नाहं मूलेऽधमे मध्यवरिष्ठयो श्च
॥७७॥

द्विद्व्यङ्गुलाद् वृद्धिरथाग्रनाहं तत्तत्त्रियंशेन मितं विदध्यात्।
तत्रोपदण्डं दृढवेणुजातं स्कन्धत्रयं संप्रतियोजयेच्च ॥७८॥

ध्वजदण्डोच्छ्रये तस्मि श्चतुःपञ्चषडंशकैः।
एकांशेनोपदण्डं तु कल्पयेत्कल्पवित्तमः ॥७९॥

सप्तषट्पञ्चमात्रं स्यादुपदण्डस्य नाहकम्।
तत्त्रिभागैकभागेन नाहमग्रे प्रकल्पयेत् ॥८०॥

अ श्वत्थचूतप्रभवं तु तस्य स्कन्धत्रयं चापि मधूकजं वा।
दण्डोपदण्डप्रतिबन्धनाय न्यग्रोधजं वा पनसोद्भवं वा ॥८१॥

स्कन्धत्रयस्य चायामं विंशदङ्गुलमुत्तमम्।
अङ्गुलाङ्गुलहानिः स्यान्मध्यमे चाधमेऽपि च ॥८२॥

विस्तारं तु भवेत्तस्य चायामे वह्निभागकम्।
नेत्रभागेन तस्यापि घनं नेत्राङ्गुलं भवेत् ॥८३॥

सरोजमुकुलाकारं स्कन्धत्रयमुदीरितम्।
सुषिरं दण्डमानं स्याद्दण्डोर्ध्वे तत्स्थितिः समा ॥८४॥

दण्डपा र्श्वेप्यधः स्कन्धेऽप्युपदण्डस्थितिर्भवेत्।
शेषयोस्तत्प्रवेशार्थं सुषिर तत्प्रमाणतः ॥८५॥

उपदण्डाग्रदेशो तु हित्वा वस्वङ्गुलं दृढम्।
आयसे वलये बद्धे यन्त्ररज्जुं प्रवेशयेत् ॥८६॥

ध्वजदण्डाग्रदेशे स्यादथाधो वलयस्थितिः।
वलयं सुदृढं कार्यपदण्डाग्रनाहतः ॥८७॥

कार्पासतन्तुजो रज्जुर्भवेद् दृढतरः समः।
तद्दण्डद्विगुणायामत्रिवृद्ग्रन्थिविवर्जितः ॥८८॥

कनिष्ठानामिकाङ्गुष्ठनाहात्सोऽपि त्रिधा स्मृतः।
प्रदक्षिणक्रमेणैव वेष्टितं दर्भमालया ॥८९॥

मालापल्लवसंयुक्तं यन्त्ररज्जुसमन्वितम्।
ध्वजदण्डं तु संपाद्य सर्वलक्षणसंयुतम् ॥९०॥

(ध्वजस्थानम्)

प्रासादाग्रे ततो धीमान्प्राकाराभ्यन्तरेऽपि वा।
पीठाग्रे गोपुराग्रे वा वृषाग्रे वृषपृष्ठके ॥९१॥

पीठगोपुरयोर्मध्ये वृषगोपुरयोस्तु वा।
मर्यादिमध्यमे वापि महामर्यादिमध्यमे ॥९२॥

(ध्वजदण्डस्थापनम्)

चतुस्तालमितं खात्वा तस्मिन्कूर्मं वृषं तु वा।
हेमोद्धूतं हृदा न्यस्य दण्डं तस्योपरि क्रमात् ॥९३॥

स्थापयेद्बलवद्भिस्तु देवाभिमुखसंस्थितम्।
तन्मूले वेदिकां कुर्याच्चतुस्तालप्रमाणतः ॥९४॥

सा भवेदधमा प श्चाद् षड्षडङ्गुलवृद्धितः।
मध्यमामुत्तमां चैव कुर्यात्पक्वेष्टकामयीम् ॥९५॥

अपक्वाभिरलाभे स्यादिष्टकाभिस्तु वेदिका।
विस्तारार्धसमुच्छ्रायां तत्त्रिभागाब्जमण्डिताम् ॥९६॥

शैलजां वा स्थिरां कृत्वा तस्यां वा दण्डसंस्थितिः।
गोमयेनोलिप्याथ पुण्याहं तत्र कारयेत् ॥९७॥

(ध्वजारोपणम्)

तदग्रे स्थण्डिलं कृत्वा शालिभिर्विमलैस्तत'।
परिस्तीर्य कुशैः प श्चाद् ध्वजं तत्रैव विन्यसेत् ॥९८॥

ध्वजपीठसमीपस्थे स्थण्डिले विन्यसेद् बुधः।
पूर्वाधिवासितं कुम्भं वृषराजाधिदैवतम् ॥९९॥

कर्णिकायां तु विन्यस्य परितः कलशान्नयसेत्।
उभयत्रापि संपूज्य पूर्ववद्देशिकोत्तमः ॥१००॥

कूर्चाम्भसा घटस्थेन वृषमूलमनुस्मरन्।
वृषेन्द्रे प्राणभूतं तं वृषमन्त्रं प्रयोजयेत् ॥१०१॥

तस्याङ्गानि यथास्थानं मन्त्ररूपाणि कल्पयेत्।
ततो ध्वजं समुद्धृत्य बन्धयेद्यन्त्ररज्जुना ॥१०२॥

क्षुद्रघण्टासमायुक्तं वृषगायत्रिमुच्चरन्।
सुमुहूर्ते सुलग्ने तु सर्वातोद्यसमन्वितम् ॥१०३॥

आरोपयेद् ध्वजं सम्यग्गीतनृत्तसमन्वितम्।
ततः प्रदक्षिणेनैव रज्जुना वेष्टयेत्सुधीः ॥१०४॥

आरोपितं च संपूज्य सर्वात्महृदयेन तु।
नमस्कृत्वा महादेवं वृषेन्द्रं कलशे ततः ॥१०५॥

कूर्चाम्भसा तु संप्रोक्ष्य ध्वजदण्डस्य मूलके।
दिगीशकलशाद्भिस्तु मन्त्रान्स्थानेषु योजयेत् ॥१०६॥

अथवा ध्वजमूले तु चण्डाष्टवसुदेक्तान्।
कलशान्पूर्ववत्स्थाप्य संपूज्याथ च मन्त्रवित् ॥१०७॥

दण्डमूले च परितो विन्यसेदनुपूर्वशः।
चण्डेशं दण्डमूले तु दण्डमध्ये ध्रुवं तथा ॥१०८॥

स्कन्धेषु सूर्यसोमाग्नीनुपदण्डेऽनिलं तथा।
ध्वजे च वृषभेन्द्रं तमर्चयित्वा क्रमेण तु ॥१०९॥

मुद्ग ान्नं पायसान्नं वा वषेन्द्राय निवेदयेत्।
यन्निवेदितमन्नं तद् वन्ध्यस्त्रीणां प्रदापयेत् ॥११०॥

अथवा ध्वजदण्डेन बध्व संस्थाप्य पूजयेत्।
एवमारोपयित्वाह्नि रात्रौ भेरी तु ताडयेत् ॥१११॥

(भेरीताडनम्)

प्रासादाग्रे ततो धीमान्मण्टपेऽलंकृतेऽथवा।
ध्वजमूले तु संलिप्ते गोपयेन यथाविधि ॥११२॥

स्थण्डिलद्वितयं कृत्वा शालिभिर्विमलैस्ततः।
लिङ्गस्याभिमुखं तत्र ध्वजस्याभिमुखं तु वा ॥११३॥

अस्त्रराजं समाधाय भेरी तस्याग्रतो न्यसेत्।
वेष्टयेन्नववस्त्रेण भेरी स्थण्डिलसंस्थिताम् ॥११४॥

पुण्याहं वाचयित्वाथ प्रोक्षयेत्तेन वारिणा।
ततः शूलास्त्रपूजा स्यात्सापीदानी निगद्यते ॥११५॥

(तत्र शूलपूजा)

शूलस्य मध्यमे पत्रे पूजयेत्तु महे श्वरम्।
ब्रह्माणं दक्षिणे पत्रे वामे विष्णु समर्चयेत् ॥११६॥

पालिकायां भवानीं च कुम्भे विघ्नेशमेव च।
दण्डाग्रे षण्मुखं तत्र दण्डमध्ये रवि तथा ॥११७॥

दण्डमूले शशाङ्कं च तदध श्चण्डमेव हि।
लोकपालान्यथास्थानं शूलपीठे समर्चयेत् ॥११८॥

एवं गन्धादिभिः शूलं समभ्यर्च्य विधानतः।
नैवेद्यं चापि ताम्बूलं दत्त्वा देवस्य मध्यमे ॥११९॥

(भेरीपूजा)

भेर्या श्च स्वार्चनं प श्चात्तद्विधि श्च निगद्यते।
नन्दिनं मध्यमे पूज्य दक्षिणेतरपा र्श्वयोः ॥१२०॥

सूर्याचन्द्रमसौ पूज्य भेर्यां तत्र यथाविधि।
कोणे चण्डं समभ्यर्च्य दिक्पालान्परितो यजेत् ॥१२१॥

नैवेद्यं दापयेत्तत्र नन्दिने तु विशेषतः।
ताम्बूलं च ततो दद्याद् देवाह्वानं ततो भवेत् ॥१२२॥

शिवादिसर्वदेवां श्च साष्टादशगणानपि।
नक्षत्रादीन्नदी श्चापि समुद्रान्पर्वतानपि ॥१२३॥

द्वीपाँल्लोकान्सपातालान् समाहूय विशेषतः।
उत्सवावभृथौ प श्चाच्छ्रावयेत्सकलं जनम् ॥१२४॥

वाद्यकं च समाहूय प्रोक्षयित्वा त्वनन्तरम्।
तस्य हस्ते तु सलिलं कुसुमं चापि दापयेत् ॥१२५॥

सोऽपि पुष्पं विनिक्षिप्य भेरीमुद्धृत्य वादयेत्।
वादयित्वात्र दिक्तालान्गाननृत्तसमन्वितम् ॥१२६॥

वृषताल तत श्रान्ते सर्वेषामपि वादयेत्।
नृत्तं चैवाष्टदिग्भागे संस्थिताभिर्भवेदिह ॥१२७॥

शिवायतनयोषिद्भिः सर्वातोद्यसमन्वितम्।
चतुर्विधं भवे दद्यादातोद्यमिति कीर्तितम् ॥१२८॥

ततं च विततं चैव घनं सुषिरमेव च।
ततं वीणादिकं प्रोक्तं विततं मुरजादिकम् ॥१२९॥

घनं च कांस्यतालाद्यं वंशादि सुषिरं स्मृतम्।
एतै श्चतुर्भिः संयुक्तैर्गीतैः शब्दैस्तु तच्छ्रुतः ॥१३०॥

स हि पञ्चमहाशब्दः शिवप्रियकरः सदा।
त्रिसन्ध्यं कारयेत्तेन चोत्सवेषु शिवालये ॥१३१॥

(बलिक्रिया)

भेरीमेवं तु संताड्य ग्रामादिष्वथ देशिकः।
बलिप्रदानं कुर्वीत त्रिशूलेन समन्वितम् ॥१३२॥

बेरेण सहितं वापि बद्धप्रतिसरेण हि।
अन्नलिङ्गयुतं वापि सर्वालङ्कारसंयुतम् ॥१३३॥

ब्रह्मादीशानपर्यन्तदिक्पालेभ्यो बलिं ददेत्।
तां श्चापि स्वस्वदिग्भागे स्थित्वा तु स्तुतिपूर्वकम् ॥१३४॥

आहूय तीर्थदिवसं श्रावयित्वा जनार्दन।
स्वस्वनामपदोपेतैर्मन्त्रैर्दद्याद्बलिं ततः ॥१३५॥

अथ चैकं बलिं दत्त्वा दिक्पालाह्वानवर्जितम्।
देवालये प्रयुञ्जीत प्रोक्ता ह्येवं बलिक्रिया ॥१३६॥

(अङ्कुरार्पणम्)

उत्सवारम्भकालस्य सायाह्ने तु विशेषतः।
विघ्नेशं सर्वविघ्नानां शान्त्यर्थमभिपूज्य च ॥१३७॥

मालाभरणवस्त्राद्यैर्भूषयित्वा विनायकम्।
रथे वा शिबिकायां वा समारोप्य च भक्तितः ॥१३८॥

ग्रामादावुत्सवं कुर्यात्सर्वालङ्कारसंयुतम्।
तदग्रे शूलमस्त्रेशमुत्सवेशं च पृष्ठतः ॥१३९॥

आनयेद्वा सचण्डेशं केवलं वा विनायकम्।
विनायकानु मुद्गादिबीजद्रव्याणि चानयेत् ॥१४०॥

अङ्कुरार्थं मृदं गृह्य चण्डेशं तदनु क्रमात्।
मृत्संग्रहणकं वक्ष्ये तच्छृणु त्व जनार्दन ॥१४१॥

समुद्रसरितां तीरे तटाकस्य च तीरके।
पुष्करिण्यास्तटे वापि वने वोद्यानकेऽपि वा ॥१४२॥

शुद्धस्थानमनुप्राप्य शुद्धिं कृत्वाथ भूतलम्।
संप्रोक्ष्यास्त्रेण मन्त्रेण भूमिं यष्ट्वा स्वनामतः ॥१४३॥

खात्वा च पुतरस्त्रेण खनित्रेणोक्षितेन च।
कुशेन च परिस्तीर्य प्राङ्मुखो वाप्युदङ्मुखः ॥१४४॥

मृत्तिका बालुकां वापि पाणिभ्यां पुरुषे॰ तु।
स्थाल्यां कुशोपरीशेन मन्त्रेणाहृत्य निक्षिपेत् ॥१४५॥

पुनः प्रोक्ष्य हृदा मन्त्री पुष्पं तस्यां तु विन्यसेत्।
शङ्खदुन्दुभिनिर्घोषैर्गीतवाद्यसमाकुलैः ॥१४६॥

एवं मृद्ग्रहणं कृत्वा तथा चोत्सवमाचरेत्।
अथवा मृत्तिकामेनामुत्सवान्ते समाहरेत् ॥१४७॥

प्रविश्य भवनं प श्चाद् भक्ष्याद्यैस्तु विनायकम्।
संपूज्य चाङ्कुरार्थं तु बीजावापनमाचरेत् ॥१४८॥

तीर्थार्थमङ्कुरं कुर्यात्तत्स्थानं यागमण्टपे।
शिवाग्रे मण्टपे वा स्याद्दक्षिणे वाथ चोत्तरे ॥१४९॥

तद्विधिप्रोक्तमार्गेण कुर्यात्सर्वमतन्द्रितः।
ततोऽधिवासनं कुर्याच्छिवयज्ञाय मण्टपे ॥१५०॥

(यागमण्टपः)

ऐशान्यामग्निदेशे वा पा र्श्वयोरुभयोस्तु वा।
उत्तमं दशहस्तं स्यान्मध्यमं सप्तहस्तकम् ॥१५१॥

अधमं पञ्चहस्तं तु चतुरश्रं मनोरमम्।
चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम् ॥१५२॥

षोडशस्तम्भसंयुक्तं द्वादशस्तम्भकं तु वा।
पङ्क्तित्रयसमायुक्तं पङ्क्तिमानसमुच्छ्रयम् ॥१५३॥

तन्मध्ये वेदिकां कुर्यान्नवभागैकभागतः।
विस्तारार्धसमुत्सेधां दर्पणोदरसन्निभाम् ॥१५४॥

परित श्चाष्टकुण्डानि चतुरश्राणि दिक्षु वै।
विदिक्षु वृत्तरूपाणि पद्मकुण्डं प्रधानकम् ॥१५५॥

ईशानशक्रयोर्मध्ये तस्य देश उदाहृतः।
उत्तमत्रितयस्यैवं ह्युत्सवस्य विशेषतः ॥१५६॥

माध्यमत्रितयस्यापि पञ्चाग्निविधिरुच्यते।
दिक्षु चत्वारि कुण्डानि पद्ममीशे प्रधानकम् ॥१५७॥

अधमत्रितयस्याथ कुण्डमेकं विधीयते।
यथेष्टदेशे कर्तव्यमाशासु चतसृष्वपि ॥१५८॥

उत्सवानां तु सर्वेषामेको वा होम उच्यते।
गोमयेनोपलिप्याथ मण्डपं वेदिकुण्डयुक् ॥१५९॥

वितानाशाध्वजैर्युक्तं दर्भमालाभिवेष्टितम्।
मुक्तादामसमायुक्तं फलपल्लवशोभितम् ॥१६०॥

मङ्गलाङ्कुरसंयुक्तं मङ्गलाष्टकशोभितम्।
द्वारकुम्भसमायुक्तं द्वारशोभासमन्वितम् ॥१६१॥

स्तम्भवेष्टनसंयुक्तं कृत्वा तन्मण्डपं सुधीः।
पुण्याहं वाचयित्वादौ कृत्वा वै वास्तुहोमकम् ॥१६२॥

(स्थण्डिलकल्पनम्, देवताभ्यर्चनं च)

वेदिकायां ततः कुर्यात्स्थण्डिलं शालिभिः समम्।
अष्टद्रोणैर्भवेच्छ्रेष्ठं तदर्धैर्मध्यमं भवेत् ॥१६३॥

तदर्धैरधमं चापि तन्मध्ये पद्ममालिखेत्।
कर्णिकाष्टदलोपेतं तण्डुलैः समलंकृतम् ॥१६४॥

तिलैर्लाजैः कुशैश्चापि शोभितं सुमनोहरम्।
कर्णिकायां तु संपूज्य गन्धाद्यैस्तु मनोन्मनीम् ॥१६५॥

वामादिशक्तीः शक्रादिदलेष्वष्टसु पूजयेत्।
अन्तस्तम्भचतुष्के तु धर्मादीन्परितो यजेत् ॥१६६॥

वेदिकायां भुवं पूज्य परित श्चाष्टमङ्गलम्।
पूर्वादिदिक्षु संपूज्य स्वनाम्ना देशिकोत्तमः ॥१६७॥

द्वारकुम्भेषु पूर्वादि वसूनष्टौ तु पूजयेत्।
कुण्डेषु परिता श्चाथ प्रागादिषु यथाक्रमम् ॥१६८॥

भवादिकांस्तु संपूज्य प्रधाने तु शिवं यजेत्।
पञ्चहोमविधाने तु पञ्चब्रह्माण्यनुक्रमात् ॥१६९॥

पूरुषं पूर्वकुण्डे तु दक्षिणेऽघोरमेव च।
सद्यं प श्चिमकुण्डे तु वामदेवं तथोत्तरे ॥१७०॥

ईशानं च प्रधाने च पूजयेत्तु विधानतः।
एकहोमविधाने तु शिवमेकत्र पूजयेत् ॥१७१॥

भद्राख्यं विजरं चैव विजृम्भं लोहितं तथा।
पूर्वादि तोरणेष्वेतानर्चयेत्तु यथाक्रमम् ॥१७२॥

वैकर्तनादिकान्बाह्ये यजेत्स्तम्भेषु पूर्वतः।
विताने चन्द्रमभ्यर्च्य लोकपालन्ध्वजेष्वथ ॥१७३॥

वासुकिं दर्भमालायां संपूज्य च विधानतः।
एवमभ्यर्च्य देवांस्तु कलशस्थापनं ततः ॥१७४॥

सौवर्णान्राजतान्वापि ताम्रजान्मृण्मयांस्तु वा।
निर्दोषान्सर्वतो रम्यान् कलशांस्तु समाहरेत् ॥१७५॥

षोडशप्रस्थसंपूर्णं शिवाख्यं कलशं स्मृतम्।
तदर्धपरिमाणः स्याच्छक्तिकुम्भो जनार्दन ॥१७६॥

शोषा श्च तत्समा ज्ञेयास्ते च विद्ये श्वरात्मकाः।
क्षालिताञ्शोधितां श्चैव प्रोक्षितान्कुशवारिणा ॥१७७॥

सूत्रेण वेष्टितान्सम्यक् पुनरभ्युक्षितान्हृदा।
गन्धोदपरिपूर्णां श्च सहिरण्यान्सवस्त्रकान् ॥१७८॥

सकूर्चान्सापिधानां श्च गन्धचन्दनचर्चितान्।
सर्वानिकत्र संसाध्य सर्वात्मानं समुच्चरन् ॥१७९॥

शिवकुम्भं न्यसेन्मध्ये शक्तिकुम्भं च दक्षिणे।
दलेष्वष्टसु पूर्वादि विद्येशकलशान्न्यसेत् ॥१८०॥

एवं विन्यस्य कुम्भांस्तु ततो देवान्समर्चयेत्।
पं श्चमाभिमुखं स्थाप्य वेदीमध्ये विशेषतः ॥१८१॥

ध्यात्वा सदाशिवं देवं शिवकुम्भे समर्चयेत्।
आदिशक्तिं च तत्कुम्भे विद्येशान्परितो यजेत् ॥१८२॥

गन्धादिभिः समभ्यर्च्य नैवेद्यान्तं विशेषतः।
लोकपालान्यथास्थाने सास्त्रान्सर्वान्समर्चयेत् ॥१८३॥

(होमः)

ततोऽग्निं विधिवत्स्थाप्य देशिकः शान्तमानसः।
सर्वकुण्डेषु होमार्थं मूर्तिपानादिशेत्ततः ॥१८४॥

सोष्णीषः सोत्तरीय श्च नववासो वसञ्छुचिः।
देशिकस्तादृशाः सर्वे साधका वात्र पुत्रकाः ॥१८५॥

अष्टौ वा चतुरो वाथ होतारस्ते भवन्ति हि।
प्रधाने स्वयमेव स्यादेकहोमविधावपि ॥१८६॥

अध्येतृभि श्चतुर्भि श्च प्रागादिक्रमयोगतः।
ऋगादिसामपर्यन्तं कुर्यादध्ययनं ततः ॥१८७॥

होमयेच्च ततो धीमान्मूर्तिपैः साधकैः सह।
अग्निकार्यविधिप्रोक्तं कृत्वा कर्माखिलं बुधः ॥१८८॥

समिदाज्यचरूँल्लाजान्सर्षपां श्च यवांस्तिलान्।
मुद्ग शालिसमायुक्तन्वेणुमाषां श्च होमयेत् ॥१८९॥

अ श्वत्थोदुम्बरप्लक्षवटाः पूर्वादितः क्रमात्।
शमीबिल्वखदिरार्का विदिक्षु परिकल्पिताः ॥१९०॥

समिदर्थे पलाशस्तु प्रधानस्य प्रकीर्तितः।
तैस्तैः परिधयः प्रोक्ता श्चत्वारो विष्टराः समाः ॥१९१॥

सर्वत्रौदुम्बरी वात्र समिद् ग्राह्या विचक्षणैः।
पञ्चब्रह्मषडङ्गैस्तु समिदादीन्क्रमेण तु ॥१९२॥

ईशानादिशिरोऽन्तं स्यात्सप्तद्रव्यहुतं क्रमात्।
सद्यादिहेतिपर्यन्तैर्होमयेनमन्त्रवित्तमः ॥१९३॥

प्रतिद्रव्यावसाने तु व्याहृत्या जुहुयात्ततः।
सहस्त्रं वा तदर्धं वा तदर्धार्धमथापि वा ॥१९४॥

अष्टोत्तरशतं वापि तदर्धं वापि होमयेत्।
उत्तमत्रितये सर्वैः सप्तभिर्ध्ययत्रये ॥१९५॥

अधमत्रितये षड्भिर्द्रव्यैर्होमोऽत्र कथ्यते।
उत्तमे ब्रह्ममूलाङ्गैर्होमं कुर्याद्विचक्षणः ॥१९६॥

मध्यमे मूलपूर्वैस्तु होममग्रे प्रकल्पयेत्।
कन्यसे ब्रह्मभिस्तद्वत्समिदादिक्रमेण तु ॥१९७॥

ततः पूर्णाहुतिं दद्याच्छिवमन्त्रेण देशिकः।
ततो वह्निं समभ्यर्च्य परिषिच्य समापयेत् ॥१९८॥

(कौतुकबन्धनम्)

ततः शूलं समानीय शाङ्करे वाथ मारुते।
स्थण्डिले स्थाप्य तं देवं पूज्य गन्धादिभिस्तदा ॥१९९॥

बन्धयेत्कौतुकं मन्त्री विधिस्तस्य च कथ्यते।
शूलाग्रे स्थण्डिलं कृत्वा शालिभिर्विमलैस्तथा ॥२००॥

तन्मध्ये पद्ममालिख्य स्थालीं तत्रैव विन्यसेत्।
पूरयित्वा ततः स्थालीं तण्डुलैराढकैस्ततः ॥२०१॥

तत्र पद्मं समालिख्य हैमं वा राजतं तु वा।
कार्पासतन्तुजं वापि सूत्रं तत्रैव विन्यसेत् ॥२०२॥

भस्म चापि ततस्तत्र विन्यसेद्देशिकोत्तमः।
पुण्याहं वाचयित्वाथ शूलं संपूज्य पूर्ववत् ॥२०३॥

कौतुकं च हृदाभ्यर्च्य सर्वात्मानमुदाहरन्।
अस्त्रमध्यमपत्रस्य मूले तद्बन्धयेत्सुधीः ॥२०४॥

अस्ति चेत्प्रतिमा तत्र तद्धस्ते दक्षिणे भवेत्।
भस्म चाप्यस्त्रमन्त्रेण बन्धिते कौतुके न्यसेत् ॥२०५॥

उत्सवप्रतिमायां च तद्वदेवं प्रबन्धयेत्।
विशेषेष्वपि बेरेषु यदा येनोत्सवं भवेत् ॥२०६॥

तस्मिंस्तस्मिंस्तदा बेरे पूर्वमेव प्रबन्धयेत्।
देवीनां गौरिगायत्र्या भवेत्कौतुकबन्धनम् ॥२०७॥

लवणोपरि तासां तु विन्यसेद्वाथ कौतुकम्।
अन्येषां स्वस्वनाम्नैव प्रोक्तः प्रतिसरे विधिः ॥२०८॥

बन्धनान्ते च सर्वेषां विधिना बलिरुच्यते।
ततो बलिप्रदानं स्यात्तद्विधि श्चात्र कथ्यते ॥२०९॥

अस्त्रराजादिशस्त्राणि से श्वराणि यजेत्क्रमात्।
तत्तद्दिशोत्तमाङ्गस्थान्यथवा केवलानि च ॥२१०॥

लोहानि वा सवृक्षाणि तानि कृत्वा यथाविधि।
बल्यर्चयापि वा यार्ध कुर्यात्तां च बलिक्रियाम् ॥२११॥

तत श्चाप्यन्नलिङ्ग तु कारयेत्तु विचक्षणः।
अन्नेन शालिसिद्धेन दध्याज्याभ्यां प्लुतेन च ॥२१२॥

उक्तलक्षणसंयुक्त स्थलिकामध्यसंस्थितम्।
द्वादशाङ्गुलविस्तीर्णमुत्तमं तद्भवेदिह ॥२१३॥

अङ्लाङ्गलहान्या तु मध्यमं चाधमं भवेत्।
विस्तारेण समोत्सेधं मूलादग्रे क्रमात्कृशम् ॥२१४॥

तत्र पाशुपतं देवं सर्वदोषनिकृन्तनम्।
त्रिनेत्रं चतुर्भुजाकारं शिखाकोटिसमुज्जवलम् ॥२१५॥

वरदाभयहस्तं च वामसव्याक्षशूलधृत्।
एवं ध्यात्वा समभ्यर्च्य गन्धपुष्पादिभिः क्रमात् ॥२१६॥

अर्चितांस्तु ततो देवान्सर्वांस्तान्परिचारकैः।
सेष्णीषैः सोत्तरीयै श्च सपवित्रकरैस्तथा ॥२१७॥

धृत त्रिपुण्ड्रकै श्चापि वाहयित्वा क्रमेण तु।
सोष्णीषैः सौत्तरीयै श्च बलिदानाय साधकः ॥२१८॥

अस्त्रस्य पुरतो गच्छेदर्घ्यहस्तः समाहितः।
वज्राद्यैः सास्त्रदेवैस्तु परित श्च क्रमात्ततः ॥२१९॥

तेषां पृष्ठेऽन्नलिङ्गं च प्रोक्तलक्षणलक्षितम्।
वितानध्वजसंयुक्तं पिञ्छचामरसंयुतम् ॥२२०॥

धूपदीपसमायुक्तं सर्वातोद्यसमन्वितम्।
आनयेद्बलिदानार्थं बल्यन्नमपि वक्ष्यते ॥२२१॥

शुद्धतण्डुलसंसिद्धं शिवं वापि तदर्धकम्।
हेमरूप्यादिपात्रस्थमुक्तद्रव्यसमन्वितम् ॥२२२॥

पिधाय तद्विधानेन वस्त्रेण सुसितेन च।
साधकस्तु समाहृत्य गन्धपुष्पादिसंयुतम् ॥२२३॥

पा र्श्वे समानतं तस्य सोऽपि मौनव्रतस्थितः।
ततो बलिं पुरा दद्यान्नित्यवन्मन्त्रवित्तमः ॥२२४॥

तत्तद्दिशाधिपानां च महापीठे बलिं क्षिपेत्।
गन्धपुष्पादिभिः सम्यक् कुक्कुटाण्डप्रमाणतः ॥२२५॥

अथवा तद्दिनेशानां समाप्तौ वा बलिक्रियाम्।
ग्रामादिषु ततो दद्याद् ब्रह्मादीशान्तमेव च ॥२२६॥

बलिपीठेऽथवा शुद्धे भूपृष्ठे वा बलिक्रियाम्।
बलिदानविधौ तत्र ये देवा वीथिपा श्चगाः ॥२२७॥

तेषामग्रे बलिं दद्यात् स्वनामपदमन्त्रतः।
अथवा वीथिमध्ये तु तानुद्दिश्य प्रदापयेत् ॥२२८॥

चतुष्पथे पिशाचेभ्यस्त्रिपथे रक्षसां भवेत्।
सभास्थाने सरस्वत्यै ज्येष्ठायास्तु जलाशये ॥२२९॥

न्यग्रोधे क्षेत्रपालस्य विघ्नेशस्यापि पिप्पले।
चैत्यवृक्षे गुहस्यापि कूपे कुम्भोदरस्य च ॥२३०॥

गोस्थाने चण्डरुद्रस्य भीमरुद्रस्य गोपुरे।
एवं बलिविधः प्रोक्तो दिनेशानप्यथ शृणु ॥२३१॥

(दिनाधिपाः, बलिद्रव्याणि च)

एकाहस्य शिवो देवो ब्रह्माविष्णुमहेश्वराः।
त्रिहस्याथ पञ्चाहे मूर्तयः पञ्च चैव हि ॥२३२॥

उत्सवानां तथान्येषां वक्ष्ये देवान्दिने श्वरान्।
सर्वेषु प्रथमाहस्तु विघ्नेशस्य प्रकीर्तितः ॥२३३॥

अन्तिमस्तु शिवस्य स्यात्तत्पूर्वो रक्षसो भवेत्।
उत्सवस्य तु निर्दिष्टो भौवनस्य जनार्दन ॥२३४॥

द्वितीयाहस्तु वैरिञ्चस्तृतीयो भौत उच्यते।
गान्धर्वस्तु चतुर्थ श्च पञ्चमः शाक्र उच्यते ॥२३५॥

भौवने देवताः प्रोक्ताः शाक्ते चाथ महोत्सवे।
षष्ठस्य सप्तमस्यापि मुनयो विष्णुरेव च ॥२३६॥

पूर्वोक्तैः सह निर्दिष्टा दिनानामधिपाः क्रमात्।
रौद्रस्याप्याधिके चाह्नि चाष्टमे नवमेऽपि वा ॥२३७॥

वसवो मरुत श्चैव क्रमाद्देवाः प्रकीर्तिताः।
सौरे चाप्यधिके चाह्नि चन्द्रो देव उदाहृतः ॥२३८॥

मानवस्योत्सवस्याथ यौ दिनावधिकौ तु तौ।
एकादशद्वादशयो रुद्रा रवय एव च ॥२३९॥

ततः पञ्चदशाहस्य यो दिनस्त्वधिको भवेत्।
त्रयोदशाहस्तस्यापि पितरो देवताः स्मृताः ॥२४०॥

एवं दिनाधिपा देवाः क्रमेण परिकीर्तिताः।
एकाहस्य तु शैवस्य शुद्धमन्नं ततः परम् ॥२४१॥

हारिद्रं कृसरान्नं च गौणे यवभवं तथा।
मुद्ग माषकुलत्थान्नं वेणुनिष्पावजं तथा ॥२४२॥

भौतोत्सवस्य निर्दिष्टं क्रमेण दिनपञ्चके।
अपूपयवगोधूमतिलखण्डाज्यमेव च ॥२४३॥

आढकी च क्रमाद् द्रव्यं भौवनाहेषु सप्तसु।
प्रियङ्गवरकौ चापि शाक्तस्याप्यधिकौ मतौ ॥२४४॥

रौद्रस्य गुलनीवारावधिकौ तु ततः परम्।
सक्तुः सौरेऽधिकः प्रोक्तस्ततः पनसलाजकौ ॥२४५॥

मानवेऽप्यधिके द्रव्ये पक्षे स्याच्च पयोऽधिकम्।
शुद्धतण्डुलसंसिद्धे सर्पिषान्ने परिप्लुते ॥२४६॥

यद्यदद्रव्य दिनेषूक्तं तत्तन्निक्षिप्य दापयेत्।
सायं प्रातर्बलिं दद्यादथवापि मधुप्लुतम् ॥२४७॥

(उत्सवक्रमः)

एवं द्रव्यं समाख्यातमुत्सवक्रम उच्यते।
ग्रामादौ यत्र देवानां दीयते बलिकर्म तत् ॥२४८॥

तत्रैवोत्सवयानं स्यात्सर्वालङ्गारसंयुतम्।
वीथीनां शोधनं पूर्वं मार्जनं चापि कारयेत् ॥२४९॥

शुद्धतोयेन सर्वापि वीथीः सर्वत्र सेचयेत्।
गृहश्रेण्यां च सर्वत्र बध्नियाद्विविधान् ध्वजान् ॥२५०॥

सभास्थानेऽपि विधिना बध्नीयाद्वा वृषध्वजान्।
पूर्णकुम्भं प्रतिद्वारं मङ्गलाङ्कुरसंयुतम् ॥२५१॥

दीपयुक्तं समायोज्य दर्भमालावलम्बनैः।
रथे वा शिबिकायां वा प्रतिमां बद्धकौतुकाम् ॥२५२॥

सर्वाभरणसंयुक्तां चित्रहृद्यांशुकैर्युताम्।
मालापुष्पप्रभायुक्तां सर्वालङ्कारसंयुताम् ॥२५३॥

छत्रचामरसंयुक्तं पिञ्छध्वजसमन्वितम्।
धूपदीपसमायुक्तं सर्वातोद्यसमन्वितम् ॥२५४॥

गीतनृत्तसमायुक्तं ग्रामादावानयेच्छनैः।
चण्डेशं च तथाभूतं तस्या श्चानु समानयेत् ॥२५५॥

डोलादीनि च यन्त्राणि वृषा श्वगजयन्त्रकान्।
गायकान्नर्तका श्चैव तथा बन्दिजनानपि ॥२५६॥

मालाभरणहृद्याङ्गशिवायतनयोषितः।
शैवां श्चतुर्विधां श्चापि देशिकादींस्तथैव च ॥२५७॥

ब्राह्मणां श्च स्वकर्मस्तान्क्षत्रियादींस्तथैव च।
भक्तानन्यान्बहू श्चापि सेवार्थं तत्र कल्पयेत् ॥२५८॥

उत्सवान्ते प्रविश्यान्तः संस्थाप्यास्थानमण्टपे।
वितानध्वजसंयुक्ते स्तम्भवेष्टनसंयुते ॥२५९॥

पाद्यमाचमनं चार्घ्यं हृच्छिर श्चूलिकाणुभिः।
दत्त्वा देवस्य देव्या श्च ततः स्नपनमाचरेत् ॥२६०॥

शङ्खदुन्दुभिनिर्घोषैर्जयशब्दादिमङ्गलैः।
ततः सिंहासनादौ तु देवमारोप्य भक्तितः ॥२६१॥

पाद्यादीन्पूर्ववद्दत्त्वा गन्धाद्यैरर्चयेद्बुदा।
वस्त्राभरणमाल्यादींस्तेन मन्त्रेण दापयेत् ॥२६२॥

प्रभूतं च हविर्दत्त्वा मुखवाससमन्वितम्।
ताम्बूलं च ततो दत्त्वा शङ्खध्वनिसमन्वितम् ॥२६३॥

प्रच्छादनपटं चाथ देवाग्रे प्रेरयेत्तदा।
गीतनृत्तादिभिः प श्चाद्विनोदं सम्यगाचरेत् ॥२६४॥

देशिकः सव्यभागे तु स्वासीनो वामके नृपः।
तयोः पृष्ठप्रदेशे तु शिष्या भृत्या श्च संस्थिताः ॥२६५॥

मृदङ्गाद्या महाशब्दा देवस्य पुरतः स्थिताः।
पद्मपत्रवदाकारं शुद्धकांस्यमयेन तु ॥२६६॥

तालमध्येऽवंटं कुर्यात्सुषिरे रज्जुयोजनम्।
ग्रन्थिपुच्छयुता रज्जु श्चैवं तालद्वयं कुरु ॥२६७॥

तालहस्तयुतो वामभागे गान्धर्वसंस्थितेः।
मद्दलं च मृदङ्ग वा सव्ये पा श्वे इति स्मृतम् ॥२६८॥

नृत्तं गेयसमायुक्तं बिम्बाग्रे भरतोक्तवत्।
उच्चैर्यष्टिप्रदीपैस्तु रात्र्युत्सवमथाचरेत् ॥२६९॥

आरात्रिकं च कुर्वीत रात्रावस्थानमण्टपे।
सर्वेष्वेषु दिनेष्वेवं कृत्वा बल्युत्सवक्रियाम् ॥२७०॥

(मृगयात्रा)

तीर्थर्क्षादह्नि पूर्वे तु मृगयात्रा भवेत्ततः।
तत्पूर्वेऽह्नि न देवेशं नृत्तरूपं महे श्वरम् ॥२७१॥

कृष्णगन्धं समालिप्य कारयेच्च महोत्सवम्।
व्यत्यासेनाथवा चै कल्पयेत्कल्पवित्तमः ॥२७२॥

(तीर्थसंग्रहः)

तीर्थार्थं कौतुकं शूले प्रतिमायां यथाविधि।
बन्धयेत्पूर्वमुत्सृज्य तीर्थर्क्षस्यादिमे निशि ॥२७३॥

प्रत्यूषे च ततो धीमान्कुर्यात्तीर्थस्य संग्रहम्।
यागधाम्नि शिवाग्रे वा जलतीरेऽथवा सुधीः ॥२७४॥

स्थण्डिलद्वितयं कृत्वा शालिभिर्विमलैस्तयोः।
पद्ममष्टदलं कृत्वा तण्डुलैरुपशोभितम् ॥२७५॥

घरिस्तीर्य कुशैस्तत्र शूलमेकत्र विन्यसेत्।
तदग्रे कलशान्सोदान्सर्वलक्षणलक्षितान् ॥२७६॥

मध्यात्प्रभृति विन्यस्य नव तेषु समर्चयेत्।
नवशक्तीस्तु संपूज्य गन्धपुष्पादिभिः क्रमात् ॥२७७॥

त्रिशूलं चाथ संपूज्य पूर्ववद्देशिकोत्तमः।
ततस्तैः कलशै शूलमभिषिच्य यथाक्रमम् ॥२७८॥

अवगाह्य जले प श्चाच्छूलमभ्यर्च्य देशिकः।
सर्वा़उत्सवारम्भकालस्य सायाह्ने तु विशेषतः।

विघ्नेशं सर्वस्त्रैर्वा समोपेतः सन्निमज्य यथाविधि ॥२७९॥

प्रविश्य यागगेहं तं शूलं संस्थाप्य पूजयेत्।
तीर्थार्थं कौतुके बद्धे तत्र वा कलशांस्तु तान् ॥२८०॥

शूलेऽभिषिच्य कृत्वा तु धाम चाथ प्रदक्षिणम्।
यागधाम्नि ततः शूलं स्थाप्य सम्यक् समर्चयेत् ॥२८१॥

एवं कौतुकतीर्थं तद्वैकल्पिकमुदाहृतम्।
प्रभाते दिवसे कृत्वा पूजाहेम बलिक्रियाम् ॥२८२॥

उत्सवं च समाप्यैवं चूर्णोत्सवमथाचरेत्।
सुशुष्कां रजनीं शुद्धां शुद्धपात्रे विगृह्य च ॥२८३॥

आस्थानमण्टपे तत्र शिवाग्रे वाथ मण्टपे।
स्थण्डिलद्वितयं कृत्वा विधिना तत्र विन्यसेत् ॥२८४॥

शूलं तदग्रे विन्यस्योलूखलं मुसलेन युक्।
आवेष्ट्याहतवस्त्रेण शूलं संपूज्य पूर्ववत् ॥२८५॥

लूखलं मुसलं चैव हेतिना सम्यगर्चयेत्।
लूखले नजनीं तत्र निक्षिपेद्धृदयेन तु ॥२८६॥

चूर्णयेन्मुसलेनैव घोरमन्त्रं समुच्चरन्।
यजमानादिभिः प श्चाच्चूर्णयेद्रजनीं तदा ॥२८७॥

तत श्चूर्णीकृतं सर्वं पात्रे स्वर्णादिनिर्मिते।
निक्षिप्यास्त्रेण मन्त्रेण ततस्तच्च त्रिधा भजेत् ॥२८८॥

शिवलिङ्गभिषेकार्थं तथार्चाशूलयोरपि।
जनानामपि सर्वेषां भागमेकं प्रकल्पयेत् ॥२८९॥

अथवा रजनीचूर्णं तैलेन च समन्वितम्।
तीर्थकाले प्रयोक्तव्यं प्रतिमाशूलयोरपि ॥२९०॥

जनानामपि सर्वेषां तस्मिन्काले प्रयोजयेत्।

(तीर्थविधिः)

आस्थानमण्टपे रम्ये शिवाग्रे वाथ मण्डपे ॥२९१॥

जलतीरेऽथ शुद्धे च निम्नोन्नतविवर्जिते।
गोमयालेपिते रम्ये शालिभिः स्थण्डिलद्वयाम् ॥२९२॥

कृत्वा तत्र त्रिशूलं तु स्थाप्यैकत्र तदग्रके।
स्थण्डिले कलशान् रम्यान्पूर्ववत्संस्कृतानपि ॥२९३॥

नवसंख्यान्समादाय मध्यादीशान्तमेव च।
ततस्त्रिशूलमभ्यर्च्य गन्धपुष्पादिभिः क्रमात् ॥२९४॥

कलशेष्वथ सर्वेषु गङ्गाद्यास्तीर्थदेवताः।
पूजयेन्मध्यमारभ्य तासां नामाभिधीयते ॥२९५॥

गङ्गा च यमुना चैव नर्मदा च सरस्वती।
सिन्धुर्गोदा च कावेरी शोणा पुष्करमेव च ॥२९६॥

प्राणादिचतुर्थ्यन्तस्वनामपदमन्त्रकैः।
देवताह्वानमप्यत्र कुर्याद्वा पूर्ववत्सुधीः ॥१९७॥

ततः स्नानोचितं द्रव्यं सर्वं शूलाय दापयेत्।
दन्तकाष्ठं च दत्त्वास्य हृन्मन्त्रेण विचक्षणः ॥२९८॥

सुमुहूर्ते सुलग्ने तु कलशैर्मध्यमक्रमात्।
अभिषिच्यास्त्रराजानं ततस्तीर्थेऽवगाह्य च ॥२९९॥

अस्त्रराजं समभ्यर्च्य गन्धपुष्पादिभिः क्रमात्।
सास्त्रान्दिगी श्वरान्वापि परितस्तत्र पूजयेत् ॥३००॥

आचार्यो मज्जनं कुर्यात्त्रिशूलेन समाहितः।
ये तत्र सह मज्जन्ति जना भक्तिसमन्विताः ॥३०१॥

ब्रह्महत्यादिभिः सर्वैर्मुच्यन्ते पापराशिभिः।
समुत्तीर्य जलाप्त श्चात् कृत्वा धामप्रदक्षिणम् ॥३०२॥

(पूर्णाहुतिः)

ततो यागगृहं गत्वा दद्यात्पूर्णाहुतिं तदा।
पूर्णाहुतिविधिं वक्ष्ये ततः शृणु जनार्दन ॥३०३॥

अभ्युक्ष्य स्रुचमस्त्रेण सर्पिषापूर्य तद्बिलम्।
प्रणवेन ततः पुष्पं साक्षतं सकुशं स्रुचि ॥३०४॥

विन्यस्य स्रुवमारोप्य तन्मध्ये चाप्यधोमुखम्।
दण्डमूलाग्रयोः प श्चाद्गृहीत्वा स्रुक्स्रुवौ च तौ ॥३०५॥

सव्येतराभ्यां पाणिभ्यां विन्यस्यास्यं तु शङ्खवत्।
ऋजुकायः समुत्थाय स्थितः समपदान्वितः ॥३०६॥

नाभिदद्नं तयोः कृत्वा मूलं तु करयेस्ततः।
दक्षिणेतरयोः कुर्यादुन्नत्यवनतिं तयोः ॥३०७॥

यथा धाराग्निमध्ये तु पततीत्येकधा सुधीः।
पूर्णाहुतिं तु मूलेन सम्यक्प श्चात्समापयेत् ॥३०८॥

होमान्ते तु पुरा दद्यादनेन विधिना गुरुः।
शिवयोः कुम्भमृद्धृत्य कलशानितरानपि ॥३०९॥

स्कन्धे संवाहयित्वाथ प्रासादे तु प्रदक्षिणम्।
उपावृत्त्य प्रविश्याथ शिवमन्त्रमनुस्मरन् ॥३१०॥

शैवेन शिवलिंङ्गं तु कुम्भेनैवाभिषेचयेत्।
शक्तिकुम्भेन पीठं तु तद्ग ायत्रीमुदाहरन् ॥३११॥

वेदिस्थैः कलशैः प श्चात् कुर्याल्लिङ्गेऽभिषेचनम्।
अथवाताननुद्धृत्य योजयित्वा शिवे घटे ॥३१२॥

शिवयोः कलशवेव समृद्धृत्याभिषेचयेत्।
तत श्च स्नपनं कुर्यात्सहस्रादिषु संभवैः ॥३१३॥

कलशैस्तु विधानेन ततो नैवेद्यमुत्तमम्।
दत्त्वा देवस्य सर्वेषां सकलानां च देशिकः ॥३१४॥

स्नपनं च पृथक् कृत्वा नैवेद्यं च प्रदापयेत्।
उत्सवेष्वेषु सर्वेषु कुर्यात्सर्वदिनेष्वपि ॥३१५॥

सायं प्रातर्विशेषेण शिवलिङ्गे जनार्दन।
सकलानां च सर्वेषां यथावित्तानुसारतः ॥३१६॥

(ध्वजावरोहणम्)

तस्मिन्निशि तृतीये वा पञ्चमे वाथ सप्तमे।
ध्वजावरोहणं कुर्याच्चण्डयागसमन्वितम् ॥३१७॥

चण्डयागमथो वक्ष्ये सर्वकामार्थसाधनम्।
गणानामपि सर्वेषां चण्डानां नायकस्तु यः ॥३१८॥

चण्डेशस्तु भवेत्सोऽयं तस्य पूजाप्रकल्पना।
चण्डयागः स्मृतः सोऽत्र समासेनाभिधास्यते ॥३१९॥

धाम्नि चण्डे श्वरस्यार्चामभिषिच्य समाहितः।
गन्धोदकेन तस्याग्रे कलशान्स्थण्डिलेऽथ वा ॥३२०॥

पूर्ववत्स्थापयित्वाऽथ तेषु मध्ये यजेत्सुधीः।
चण्डेशमथ शेषेषु वसूनष्ट यजेत्क्रमात् ॥३२१॥

गन्धादिभिः समभ्यर्च्य तै श्चण्डमभिषेचयेत्।
हविर्दत्त्वाथ ताम्बूल दद्याच्च्ण्डे समाहितः ॥३२२॥

ध्वजान्तिकं ततो गत्वा तन्मूले स्थण्डिलं ततः।
शालिभिर्विधिना कृत्वा तत्र संस्थापयेन्नव ॥३२३॥

कलशांस्तेषु मध्यस्थे वृषेन्द्रं देवमर्चयेत्।
परितो लोकपालां श्च ध्वजे वापि वृषं यजेत् ॥३२४॥

ततस्तैः कलशैः सर्वैर्दण्डमूलेऽभिषेचयेत्।
ततो वृषभदेवस्य मुद्ग ान्नं तु निवेदयेत् ॥३२५॥

तत श्चण्डे श्वरं चैव ध्वजस्थं वृषभे श्वरम्।
सूर्यसोमाग्निकां श्चैव क्रमेणैव जनार्दन ॥३२६॥

पूजयित्वाथ गन्धाद्यैस्तत्तत्स्थानाद्विसर्जयेत्।
ध्वजावरोहणं कुर्यादस्त्रमन्त्रं समुच्चरन् ॥३२७॥

तत श्चापि त्रिशूलेन सर्वातोद्यसमन्वितम्।
ग्रामादिषु बलिं दद्यात्सन्धिदेवान्विसर्जयेत् ॥३२८॥

प्रासादे वा बलिं दत्त्वा विना शूलं विसर्जयेत्।
शिवोत्सवेषु मातृणां बल्युत्सवविधिं सुधीः ॥३२९॥

वर्जयेदन्यदेवानां बल्युत्सवविधावपि।
यौगपद्यं तु शैवेन भवेत्तत्र दिने दिने ॥३३०॥

शैवं प्राधानिकं कुर्याद्देशिकः शास्त्रचित्तकः।
देवताह्वानकाले तु श्रुत्वा तीर्थदिनं जनः ॥३३१॥

यस्तीर्थसेवां नो कुर्यात्तस्याधिव्याधिसंभवः।
कल्याणं देवकल्याणे न कुर्वीत तथा भवेत् ॥३३२॥

तस्मात्तौ परिहर्तव्यौ नरेण हितमिच्छता।
एवं शिवोत्सवे सम्यङ् निर्वृत्ते विधिना ततः ॥३३३॥

दक्षिणां देशिकस्यापि विभवस्यानुरूपतः।
होतृणां जापिनां चैव दद्याद्वस्त्रादिभिस्तदा ॥३३४॥

शिवभक्तां श्च संपूज्य प्रीयतां मे सदाशिवः।
इत्युक्त्वा प्रणमेद्भूयो भूयो देवं सदाशिवम् ॥३३५॥

इति यः कारयेन्मर्त्यः शिवोत्सवमनुत्तमम्।
सर्वयज्ञफलं प्राप्य शिवेन सह मोदते ॥३३६॥

EXCERPTS FROM RAURAVOTTARA (RENUKOTSAVA)

रेणुकोत्सवमारब्धं पुत्रपौत्रविवर्धनम् ॥१॥

ग्रामवृद्धिकरं पुण्यं राज्ञो विजयवर्धनम्।
रोगशान्तिकरं पुण्यं रिपुक्षयकरं भवेत् ॥२॥

(उत्सवत्रैविध्यम्)

सर्वमासेषु कर्तव्यमुत्सवं कारयेद्बुधः।
वारोत्सवमिदं पुण्यं पक्षोत्सवं तु पौष्टिकम् ॥३॥

मासोत्सवं तु विजयमुत्सवं त्रिविधं कुरु।
शुक्रवारादि वारं तु पञ्चम्यादि तु पौष्टिकम् ॥४॥

पूर्णेन्तु पौर्णमासान्तं विजयं रेणुकोत्सवम्।

(अङ्कुरार्पणकालः)

पूर्वात्रे तु कर्तव्यमङ्कुरार्पणमेव च ॥५॥

(घण्टाताडनम्)

घण्टां च ताडयेत्कृत्वा नानावाद्यसमन्वितम्।

(ध्वजपटः)

पटप्रतिष्ठा कर्तव्या शिल्पिना चित्रकर्मणा ॥६॥

पक्षहस्तं पटं चैव द्विहस्तपुच्छसंयुतम्।
शेषं तु त्रिविघं भज्य गजा श्वफणिसंयुतम् ॥७॥

छत्र चामरे पा र्श्वे तु शङ्गास्त्रं मध्यमे लिखेत्।
नयनोन्मीलनं कृत्वा जीवन्यासादि होमयेत् ॥८॥

(ध्वजारोहणम्)

सन्धिदेवताह्वानादि खड्गास्त्रादि समर्चयेत्।
ब्रह्मादीशानपर्यन्तं नृत्तवाद्यदिसंयुतम् ॥९॥

आवाह्य पूजयेत्तत्र बलिं वत्त्वा विशेषतः।
मुग्दान्नं पायसान्नं च सर्पिपिण्डबलिं ददेत् ॥१०॥

ग्रामप्रदक्षिणं रेणुखड्गभूत पटैः सह।
नानादीपसमायुक्तं नानाच्छत्रसमन्वितम् ॥११॥

नानावद्यसमायुक्तं नानानृत्तसमन्वितम्।
नानाध्वजसमायुक्तं शिवशक्त्यादिसंयुतम् ॥१२॥

प्रविशेद्रेणुका देव्या आलयं तु प्रदक्षक्षिणम्।
भूतराजस्य पुरतो ध्वजादण्डे प्रतिष्ठिते ॥१३॥

ध्वजं लक्षक्षणमारभ्य वेदिकोपरि विन्यसेत्।
दशहस्त प्रमाणे तु हस्तमात्रेण यष्टिका ॥१४॥

यष्टिदण्डे न्यसेच्छिद्रं वलय मग्रसंयुतम्।
दर्भमालासमायुक्तं मयूरपत्रवेष्टितम् ॥१५॥

ध्वजदण्डं समभ्यर्च्य रेणुमन्त्रेण पूजयेत्।
पट दीर्घद्वय रज्जु घण्टासंयुक्तबन्धनम् ॥१६॥

ध्वज मारोपये द्देवीरेणुमन्त्र जपं कुरु।
ध्वजदण्डे समावाह्य रेणुकां सप्त मातृकाः ॥१७॥

ज्येष्ठां च वीरभद्रं च विष्णु परशुरामकम्।
मातङ्गीमष्ट लक्ष्मी श्च इन्द्रदिषु यजेत्क्रमात् ॥१८॥

ध्वजपूजादिकं कुर्याद् गन्धपुष्पं च धूपकम्।
दीपं नीराजनं चैव नैवेद्याद्युपचारकम् ॥१९॥

नव शक्त्यादिपूजां च नवपिण्डबलिं ददेत्।
ताम्बूलधूपदीपं च भूतराजबलिं ददेत् ॥२०॥

(रक्षाबन्धनम्)

रेणुमन्दिरमागत्य मूलबेरस्य पूजनम्।
रक्षासूत्रं ततः कृत्वा मन्दिरस्य प्रदक्षिणम् ॥२१॥

रेणुवामकरे चैव रक्षा बन्धनमाचरेत्।
खड्गास्त्रं धारयेच्चैव भूतराजस्य धारणम् ॥२२॥

आचार्यः सह संधार्य भस्म दत्त्वा तु रक्षके।
नैवेद्यधूप दीपद्यैरुपचारैः समन्वितम् ॥२३॥

(अङ्कुरार्पणम्)

यागशालां प्रविश्याथ उत्सवाङ्कुरमेव च।
तीर्थाङ्कुरं तु कर्तव्यं पालिका नव पञ्चके ॥२४॥

(पालिकादेवताः)

मारी चैव महामारी सर्पकङ्कणधारिणी।
कपालीमौक्तिके चैव पालिकास्वर्चयेत्क्रमात् ॥२५॥

क्षीरेण बीजसंयुक्तं तत्तन्मन्त्रेण निक्षिपेत्।

(यागशालाशुद्धिः)

वास्तुपूजासमायुक्तं पर्यग्निकरणं कुरु ॥२६॥

शुद्धिपुण्याहमेवोक्तं विक्रान्त्वा चास्त्रवर्धनीम्।
पञ्चगव्यादि संप्रेक्ष्य भूमिशुद्ध्यन्तमाचरेत् ॥२७॥

(यागशालायामर्चना)

पञ्चाङ्गभूषणैर्युक्तो वस्त्रहेमाङ्गुलीयकैः।
उष्णीषा मुत्तरीयं च अक्षमालादि धारयन् ॥२८॥

गुरुः संतुष्य संपूज्य रेणुहस्तधरो न्यसेत्।
अङ्गन्यासकला न्यास मन्त्रन्यासादिकं चरेत् ॥२९॥

द्वारशक्त्यादिपूजां च मूर्तिशक्त्यादिपूजनम्।
चलासनं तु संपूज्य वर्धभीभ्रमणं चरेत् ॥३०॥

स्थिरासनं तु संपूज्य तोरणादिषु पूजयेत्।
अष्टमङ्गलपूजां च दशायुधानि पूजयेत् ॥३१॥

अष्टच्छत्रादि संपूज्य अष्टध्वजादि पूजयेत्।
पताकाष्टकं संपूज्य क्षेत्रेशं परशुरामकम् ॥३२॥

वेदिकोपरि विन्यस्य रेणु संपूज्य बुद्धिमान्।
शक्त्यादिपद्मपर्यन्तं पूजयेत्तु यथाविधि ॥३३॥

कुण्डली कुङ्कुमी चैव कुम्भोदूभवा कुमारिणी।
कुसुम्बी निम्बिनी चैव खड्गिनी कामिनी तथा ॥३४॥

मण्डलत्रयमभ्यर्च्य मण्डलाधिपतिं विना।
रेणुकासनमभ्यर्च्य मूर्तिशक्ती श्च पूजयेत् ॥३५॥

(ध्यानम्)

रक्तावर्णां त्रिणेत्रां च कपालखड्गधारिणीम्।
शङ्खचक्रधरां देवीं पाशाङ्कुश धरां शुभाम् ॥३६॥

शूलघण्टासमायुक्तां रेणुं संपूज्य देशिकः।
आवाहनादि सपूज्य षोडसैरुपचारकैः ॥३७॥

अष्टशक्तिषु चैवोक्तमेकावरणमेव हि।
सर्वोपचारसंयक्तमग्निकार्यमथाचरेत् ॥३८॥

(होमः)

योन्याकारं त्रिकोणं वा अग्निकार्यादि पूर्ववत्।
होमद्रव्याणि सर्वाणि घृतं क्षौद्रं तु होमयेत् ॥३९॥

लंहोमद्रव्याणि सर्वाणि रेणुमूलेन होमयेत्।

(बलिविधिः)

होमान्ते तु बलिं दद्यादन्तर्बलिबहिर्बली ॥४०॥

रेणुयात्रा प्रकर्तव्या कर्तव्यं बलिमाचरेत्।
दिने दिनैकवारं स्याद् यात्रा बलिर्हुनेत्क्रमात् ॥४१॥

(यानक्रमः)

प्रथमं मल्लयन्त्रं च द्वितीयं दीपयन्त्रकम्।
तृतीयं नृत्तयन्त्रं तु चतुर्थं नागपीठकम् ॥४२॥

पञ्चमं गजवाहं च षष्ठं च वाजिवाहनम्।
सप्तमं तु त्रिशूलं च डोलारोहण मष्टतम् ॥४३॥

जटिलं यन्त्रयुक्तं च रथो वा शिबिका भवेत्।

(तीर्थोत्सवः)

साये चोत्सव मारभ्यं प्रतारवभुथं कुरु ॥४४॥

चूर्णोत्सवं बलिं तत्र महा तीर्थं प्रकल्पयेत्।
नदीतीरे तटाके वा मण्टपं कारयेद्बुधः ॥४५॥

रोणोः स्नानं च कर्तव्यं नैवेद्यं धूपदीपकम्।
उपचाराणि सर्वाणि नृत्तराद्यसमायुतम् ॥४६॥

दर्शनं म-गयुद्धस्य प्रविशेदालयं प्रति।
प्रार्या श्चत्तार्थहोमं तु रेणुखड्गास्त्रमन्त्रवित् ॥४७॥

पूर्णाहुतिं ततो हुत्वा यागदेवान्विसर्जयेत्।
रेणोः कुम्भाभिषेकं च नैवेद्यमुपचारकैः ॥४८॥

(आचार्यदक्षिणा)

दशनिष्कधनं दत्त्वा गुरुं संतोष्य भूषणैः।
वस्त्रहेमाङ्गुलीयै श्च दासीगोदानमेव च ॥४९॥

ध्वजावरोहणं कृत्वा नवपिण्डानि दापयेत्।
संधि देवान्विसृज्याथ मोनबलिं विनिक्षिपेत् ॥५०॥

रेणु गेहं प्रविष्याथ भूतराजबलिं ददेत्।
प्रकारस्य तु बाह्ये तु लोकाचारबलिं क्षिपेत् ॥५१॥

शिवशक्तिं च पूज्याथ स्वर्णमुद्रादिपल्लिकम्।
वस्त्रहेमाङ्गुली निष्कैः पङ्क्तिपूजां च कारयेत्॥
दीनान्ध कृपणादीनां भूरिदानं प्रकल्पयेत् ॥५२॥

Vidyalankara, Sastra-Chudamini, Sangita-Kalaratna, Professor Saligrama Krishna Ramachandra Rao, is a well-known scholar who combines traditional learning with modern research. Well versed in Sanskrit, Pali, Ardhmagadhi and several modern Indian languages and acquainted with Tibetan and some European languages, he has written extensively on Vedanta, Buddhism, Janism, Indian Culture, Art and Literature.

In his professional career, however, he was a Professor of Psychology. He has headed the Department of Clinical Psychology in the National Institute of Mental Health and Neuroscience's, Bangalore and the Department of Indian Culture in the Collision College Study Center of the University of the Pacific (U.S.A.) He was the senior associate of National Institute of Advanced Studies (Indian Institute of Science), Bangalore, and Guest Faculty, Indian Institute of Management, Bangalore and member of the Governing Council of TTD (SVCL Research Center), Tirupati. He has been member of Karnataka State Lalitha Kala Academy and Sangita Nritya Academy and Sangita Nritya Academy; he has served on the Agama Board (Govt. of Karnataka). He is President of Silpa-Kala Pratisthana. The Govt. of Karnataka has honored him with the 1986 Rajyotsava Award. He has received awards from Lalita-Kala Academy and Sangita Nritya Academy. He has been Awarded the Veda-Sanman for the year 2000 by the Govt. of India (Ministry of HRD, Sandipani Mahavidhyalaya, Ujjain). He has written more than Sixty Books in Kannada, a Play in Sanskrit, and a Pali Commentary on a Buddhist classic. One of his books on Iconography in Kannada has won the State Sahitya Academy Award, as also another of his Book on the Tirupati Temple.

Rs500,-

Published by
Sri Satguru Publications,
Indological and Oriental Publishers
A Division of
Indian Books Centre
14/6, Shakti Nagar,
Delhi-110007
India


ISBN 81-7030-821-6
9 788170 308218